PDF Compressor Free Version

समंवयसाम्राज्यसंरक्षणम्

PDF Compressor Free Version

समन्वयसाम्राज्यसंरक्षणम

PDF Compressor Free Version

ॐ

॥ श्रीः ॥

समन्वयसाम्राज्यसंरक्षणम्

श्री श्रीकरपात्रि

स्वामिहरिहरानन्दसरस्वतीपादैः

विरचितम्

मद्रास् ला जर्नल् मुद्राशालायां मुद्रितम्

PDF Compressor Free Version

॥ श्रीः ॥

विषयानुक्रमणिका

संख्या	विषयाः	पृष्ठाङ्काः
१	भूमिका	
२	संसारस्यानादित्वम्	१
३	चार्वाकादि सम्मतात्मस्वरूपम्	२
४	निम्बार्क शुद्धाद्वैतिनोर्मते	३
५	अद्वैतिमतम्	४
६	विशिष्टाद्वैति मतम्	५
७	शाक्ताद्वैति मतम्	६
८	माध्वमतानुयायिनां समारोहः	७
९	माध्वमतोपसंहारः	८
१०	शैवानां समाधानम्	११
११	श्रुतिस्मृति प्रभृतीनां सम्मतिः	१२
१२	नारायण शिवादि पदानां व्युत्पत्तिः	२०
१३	शिवपरत्वम्	२५
१४	भस्मधारणे वेदानुमतिः	२७
१५	ऊर्ध्वपुण्ड्रादि निषेधः	३१
१६	समन्वयसाम्राज्यपथानुसारिणो मतम्	३६
१७	परस्परं विवदमानानां शैववैष्णवानां-नरकप्राप्तिवर्णनम्	४७
१८	ऊर्ध्वपुण्ड्र-त्रिपुण्ड्रव्यवस्था	४८

PDF Compressor Free Version

संख्या	विषयाः	पृष्ठाङ्काः
१९	श्रीमच्छङ्करपादं प्रति भट्टपादकृतावज्ञाखण्डनम्	५२
२०	तप्तमुद्रादिधारणविषये विचारः	५७
२१	संक्षेपेण सर्वमतविचारः	६०
२२	अद्वैतमतविचारः	६१
२३	अद्वैतमते सगुणभक्त्यादिनिरूपणम्	६५
२४	बौद्धानां मतानि	६८
२५	शून्यवादविषये श्रीरामानुजीयविचारः	७०
२६	तत्रान्येषां मतानि	७२
२७	अद्वैतबौद्धमतयोर्वैलक्षण्यम्	७३
२८	भेदखण्डनम्	८४
२९	पूर्वपक्षः	८८
३०	उत्तरपक्षः	८९
३१	अभेदे भाष्याद्युपपत्तिः	९४
३२	भामतीकारलेखाविरोधः	९७
३३	अद्वैतमते वर्णाश्रमोपपत्तिः	१०३
३४	जगतः पारमार्थिकत्वखण्डनम्	१०७
३५	तत्वमसीत्यादिवाक्यार्थः	१०९
३६	अभेदपक्षे दूषणोद्धारः	११२
३७	एकमेवेत्यादिश्रुत्यर्थः	११८
३८	भेदखण्डनम्	११९
३९	द्वासुपर्णेति श्रुत्यर्थः	१२३
४०	जीवब्रह्मणोरभेदः	१२९
४१	जीवब्रह्मणोर्भेदखण्डनम्	१३६
४२	ब्रह्मसत्तानिरूपणम्	१४१
४३	शून्यवाद पक्षखण्डनम्	१४५

PDF Compressor Free Version

संख्या	विषयाः	पृष्ठाङ्काः
४४	बुद्धाभिमतसत्यस्वरूपम्	१४७
४५	व्यवहारे भट्टानुमतिः	१५१
४६	अद्वैते वर्णाश्रमव्यवस्था, तत्वज्ञानेऽधिकारी	१५२
४७	शून्यपदार्थखण्डनम्	१५२
४८	जगतोऽपारमार्थिकत्वम्	१५४
४९	पृथिव्यामित्यादिश्रुत्यर्थः	१५७
५०	अभयश्रुत्यर्थ विचारः	१६१
५१	जीव ईशाइत्यादिश्रुतेर्जीवादीनां व्यावहारिकानादित्वव्यवस्थापनम्	१६६
५२	विवर्तवादपर्यवसानम्	१६८
५३	सत्यासत्यस्वरूपम्	१७२
५४	सत्वासत्वयोः परस्परविरुद्धत्वखण्डनम्	१७५
५५	शून्यवादाभिमतसत्खण्डनम्	१७५
५६	श्रुतीनामद्वैते तात्पर्यम्	१७६
५७	अध्यासे दोषस्य कारणत्वम्	१७८
५८	त्रैगुण्य विषया इत्याद्यर्थः	१८०
५९	वेदस्यापौरुषेयत्वम्	१८४
६०	अग्नीषोमीयपशुशब्दार्थः	१८५
६१	मा हिंस्यात्सर्वंत्यस्यार्थः	१८६
६२	पशुहिंसने स्मृतिसमन्वयः	१८९
६३	सन्मार्गनिरूपणम्	१८९
६४	मंगलाचरणम्	१८९

(ग्रन्थ समाप्तिः)

PDF Compressor Free Version

शुद्धिपत्रम्

पृ०	पं०	शुद्ध	पृ०	पं०	शुद्ध
१	१०	महापरिमाणः	२७	२०	पदेनैव
२	८	पीति	३०	२१	अध्यात्म
२	१०	चित्कणः	३१	३	शारीरिक
३	७	तीति	३२	अन्तिम	पाशुपता
३	१२	पीड्यत इति	३५	५	चतुरस्रकम्
३	२०	सदंशा	३६	२	मेव
४	२	विरुद्ध	३६	११	हाराण
६	१८	उद्घोषयताम्	३६	अन्तिम	तेजस एव
८	७	रुद्रादित्या	३९	२१	नान्तःप्रज्ञं
११	१४	प्रसह्य	४०	२२	सुरापानादिव-द्रागतः
१२	१६	भगवानाद्यो			
१४	१०	को	४०	अन्तिम	निषेधः
१४	२५	तुं	४१	८	विहितत्वात्
१५	१४	मुण्डिने	४१	अन्तिम	स्वोपास्य इति
१५	अन्तिम	शुचिर्भूत्वा	४२	१२	विष्णवात्म
१९	२१	शाश्वतं	४२	१४	अन्तर्गत
२३	२२	भगवान्	४२	२४	भिधीयते
२५	१६	प्रादुरभूत्	४६	१९	प्रकुरुते
२५	२१	चोपास्य	४७	२२	मभेद
२५	अन्तिम	औदुम्बरी	४८	३	स्वोपास्य
२७	१	भस्मना	४८	६	हुत्वा

PDF Compressor Free Version

पृ०	पं०	शुद्ध	पृ०	पं०	शुद्ध
४८	१९	व्यवहिताश्च	८६	१०	निन्दा निन्द्यं निन्दितुं
५०	११	ग्रहणायैव	८६	१७	सम्मतत्वात्
५२	७	शाङ्कर	८८	१०	केवल
५२	८	शाङ्कर	८८	११	दयन्त्यः स्वार्थ
५६	२	गच्छेयम्	९२	१०	श्रुति
५६	अन्तिम	पातैः	९३	४	भाक्
५८	२१	उदघोषयताम्	९३	अन्तिम	ब्रह्मात्म
५९	१२	पटीयस्या	९४	३	आत्मा
६०	९	कक्षा	९४	८	यादृशीं
६०	१७	पुरुष	९४	१२	वोपासीत
६१	७	प्रतिपत्तिः	९५	७	अन्यद्विज्ञाय
६२	५	भ्यजायत	९६	२०	व्यर्थैव
६४	९	तस्यैव	९७	अन्तिम	संसारिणो
६६	३	निमित्तत्व	१००	७	ह्यद्वैत
६८	९	निरूढः	१००	१८	भयं भवेत्
७१	८	अद्यापि	१०४	१३	त्वस्या
७२	१०	वाऽश्चेत्	१०६	९	हिराई
७३	१	गोचरः	१०९	१८	गतत्वा
७५	७	कुरु, पच, चर	११०	१४	घटत्वेनेव
७८	१८	चैतदिष्टम्	१११	८	चेति
८०	८	उभयोरपि	११७	९	प्रतियोगी
८२	१५	अभ्युप	११७	११	घटान्तर
८३	९	अनभिज्ञताम्	११७	२३	जिज्ञासितव्यस्य
८४	२२	निर्वाच्य	१२१	१२	वृत्ति
८५	१३	नुपपन्ना			

PDF Compressor Free Version

पृ०	पं०	शुद्ध	पृ०	पं०	शुद्ध
१२२	१	प्रमातु	१५१	१४	वेदितव्यः
१२२	३	अभिप्रायक	१५२	११	उपरतस्तितिक्षुः
१२५	५	निज			समाहितो
१२६	९	सिद्धावपि	१५३	३	प्रतीतिर्भ्रम
१२८	१४	उपाधि	१५३	१३	वाधिष्ठान
१३३	१६	पासीत	१५८	८	आह
१३४	२०	भावात्	१६९	१	प्राये तु
१३५	२०	बृंहितत्व	१७१	२३	अनिर्वाच्य
१३८	११	याज्ञवल्क्य	१७२	१८	मंशस्येव
१४०	५	जाग्रत	१७२	२०	एवं
१४२	२	अतो	१७५	१७	पराहता
१४२	२	कार्य्यं	१७६	१६	मेवास्तु
१४२	१९	विज्ञातृ	१७७	६	हार्य्यम्
१४३	८	परिणामो	१७७	७	हारिकं
१४३	११	व्यवहारो	१८४	१७	औदुम्बरी
१४४	२	एकस्मिन्नेव	१८९	२	पराण्येव
१४४	१०	र्याम्येष	१८९	८	माध्वाक्षेप
१४४	१९	दिति	१८९	१७	यदकारणया
१४९	१	त्वेऽपि			

PDF Compressor Free Version

भूमिका

अद्यत्वे भारतावनौ तत्तद्देशप्रथितनानाविधसम्प्रदायवैमत्यमवेत्य क्षुब्धमनसः सुमनसोऽपि जना विचिकित्साजाले पतन्तो दुर्मनायन्ते । अल्पज्ञास्तत्तत्सम्प्रदायानुवर्तिनश्च स्वस्वाचार्यप्रवर्तितमर्यादामेव तात्त्विकीं मन्यमानास्तत्तात्त्विकत्वोपपत्तये नातियतमानाः स्वेतरमतेषु दोषहीनेष्वपि दोषानेवावभासयन्तः तत्र तत्र कलहायमाना दृश्यन्ते । तत्र च तत्तन्मतानुयायिनां शास्त्ररहस्यानभिज्ञत्वम्, दूषितसमितिसंसर्गजातविकारविशिष्टेष्टानिष्टविवेकशून्यस्वान्तत्वं चैव बीजम् । वीतरागादिदोषाणां निखिलधरामण्डलकल्याणवर्त्मोपदेष्टृणां परनिन्दने प्रायश्चित्तोपदेशकानां पूज्याचार्याणां तु नैवायमभिप्राय इति दर्शयितुम्, मध्वमताद्यनुयायिभिरद्वैतमते उत्प्रेक्षितदोषान् निराकर्तुम्, शैववैष्णवादिषु विग्रहान् निग्रहीतुम्, मिथो विरुद्धत्वेनावभासमानानां पुराणादिवाक्यानां समन्वयं संविधातुम्, अद्वैतमते सर्वसम्प्रदायानां विरोधमन्तरैव सामञ्जस्यमुपपादयितुं च कृतानुकम्पैर्निखिलदर्शनरहस्यामृतास्वादनविशुद्धस्वान्तैः, रागद्वेषादिदोषेष्वेव वैरिभावमापन्नैः, दण्डिस्वामिकरपात्रीत्यपरनामप्रसिद्धैः, सरस्वत्युपाह्वहरिहरानन्दमहात्मभिः 'समन्वयसाम्राज्यसंरक्षण' नामधेयं निबन्धनमस्मास्वनुकम्पां स्वीकृत्य निरमायि । सम्भाव्यतेऽनेन निबन्धेन सर्वमतनिन्दैव निन्द्या भवेदखिलमतानुवर्तिनामिति विज्ञापयति

विद्वद्वरानुकम्प्यः
सभापतिशर्मोपाध्यायः

PDF Compressor Free Version

८८९७

समन्वयसाम्राज्यसंरक्षणम्

श्रीहरिः शरणम्

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥

इह खलु विदितमेव विदितवेदितव्यानां यन्निखिलकल्याणगुणगणनिलयत्वेन जगदुत्पत्तिस्थितिलयलीलस्य, अचिन्त्यानन्तमहामहिमवैभवशालिनः, सकलविरुद्धधर्माश्रयस्य अत एव प्रत्यस्तमिताशेषविशेषस्य, प्रज्ञानानन्दघनस्य परमतत्त्वस्य स्वाश्रयविषयकाचिन्त्यानन्तानिर्वाच्याया अनन्तकोटिब्रह्माण्डनिदानभूतावान्तरानन्तशक्तिकेन्द्रभूताया महाशक्तेर्महिम्ना बिम्बप्रतिबिम्बतदाधारादिभावेनास्ति नास्ति, सावयवो निरवयवः, मध्यमपरिमाणो महत्परिमाणः, चेतनोऽचेतनः, भिन्नोऽभिन्नस्तदुभयात्मकः, सविशेषो निर्विशेषः, चिदचित् तदुभयात्मको वा इत्यनेकविकल्पास्पदत्वम्, अनादिकालमारभ्य अनियतकालावधिप्रवृत्तमनुबोभूयते । एवं सत्यपि सर्वविकल्पासंस्पृष्टस्वभाव एव परमार्थभूतः, परमानन्दमङ्गलमयमूर्त्यात्मना प्रादुर्भूतस्य प्रज्ञानानन्दघनस्य लीलारसविशेषविकासार्थम् अनन्यपराणामप्यन्यपरतया प्रतीयमानानाम् अवताराणां स्वस्वरूपसंविदाश्रितमायाशक्त्या स्वस्य च प्रभेदादेः कल्पनं यथा तथैव स्वतः सर्वाविशेषव्यतीतोऽपि लीलाविशेषार्थमेवाचिन्त्यानन्तशक्तिं समाश्रित्य नानाविकल्पास्पदं भवति । तस्य च मङ्गलमयी लीला काचिदपि न निष्फला भवति इति कृत्वा तत्स्थास्तल्लीलया तत्तद्वादिभिर्विकल्पिताः पक्षाः सर्वेऽपि अधिकारिभेदेन लोकस्य भगवत्सान्निध्यप्रापकत्वेन

PDF Compressor Free Version

...पकारका: । यद्यपि परस्परात्यन्तविरुद्धपक्षा एकत्रासमञ्जसा असमन्विताश्च भान्ति । यथा—देहमात्रमात्मेति लौकिका लौकायतिकाश्च, इन्द्रियाण्येवेति तद्विशेषा:, प्राणा इत्यन्ये, क्षणिकविज्ञानसन्ततिरित्यपरे, विज्ञानसन्ततिक्षयरूपं शून्यमिति शून्यवादिन:, अस्ति देहादिव्यतिरिक्त: शरीरपरिमित: सङ्कोचविकासशालीति विवसना:, ज्ञानादिगुणको विभुर्नाना इत्यन्ये, खद्योतवच्चिदचिदात्मको नाना इति मीमांसका:, असङ्गचिदात्मको नानैव इति सांख्या:, अस्ति तद्व्यतिरिक्त: कश्चिन्नित्यशुद्धबुद्धमुक्तस्वभावोऽपि इति योगिन:, परापरप्रकृतिभेदेन त्रिधा स्वतो भिन्न: तदनुरक्तियोगैकलभ्य: पर: तदुपलब्धा अण्वात्माचित्करण: स्वतस्तन्नियम्य एवेति माध्वा: । उक्तपक्षे अभेदवादिन्य: श्रुतयो निरवकाशा भवन्ति । अत: चिदचिद्विशिष्टाद्वैतमेव तत्त्वमिति अर्थात् यथा नीलोत्पलपत्रयो: शरीरशरीरिणोश्च विशेषणविशेष्यभावप्रयुक्ताभेदोऽप्यस्ति तथा चिदचिदात्मनोर्भोक्तृभोग्यवर्गयो: परमात्मना नियम्यनियन्तृत्वेन शरीरशरीरित्वेन च स्वरूपेण भिन्नत्वेऽपि अभेदव्यपदेशभाक्त्वमित्यन्यांशे पूर्वोक्तमततुल्यत्वेऽपि ईदृशाभेदांशे वैलक्षण्यमिति चिदचिद्विशिष्टाद्वैतिन: । अस्मिन्नपि सिद्धान्ते विशेषणविशेष्ययो: परमार्थतो भिन्नत्वेनाभेदासंभवात् विशिष्टाद्वैतमिति प्रयोगचातुर्यमात्रमित्यपरितुष्यन्त:, चिदचिद्भिन्नाभिन्नं परमतत्त्वमिति, अर्थात् यथा सुवर्णं कुण्डलमिति सामानाधिकरण्यात् तयोरभिन्नत्वम्, सुवर्णे विज्ञातेऽपि कुण्डलविषयिणी प्रतिपित्सा दृश्यते, पयोव्रतिभिर्दधि नोपभुज्यते, दधिव्रतिभि: पयो नोपभुज्यते, गोरसव्रतिभिस्तद्द्वयमप्युपभुज्यते, कनकतद्घटवलयार्थिनां मध्ये घटमुपमृद्य विरच्यमानं वलयं निरीक्ष्य वलयार्थी हृष्यति घटार्थी विषज्जते कनकार्थी न हृष्यति न विषज्जते,

PDF Compressor Free Version

अतः कारणात्मना अभेदः कार्यात्मना भेदः, तत्कस्य हेतोः तदधीनस्थितिप्रवृत्तिमत्त्वात् स्वरूपतो विलक्षणत्वाच्च, एवं चिदचिदात्मानौ परमेशाधीनस्थितिप्रवृत्तिमत्त्वेन परमेशाभिन्नौ स्वरूपतः कार्यकारित्ववैलक्षण्याच्च भिन्नावपि, न च तावेकत्र विरोधादसंभवौ विरोधस्यैवाभावात् सहानवस्थानलक्षणस्य विरोधस्य तत्रादर्शनात्, अस्मिंश्च पक्षे भेदवादिन्यो अभेदवादिन्यश्च श्रुतयो निरायासेन स्वार्थपर्यवसायिन्यो भविष्यन्ति इति श्रीमन्निम्बार्कानुयायिनः ॥

शुद्धाद्वैतिनस्तु तत्रापि चिदचिदात्मकस्य प्रपञ्चस्य ब्रह्मातिरिक्तत्वे अन्योन्याभावप्रतियोगित्वलक्षणवस्तुपरिच्छेदस्यानपायात् ब्रह्मणः श्रुतिशतबोधितं पूर्णत्वमपरिच्छिन्नत्वं पीड्यते इत्यपरितोषात् शुद्धाद्वैतमेव प्राहुः । तदर्थस्तु—शुद्धं च तदद्वैतम्, शुद्धयोरद्वैतमिति वा—शुद्धं मायादिसम्बन्धरहितं शुद्धयोः मायासम्बन्धरहितयोः जीवब्रह्मणोरद्वैतमिति । अस्मिन् पक्षे इयत्तानवच्छिन्नं देशकालवस्तुपरिच्छेदरहितम् अनवगाह्यमहामहिमवैभवशालित्वेन सकलविरुद्धधर्माश्रय एव ब्रह्म कामधेनुकल्पवृक्षचिन्तामणिप्रभृतिवदविकृतमेवाघटितघटनापटीयसा औत्पत्तिकेन स्वात्मयोगेन क्रीडार्थं स्वकीयं पूर्णानन्दं तिरोभाव्य जीवस्वरूपं गृह्णाति । एवं स्वस्य सच्चिदानन्देति त्र्यात्मकस्य चिदानन्दांशौ तिरोभाव्य केवलसंदशाश्रितमायाशक्त्या सर्वभवनसमर्थया जगद्रूपेण प्रतीयते । यदा तु किञ्चित्तिरोहितानन्दांशस्तदा अक्षरब्रह्मरूपेण परिणमते । अतिरोहितपूर्णानन्दांशश्च पुरुषोत्तमरूपेण प्रादुर्भवति । घनीभूता प्रथमेच्छा च माया भवति । कामधेनुकल्पवृक्षोर्णनाभचिन्तामण्यादय

PDF Compressor Free Version

इवाविकृतं सदेव निर्गुणं सच्चिदानन्दं ब्रह्म सर्वरूपेण विपरिणमते। अनवगाह्यमाहात्म्ये च तस्मिन् निखिलविरोधधर्मवत्त्वं भूषणमेव न तु दूषणम् । 'एकं सद्विप्रा बहुधा' इत्यादिश्रुतयः सम्यगस्मिन् पक्षे आञ्जस्येन संगच्छन्ते । स्वतन्त्रब्रह्मणो मूलेच्छया अविकृतसदंशाज्जडनिर्गमनम् । अविकृतचिदंशाज्जीवनिर्गमनम् । जडनिर्गमनसमये चिदानन्दांशयोर्द्वयोरपि तिरोभावः । जीवनिर्गमनसमये केवलस्यानन्दस्यैव तिरोभावः । अंशांशिभावादिना जीवब्रह्मणोरभेदो जगद्ब्रह्मणोरभेदश्चास्मिन् पक्षे सिद्ध्यति । अद्वैतवादिनस्तु अघटितघटनाचतुरम् आत्मयोगादिशब्दितम् अनिर्वचनीयं तत्त्वान्तरमभ्युपगत्य सर्वेषां पक्षाणां सामञ्जस्यमुपपादयन्ति । अत्रायभिसंधिस्तेषाम्— ब्रह्मणः पूर्णतासिद्धये देशादिपरिच्छेदत्रयशून्यत्वमवश्यमङ्गीकरणीयम् । परं पूर्वे पक्षाः सर्वथा निरालम्बना इत्यपि न वक्तुं युज्यते । अतः अचिन्त्यानिर्वाच्यस्वात्मवैभवेनोपपादनीयाः सर्वे पक्षाः । स चात्मयोगः सन् असन् वा । नान्त्यः, जगदाद्यात्मना ब्रह्मविकासनिमित्तत्वानुपपत्तेः । आद्येऽपि सच्चिदानन्दात्मकान्मूलब्रह्मणो भिन्नोऽभिन्नो वा, भिन्नश्चेदद्वैतव्याहतिः ; अभिन्नश्चेत् ब्रह्मवदेवाविकृतस्य परिणामनिमित्तत्वायोगः । किञ्च निरवयवस्य ब्रह्मणो जगदुपादानत्वे कृत्स्नस्य ब्रह्मणो जगदाकारेण परिणतत्वान्मुक्तोपसृप्यं रूपमपि नावशिष्यते । अंशतः परिणतौ निरवयवत्वव्याकोपश्चापरिहार्यः स्यात् । न च श्रुत्यैव तदेकसमाधिगम्यस्य निरवयवत्वं जगदुपादानत्वं च निर्दिश्यत इति सर्वभवनसमर्थे वादिनां विवदनावसरे 'श्रुतेस्तु शब्दमूलत्वात्' इति बादरायणेनापि तदेव समर्थ्यत इति वाच्यम्, तथा सति शास्त्रस्याकृतकर्तृत्वापत्तेः।

PDF Compressor Free Version

अनधिगतगमकं तु शास्त्रम्, न अकृतकर्तृ । न हि शब्दशतमपि घटं पटयितुमीष्टे । अन्यथा 'दृश्यते जलचन्द्रवत्' 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्' इत्यादिवचन-सिद्धप्रतिबिम्बवादोऽनतिशङ्कनीयः स्यात् । त्वन्मते वैष्णवभाष्य-काराणां च मते 'अम्बुवदग्रहणात्तु न तथात्वम्' इति सूत्रमपि निरालम्बनं स्यात् । यतोऽत्रापि प्रतिबिम्बवादः शास्त्र-बोधित एवेत्यनाशङ्कनीयत्वेन निरनुयोज्य एव स्यात् । तस्मात् यद्यपि 'वेदैश्च सर्वैरहमेव वेद्यः', 'सर्वे वेदा यत्पद-मामनन्ति' इत्यादिश्रुतिभिः शास्त्राणां परमतात्पर्यम् 'एकमेवाद्वितीयम्' इत्यादिश्रुतिशतबोधितसजातीयविजातीय-स्वगतभेदशून्ये पूर्णप्रज्ञानानन्दघनपरमात्मन्येव, तथाप्यवान्तर-तात्पर्यं पारमार्थिकसत्तापेक्षया किञ्चिन्न्यूनसत्ताके अर्थात् अपरिच्छिन्नपूर्णप्रज्ञानानन्दपरमतत्त्वापेक्षया किञ्चिन्न्यूनसत्ताके अघटितघटनापटीयसि भगवदीयस्वात्मवैभवे तदीयविकास-निमित्तविविधवैचित्र्योपेतविश्वजनीनानुभवनिवेदितविश्वव्यवहारोप-युक्तसर्वतन्त्रसिद्धान्तसिद्धपदार्थेष्वपि च विद्यत एव । एकत्र समानसत्तया भिन्नत्वाभिन्नत्वसत्त्वासत्त्वविकृतत्वाविकृत-त्वादीनां सामञ्जस्ये विरोधमात्रस्य दत्तजलाञ्जलिता प्रसज्यते । यद्यपि वाचारम्भणश्रुत्या अन्वयव्यतिरेकादियुक्त्या च न तन्तुव्यतिरिक्तः पटः, किं तु आतानवितानात्मकास्तन्तव एव पटः, तथापि अङ्गप्रावरणशीतापनयनादिकार्यकारित्वं पट एव, न तन्तुषु, अतो विलक्षणार्थक्रियाकारित्वेन सर्वथा अभिन्नः स्वकारणादिति न वक्तुं शक्यते । भेदाभेदौ चैकत्र समानसत्तया न वक्तुं शक्येते, अतो विषमसत्ताकयोरेव भेदाभेदयोः सामञ्जस्येन भाव्यम् ।

PDF Compressor Free Version

शाक्ताद्वैतिभिस्तु यद्यपि चिदात्मकस्य शिवस्यैव तात्त्विकत्वम्, प्रपञ्चस्य तु शिवस्वभावभूतशक्तिविकासभूतस्यासत्त्वमेवाभ्युपगम्यते, शक्तेश्च शिवस्वभावत्वादेव तदभिन्नत्वमिति, तथापि विमर्शात्मकस्य शक्तितत्त्वस्य प्रकाशात्मकशिवतत्त्वेनात्यन्ताभिन्नत्वे तद्वदेव कूटस्थत्वेनाविकारित्वात् प्रपञ्चनिर्माणपटीयस्त्वं नोपपद्यते। भिन्नत्वे चाद्वितीयत्वोक्तिर्व्याहन्यते, तस्मादकामेनापि शक्तेरनिर्वाच्यत्वमभ्युपगन्तव्यम्। न च शक्तितत्कार्यात्मकस्य प्रपञ्चस्यानिर्वचनीयत्वे सतो विलक्षणत्वे मानाभाव इति भ्रमितव्यम्, प्रमाणत्रयस्य वक्ष्यमाणत्वात्। किञ्च सर्वैरास्तिकैर्जीवजगदपेक्षया भगवतो वैलक्षण्यमभ्युपेयते। परस्य नित्यशुद्धबुद्धमुक्तस्वभावत्वमितरस्य तु सुखदुःखाद्यनेकानर्थपरिप्लुतत्वं स्वरूपतो वैलक्षण्यं यथा प्रमाणबलादभ्युपेयते, तथैव सत्तयापि वैलक्षण्यमभ्युपेयम्। एवं यद्यपि सर्वे पक्षा यथायथमनिर्वाच्याचिन्त्यानन्तशक्तिमति मनोवचनातीते परस्मिन्नन्तर्भवन्ति, तथापि जन्मान्धा गजस्वरूपमिवांशतः प्रगृह्य परस्परं विवदन्ते। यथा कश्चिदन्धः स्तम्भवद्गजः, कश्चिच्छूर्पवत्, कश्चिल्लगुडादिवत्, कश्चित् पर्वतकूटवत् इत्येवं विवदन्ते। 'प्रमाणं परमं श्रुतिः' इत्युद्घुष्यतां वैदिकानामपि यदा प्रधानांशे तदितरांशेऽपि बाह्यापेक्षयाप्यधिकसंघर्षो दृश्यते, तदा नियमितशृङ्खलासंसर्गशून्यत्वेन परस्परं स्वतन्त्रविचारपद्धतिं समाश्रित्य तत्त्वनिर्णिनीषूणां संघर्षो युज्यत एव। परमेवं सत्यपि सर्वे सिद्धान्ताः सर्वांशतो भ्रममूलकत्वेनानिष्टप्रदा आहोस्वित् सर्व एव प्रमामूलकत्वेनेष्टप्रदा इति निर्णेतुं न प्रभवति सहसा कश्चन। यद्यपि स्वसिद्धान्त एव सर्वतः प्रमामूलकत्वेन ज्यायान्, इतरे तु भ्रममूलकाः परमपुरुषार्थप्रच्युतिहेतव इति स्वगोष्ठीसिद्धसिद्धान्ताभिमानिनोऽपि

PDF Compressor Free Version

नाल्पीयांसः, तथापि सूक्ष्मचेतसां चेतसि नैतच्चमत्कृतिमादधाति। एतेषां वादिनां केचित्तु सिद्धान्तांशे विवदमाना अपि प्राधान्येन स्वाभिमततत्त्वप्राप्त्यर्थमेव प्रयत्नातिशये प्रवृत्ता भवन्ति। अतस्तेषामन्तः शिष्टजनसमितिन्यक्कृतस्यासुरभावस्य समावेशो न भवति। केषांचित्तु सिद्धान्ते, स्वाभिमततत्त्वप्राप्त्यनुकूलसाधने वा न तादृशः प्रयत्नो भवति, यादृशः परकीयाचार्यतदुपास्योपासनाप्रकारादिनिन्दने। एते महानुभावाः साम्प्रतमपि स्वकीयवैभवेन महीमलंकुर्वन्ति, यदा 'सङ्घे शक्तिः कलौ युगे' इत्युक्तिमनुसृत्य न केवलं वर्णाश्रमिणः, अपि तु बाह्या अपि सामान्यधर्मानुष्ठाने वैमत्यमपहाय स्वस्वधर्मनिरताः कार्यक्षेत्रे समुत्तीर्णा दृश्यन्ते। शास्त्रीयतात्पर्यपरिशीलनसंस्कृतशेमुषीकाणामुदारचेतसां विदुषां प्रयासप्रभावान्मनःकल्पनातीतं समुदितसकलधर्माचार्याणामेकसमितिस्थानां दर्शनम्, सकलजनसाधारणनयनानन्दकरं च सम्पन्नम्। तदापि कलहबीजारोपणैकबद्धपरिकराः श्रीसत्यध्यानतीर्थमुनीन्द्रा अपि तेष्वन्यतमा इति नास्ति तिरोहितं विपश्चिताम्। एते च महाभागाः साम्प्रतं वक्ष्यमाणप्रकारेण स्वसिद्धान्तस्यैव वैदिकत्वं परमानन्दादिविशेषितपरपदप्राप्तिहेतुत्वं श्रीमच्छंकरभगवत्पादस्य प्रच्छन्नबौद्धत्वं शून्यवादित्वमद्वैतस्यावैदिकत्वं भस्मत्रिपुण्ड्रधारिणां नरकगामित्वं च साधयितुं गृहीतदीक्षाः स्वकीयबहुधनव्ययेनापि प्रतिमासं निन्दापूर्णनिर्मूल्यपुस्तकवितरणादिना व्रतपूर्त्यर्थं प्रयतमाना दृष्टिपथमलंकुर्वन्ति। सभाग्याः कृतकृत्याश्च भारतीया भविष्यन्त्येतादृशैर्धर्माचार्यैरिति को नाम नाशास्ते। ते खलु श्रीमन्नारायणस्यैव परात् परतत्त्वं शिवब्रह्मानाम नाशास्ते। ते खलु श्रीमन्नारायणस्यैव परात् परतत्त्वं शिवब्रह्मादीनामुपास्यत्वं शिवस्य चोपासकत्वमेवाभ्युपगच्छन्ति। तथा च प्रतिपादितं श्रीनृसिंहाचार्यैः अद्वैतिकपोलचपेटिकायाम्, नृसिंहतापनीयोप-

PDF Compressor Free Version

शाक्ताद्वैतिभिस्तु यद्यपि चिदात्मकस्य शिवस्यैव तात्त्विकत्वम्, प्रपञ्चस्य तु शिवस्वभावभूतशक्तिविकासभूतस्यासत्त्वमेवाभ्युपगम्यते, शक्तेश्च शिवस्वभावत्वादेव तदभिन्नत्वमिति, तथापि विमर्शात्मकस्य शक्तितत्त्वस्य प्रकाशात्मकशिवतत्त्वेनात्यन्ताभिन्नत्वे तद्वदेव कूटस्थत्वेनाविकारित्वात् प्रपञ्चनिर्माणपटीयस्त्वं नोपपद्यते । भिन्नत्वे चाद्वितीयत्वोक्तिर्व्याहन्यते, तस्मादकामेनापि शक्तेरनिर्वाच्यत्वमभ्युपगन्तव्यम् । न च शक्तितत्कार्यात्मकस्य प्रपञ्चस्यानिर्वचनीयत्वे सतो विलक्षणत्वे मानाभाव इति भ्रमितव्यम्, प्रमाणत्रयस्य वक्ष्यमाणत्वात् । किञ्च सर्वैरास्तिकैर्जीवजगदपेक्षया भगवतो वैलक्षण्यमभ्युपेयते । परस्य नित्यशुद्धबुद्धमुक्तस्वभावत्वमितरस्य तु सुखदुःखाद्यनेकानर्थपरिप्लुतत्वं स्वरूपतो वैलक्षण्यं यथा प्रमाणबलादभ्युपेयते, तथैव सत्तयापि वैलक्षण्यमभ्युपेयम् । एवं यद्यपि सर्वे पक्षा यथायथमनिर्वाच्याचिन्त्यानन्तशक्तिमति मनोवचनातीते परस्मिन्नन्तर्भवन्ति, तथापि जन्मान्धा गजस्वरूपमिवांशतः प्रगृह्य परस्परं विवदन्ते । यथा कश्चिदन्धः स्तम्भवद्गजः, कश्चिच्छूर्पवत्, कश्चिल्लगुडादिवत्, कश्चित् पर्वतकूटवत् इत्येवं विवदन्ते । 'प्रमाणं परमं श्रुतिः' इत्युद्घुष्यतां वैदिकानामपि यदा प्रधानांशे तदितरांशेऽपि बाह्यापेक्षयाप्यधिकसंघर्षो दृश्यते, तदा नियमितशृङ्खलासंसर्गशून्यत्वेन परस्परं स्वतन्त्रविचारपद्धतिं समाश्रित्य तत्त्वनिर्णिनीषूणां संघर्षो युज्यत एव । परमेवं सत्यपि सर्वे सिद्धान्ताः सर्वांशतो भ्रममूलकत्वेनानिष्टप्रदा आहोस्वित् सर्व एव प्रमामूलकत्वेनेष्टप्रदा इति निर्णेतुं न प्रभवति सहसा कश्चन । यद्यपि स्वसिद्धान्त एव सर्वतः प्रमामूलकत्वेन ज्यायान्, इतरे तु भ्रममूलकाः परमपुरुषार्थप्रच्युतिहेतव इति स्वगोष्ठीसिद्धासिद्धान्ताभिमानिनोऽपि

PDF Compressor Free Version

नाल्पीयांसः, तथापि सूक्ष्मचेतसां चेतसि नैतच्चमत्कृतिमादधाति । एतेषां वादिनां केचित्तु सिद्धान्तांशे विवदमाना अपि प्राधान्येन स्वाभिमततत्त्वप्राप्त्यर्थमेव प्रयत्नातिशये प्रवृत्ता भवन्ति । अतस्तेषामन्तः शिष्टजनसमितिन्यक्कृतस्यासुरभावस्य समावेशो न भवति । केषांचित्तु सिद्धान्ते, स्वाभिमततत्त्वप्राप्त्यनुकूलसाधने वा न तादृशः प्रयत्नो भवति, यादृशः परकीयाचार्यतदुपास्योपासनाप्रकारादिनिन्दने । एते महानुभावाः साम्प्रतमपि स्वकीयवैभवेन महीमलंकुर्वन्ति, यदा 'सङ्घे शक्तिः कलौ युगे' इत्युक्तिमनुसृत्य न केवलं वर्णाश्रमिणः, अपि तु बाह्या अपि सामान्यधर्मानुष्ठाने वैमत्यमपहाय स्वस्वधर्मनिरताः कार्यक्षेत्रे समुत्तीर्णा दृश्यन्ते । शास्त्रीयतात्पर्यपरिशीलनसंस्कृतशेमुषीकाणामुदारचेतसां विदुषां प्रयासप्रभावान्मनःकल्पनातीतं समुदितसकलधर्माचार्याणामेकसमितिस्थानां दर्शनम्, सकलजनसाधारणनयनानन्दकरं च सम्पन्नम् । तदापि कलहबीजारोपणैकबद्धपरिकराः श्रीसत्यध्यानतीर्थमुनीन्द्रा अपि तेष्वन्यतमा इति नास्ति तिरोहितं विपश्चिताम् । एते च महाभागाः साम्प्रतं वक्ष्यमाणप्रकारेण स्वसिद्धान्तस्यैव वैदिकत्वं परमानन्दादिविशेषितपरपदप्राप्तिहेतुत्वं श्रीमच्छंकरभगवत्पादस्य प्रच्छन्नबौद्धत्वं शून्यवादित्वमद्वैतस्यावैदिकत्वं भस्मत्रिपुण्ड्रधारिणां नरकगामित्वं च साधयितुं गृहीतदीक्षाः स्वकीयबहुधनव्ययेनापि प्रतिमासं निन्दापूर्णनिर्मूल्यपुस्तकवितरणादिना व्रतपूर्त्यर्थं प्रयतमाना दृष्टिपथमलंकुर्वन्ति । सभाग्याः कृतकृत्याश्च भारतीया भविष्यन्त्येतादृशैर्धर्माचार्यैरिति को नाम नाशास्ते । ते खलु श्रीमन्नारायणस्यैव परात् परतत्त्वं शिवब्रह्माद्याराध्यत्वं शिवस्य चोपासकत्वमेवाभ्युपगच्छन्ति । तथा च प्रतिपादितं श्रीनृसिंहाचार्यैः अद्वैतिकपोलचपेटिकायाम्, नृसिंहतापनीयोप-

PDF Compressor Free Version

नाल्पीयांसः, तथापि सूक्ष्मचेतसां चेतसि नैतच्चमत्कृतिमादधाति । एतेषां वादिनां केचित्तु सिद्धान्तांशे विवदमाना अपि प्राधान्येन स्वाभिमततत्त्वप्राप्त्यर्थमेव प्रयत्नातिशये प्रवृत्ता भवन्ति । अतस्तेषामन्तः शिष्टजनसमितिन्यक्कृतस्यासुरभावस्य समावेशो न भवति । केषांचित्तु सिद्धान्ते, स्वाभिमततत्त्वप्राप्त्यनुकूलसाधने वा न तादृशः प्रयत्नो भवति, यादृशः परकीयाचार्यतदुपास्योपासनाप्रकारादिनिन्दने । एते महानुभावाः साम्प्रतमपि स्वकीयवैभवेन महीमलंकुर्वन्ति, यदा 'सङ्घे शक्तिः कलौ युगे' इत्युक्तिमनुसृत्य न केवलं वर्णाश्रमिणः, अपि तु बाह्या अपि सामान्यधर्मानुष्ठाने वैमत्यमपहाय स्वस्वधर्मनिरताः कार्यक्षेत्रे समुत्तीर्णा दृश्यन्ते । शास्त्रीयतात्पर्यपरिशीलनसंस्कृतशेमुषीकाणामुदारचेतसां विदुषां प्रयासप्रभावान्मनःकल्पनातीतं समुदितसकलधर्माचार्याणामेकसमितिस्थानां दर्शनम्, सकलजनसाधारणनयनानन्दकरं च सम्पन्नम् । तदापि कलहबीजारोपणैकबद्धपरिकराः श्रीसत्यध्यानतीर्थमुनीन्द्रा अपि तेष्वन्यतमा इति नास्ति तिरोहितं विपश्चिताम् । एते च महाभागाः साम्प्रतं वक्ष्यमाणप्रकारेण स्वसिद्धान्तस्यैव वैदिकत्वं परमानन्दादिविशेषितपरपदप्राप्तिहेतुत्वं श्रीमच्छंकरभगवत्पादस्य प्रच्छन्नबौद्धत्वं शून्यवादित्वमद्वैतस्यावैदिकत्वं भस्मत्रिपुण्ड्रधारिणां नरकगामित्वं च साधयितुं गृहीतदीक्षाः स्वकीयबहुधनव्ययेनापि प्रतिमासं निन्दापूर्णनिर्मूल्यपुस्तकवितरणादिना व्रतपूर्त्यर्थं प्रयतमाना दृष्टिपथमलंकुर्वन्ति । सभाग्याः कृतकृत्याश्च भारतीया भविष्यन्त्येतादृशैर्धर्माचार्यैरिति को नाम नाशास्ते । ते खलु श्रीमन्नारायणस्यैव परात् परतत्त्वं शिवब्रह्माद्याराध्यत्वं शिवस्य चोपासकत्वमेवाभ्युपगच्छन्ति । तथा च प्रतिपादितं श्रीनृसिंहाचार्यैः अद्वैतिकपोलचपेटिकायाम्, नृसिंहतापनीयोप-

PDF Compressor Free Version

निषदि 'नृसिंहं भीषणं भद्रम्' इति मन्त्रस्य भीषणपदार्थकथनप्रसङ्गे "अथ कस्मादुच्यते भीषणमिति यस्माद्यस्य रूपं दृष्ट्वा सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि भीत्या पलायन्ते, स्वयं यतः कुतश्चिन्न बिभेति 'भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः' । तस्मादुच्यते भीषणम्" इत्यादिवाक्यैः, तथैतच्छांकरभाष्यगतैः 'तेजोराशियुक्तमप्रधृष्यतेजोमयरूपं दृष्ट्वा सर्वे देवास्तदङ्गद्युनिवासिनः वसुरुद्रादित्याः सर्वाणि भूतानि इमानि भीत्या पलायन्ते पलायनं कुर्वन्ति स्वयं देवो यस्मात् कस्मादपि न बिभेति निरतिशयाभयगुणविशिष्टः उपास्योभयगुणमुखेन सर्वेषां ब्रह्मादीनाम्' इत्यादिवचनैश्च । तथा भ्रान्तिप्रकाशे—

यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः ।
न चैनमेवं जानन्ति तमोभूता विशां पते ॥
तिस्रः प्रकृतयो राजन् देहबन्धेषु निर्मिताः ।
सात्त्विकी राजसी चैव तामसी चैव भारत ॥
सात्त्विकः पुरुषव्याघ्र भवेन्मोक्षाय निश्चितः ।
अत्रापि तद्विजानाति पुरुषं ब्रह्मवित्तमः ॥
नारायणं परं मोक्षे ततो वै सात्त्विकः स्मृतः ।
राजसी तामसी चैव व्यामिश्रे प्रकृती स्मृते ॥
तदात्मकं हि पुरुषं जायमानं विशां पते ।
प्रवृत्तिलक्षणैर्युक्तं नावेक्षति हरिः स्वयम् ॥
पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः ।
तामसा निरयं यान्ति राजसा मानुषा न च ॥
सात्त्विका देवलोकाय गच्छन्ति सुखभागिनः ।

PDF Compressor Free Version

येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः ॥
नारायणाज्जगन्नाथात्ते वै पाखण्डिनस्तथा ।
कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः ॥
ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः ।
अवैदिकक्रियोपेतास्ते वै पाखण्डिनस्तथा ॥
शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः ।
रहिता ये द्विजा देवि ते वै पाखण्डिनः स्मृताः ॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव वीक्षेत स पाखण्डी भवेत् सदा ॥
किमत्र बहुनोक्तेन ब्राह्मणा येऽप्यवैष्णवाः ।
न स्प्रष्टव्या न वक्तव्या न द्रष्टव्या कदाचन ॥
अहो भगवतः श्रैष्ठ्यं यन्मायामोहितं जगत् ।
अहो वेदान्तविदुषः सर्वलोकेषु पूजिताः ॥
ब्राह्मणा अपि चापल्याद्वदन्त्येवं मदान्विताः ।
नारायणं परं ब्रह्म तत्त्वं नारायणः परम् ॥
तेनैव सृष्टौ ब्रह्मेशौ सर्वदेवोत्तमावुभौ ।
तस्यैवाज्ञां पुरस्कृत्य वर्तेते ब्रह्मशङ्करौ ॥
तं सर्वरक्षकं देवं त्यक्त्वा सर्वेश्वरं हरिम् ।
कथं पाखण्डमाश्रित्य पूजयामि च शङ्करम् ॥
स एव रक्षकः श्रीशो देवानामपि सर्वदा ।
तमेव पूजयिष्यामि लक्ष्म्या संयुतमीश्वरम् ॥
प्राप्स्यामि सुसुखेनैव तद्विष्णोः परमं पदम् । — इति ।

रुद्रस्य भस्मधारणादि असुरजनमोहनार्थमित्युक्तम् —

कपालभस्मचर्मास्थिधारणं श्रुतिगर्हितम् ।
त्वया धार्यते देव गर्हितं केन हेतुना ॥

PDF Compressor Free Version

नमुच्याद्या महादैत्याः पुरा स्वायंभुवेऽन्तरे ।
महाबला महावीर्या महावीरा महौजसः ॥
सर्वे विष्णुरताः शुद्धाः सर्वपापविवर्जिताः ।
त्रयीधर्मयुताः सर्वे भग्ना इन्द्रपुरोगमाः ॥
विष्णोः समीपमागम्य भयार्ताः शरणं गताः ।
अजेयान् सर्वदेवानां तपोनिर्धूतकल्मषान् ॥
त्वमेवैतान् महादैत्याञ्जेतुमर्हसि केशव ।
इत्याकर्ण्य हरिर्वाक्यं देवानां च भयानकम् ॥
तानवध्यान् विदित्वाथ मामाह पुरुषोत्तमः ।
त्वं हि रुद्र महाबाहो मोहनार्थं सुरद्विषाम् ॥
पाखण्डाचरणं धर्मं कुरुष्व सुरसत्तम ।
कपालभस्मचर्मास्थिचिह्नान्यपि हि सर्वशः ॥
त्वमेव धृतवान् लोकान् मोहयस्व जगत्त्रये ।
अवलक्ष्य मतं सम्यग्वेदबाह्यं द्विजाधमाः ॥
भस्मास्थिधारिणः सर्वे भविष्यन्ति न संशयः ।
त्वां परत्वेन वक्ष्यन्ति सर्वशास्त्रेषु तामसाः ॥
तेषां मतमधिष्ठाय सर्वे दैत्याः सनातनाः ।
भवेयुस्ते मद्विमुखाः क्षणादेव न संशयः ॥
अहमप्यवतारेषु त्वां हि रुद्र महाबल ।
तामसानां मोहनार्थं पूजयामि युगे युगे ॥
मतमेतदवष्टभ्य पतन्त्येव न संशयः ।

विष्णो रुद्रपूजनं तामसासुरमोहनायेत्युक्तम् । तामसशास्त्रनिर्माणं तामसानाम् अधमा गतिश्चोक्ता ।

ऊर्ध्वपुण्ड्रविहीनस्तु किञ्चित् कर्म करोति यः ॥
निष्फलं कर्म तत्तस्य सत्यमेतन्मयोच्यते ।

PDF Compressor Free Version

यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रविनाकृतम् ॥
तद्दर्शनं न कर्तव्यं दृष्ट्वा सूर्यं निरीक्षयेत् ।

इत्यादिभिः श्रीमन्नारायणस्यैव परतरत्वं परमाराध्यत्वं तदुपासकस्योर्ध्वपुण्ड्रतप्तचक्रादिधारणेन तत्कृपया परमपदप्राप्तिरितरेषां तामसराजसदेवोपासकानां भस्मत्रिपुण्ड्रादिधारिणां निरयश्चेति सम्यक् प्रतिपादितम् ॥

अस्मिंश्च पक्षे 'शान्तं शिवमद्वैतम्' इत्यादिश्रौतशिवशब्दस्य नारायणपरत्वमेव । न चैवं नारायणशब्दस्यैव जीवसमूहस्य अयनं प्रवृत्तिर्यस्मात्, नारम् अयते जानाति इत्यादिव्युत्पत्तिबलात् शिवपरत्वमिति वाच्यम्, 'पूर्वपदात् संज्ञायाम्' इति संज्ञायामेव णत्वविधानात् तदनुपपत्तेः ॥

भस्मरुद्राक्षादिमाहात्म्यावद्योतकश्रुतिस्मृतिपुराणादिवचनानाम् तन्मतेऽसत्त्वमेव, सत्त्वेऽपि प्रक्षिप्तत्वादिना प्रामाण्याभावः । 'त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्, प्रसघभस्मना योनिमपश्च पृथिवीमग्ने' इत्यादिभिरपि विधिबोधकपदाभावात्, तदनुमापकलिङ्गस्य चाभावात् भस्मधारणकर्तव्यताबोधनं मूढजनप्रतारणमेव ॥

अत्र शैवाः शिव एव श्रुतिस्मृतिपुराणादिसकलशास्त्रपरमतात्पर्यविषय इत्यभ्युपगच्छन्ति, तस्यैव च सर्वनियन्तृत्वं सुप्रसिद्धं शरभोपनिषदि—

प्रभुं वरेण्यं पितरं महेशं
यो ब्रह्माणं विदधाति तस्मै ।

PDF Compressor Free Version

वेदांश्च सर्वान् प्रहिणोति चाग्र्यं
तं वै प्रभुं पितरं देवतानाम् ॥
ममापि विष्णोर्जनकं देवमीड्यं
योऽन्तकाले सर्वलोकान् सञ्जहार ।
स एकः श्रेष्ठश्च सर्वशास्ता स एव
वरिष्ठश्च ॥
यो घोरं वेषमास्थाय शरभाख्यं महेश्वरः ।
नृसिंहं लोकहन्तारं तं जघान महाबलः ॥
हरिं हरन्तं पादाभ्यामनुयान्ति सुरेश्वराः ।
मा वधीः पुरुषं विष्णुं विक्रमस्व महानसि ॥
कृपया भगवान् विष्णुं विददार नखैः खरैः ।
चर्माम्बरो महावीरो वीरभद्रो बभूव ह ॥
स एको रुद्रो ध्येयः सर्वेषां सर्वसिद्धये ।
यो ब्रह्मणः पञ्चवक्त्रहन्ता तस्मै रुद्राय नमोऽस्तु ॥
एवं मन्त्रैः प्रार्थ्यमान आत्मा वै सर्वदेहिनाम् ।
शङ्करो भगवनाद्यो ररक्ष सकलाः प्रजाः ॥
यत्पादाम्भोरुहद्वन्द्वं मृग्यते विष्णुना सह ।
स्तुत्वा स्तुत्यं महेशानमवाङ्मनसगोचरम् ॥
भक्त्या नम्रतनोर्विष्णोः प्रसादमकरोद्विभुः ।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥
आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन । — इति ॥
अणोरणीयान् महतो महीया-
नात्मास्य जन्तोर्निहितो गुहायाम् ॥
तमक्रतुं पश्यति वीतशोको
धातुप्रसादान्महिमानमीशम् ।

PDF Compressor Free Version

वसिष्ठवैयासकिवामदेव-
विरञ्चिमुख्यैर्हृदि भाव्यमानः ।
सनत्सुजातादिसनातनाद्यै-
रीड्यो महेशो भगवानादिदेवः ॥

सत्यो नित्यः सर्वसाक्षी महेशो
नित्यानन्दो निर्विकल्पो निराख्यः ।
अचिन्त्यशक्तिर्भगवान् गिरीशः
स्वविद्यया कल्पितमानभूमिः ॥

इत्यादि ।

एक एव शिवो नित्यस्ततोऽन्यत् सकलं मृषा ।
तस्मात् सर्वान् परित्यज्य ध्येयान् विष्णवादिकान् सुरान् ॥
शिव एव सदा ध्येयः सर्वसंसरमोचकः ।
तस्मै महाग्रासाय महेश्वराय नमो नमः ॥

श्रीमन्महाभारते शान्तिपर्वणि च शिवस्यैव परत्वं श्रीमन्नारायणादिसमर्चितत्वं च दृश्यते । तथा हि—

युधिष्ठिर उवाच—

त्वयापगेय नामानि श्रुतानीह जगत्पतेः ॥
पितामहेशाय विभो नामान्याचक्ष्व शम्भवे ॥
बभ्रवे विश्वरूपाय महाभाग्यं च तत्त्वतः ।
सुरासुरगुरौ देवे शङ्करेऽव्यक्तयोनये ॥

भीष्म उवाच—

अशक्तोऽहं गुणान् वक्तुं महादेवस्य धीमतः ।
यो हि सर्वगतो देवो न च सर्वत्र दृश्यते ॥

PDF Compressor Free Version

ब्रह्मविष्णुसुरेशानां स्रष्टा च प्रभुरेव च ।
ब्रह्मादयः पिशाचान्ता यं हि देवा उपासते ॥
प्रकृतीनां परत्वेन पुरुषस्य च यः परः ।
चिन्त्यते यो योगविद्भिर्ऋषिभिस्तत्त्वदर्शिभिः ॥
अक्षरं परमं ब्रह्म असच्च सदसच्च यः ॥
प्रकृतिं पुरुषं चैव क्षोभयित्वा स्वतेजसा ।
ब्रह्माणमसृजत्तस्माद्देवदेवः प्रजापतिः ॥
को हि शक्तो गुणान् वक्तुं देवदेवस्य धीमतः ।
गर्भजन्मजरामुक्तो मर्त्यो मृत्युसमन्वितः ॥
क हि शक्तो भवं ज्ञातुं मद्विधः परमेश्वरम् ।
ऋते नारायणात् पुत्र शङ्खचक्रगदाधरात् ॥
एष विद्वान् गुणश्रेष्ठो विष्णुः परमदुर्जयः ।
दिव्यचक्षुर्महातेजा वीक्षते योगचक्षुषा ॥
रुद्रभक्त्या तु कृष्णेन जगद्व्याप्तं महात्मना ।
तं प्रसाद्य तदा देवं बदर्यां किल भारत ॥
अर्थात् प्रियतरत्वं च सर्वलोकेषु वै तदा ।
प्राप्तवानेव राजेन्द्र सुवर्णाक्षान्महेश्वरात् ॥
पूर्णं वर्षसहस्रं तु तप्तवानेष माधवः ।
प्रसाद्य वरदं देवं चराचरगुरुं शिवम् ॥
युगे युगे तु कृष्णेन तोषितो वै महेश्वरः ।
भक्त्या परमया चैव प्रीतश्चैव महात्मनः ॥
ऐश्वर्यं यादृशं तस्य जगद्योनेर्महात्मनः ।
तदयं दृष्टवान् साक्षात् पुत्रार्थे हरिरच्युतः ॥
यस्मात् परतरं चैव नान्यं पश्यामि भारत ।
व्याख्यातु देवदेवस्य शक्त्या नामान्यशेषतः ॥

PDF Compressor Free Version

एष शक्तो महाबाहुर्वक्तुं भगवतो गुणान् ।
विभूतिं चैव कार्त्स्न्येन सत्यां माहेश्वरीं नृप ॥

वैशम्पायन उवाच—

एवमुक्त्वा तदा भीष्मो वासुदेवं महायशाः ।
भवमाहात्म्यसंयुक्तमिदमाह पितामहः ॥

भीष्म उवाच—

सुरासुरगुरो देव विष्णो त्वं वक्तुमर्हसि ।
शिवाय विष्णुरूपाय यन्मां पृच्छ युधिष्ठिर ॥
नाम्नां सहस्रं देवस्य तण्डिना ब्रह्मयोनिना ।
निवेदितं ब्रह्मलोके ब्रह्मणो यत्पुराभवत् ॥
द्वैपायनप्रभृतयस्तथा चेमे तपोधनाः ।
ऋषयः सुव्रता दान्ताः शृण्वन्तु गदतस्तव ॥
ध्रुवाय नन्दिने होत्रे गोप्त्रे विश्वसृजेऽग्नये ।
महाभाग्यं विभो ब्रूहि मुण्डितेऽथ कपर्दिने ॥

वासुदेव उवाच—

न गतिः कर्मणां शक्या वेत्तुमीशस्य तत्त्वतः ।
हिरण्यगर्भप्रमुखा देवाः सेन्द्रा महर्षयः ॥
न विदुर्यस्य भवनमादित्याः सूक्ष्मदर्शिनः ।
स कथं नरमात्रेण शक्यो ज्ञातुं सतां गतिः ॥
तस्याहमसुरघ्नस्य कांश्चिद्भगवतो गुणान् ।
भवतां कीर्तयिष्यामि व्रतेशाय यथातथम् ॥

वैशम्पायन उवाच—

एवमुक्त्वा तु भगवान् गुणांस्तस्य महात्मनः ।
उपस्पृश्य शुचिर्भूत्वा कथयामास धीमतः ॥

PDF Compressor Free Version

वासुदेव उवाच—

शुश्रूषध्वं ब्राह्मणेन्द्रास्त्वं च तात युधिष्ठिर ।
त्वं चापगेय नामानि शृणुष्वेह कपर्दिने ॥
यदवाप्तं च मे पूर्वं साम्बहेतोः सदुष्करम् ।
यथावद्भगवान् दृष्टो मया पूर्वं समाधिना ॥
शम्बरे निहते पूर्वं रौक्मिणेयेन धीमता ।
अतीते द्वादशे वर्षे जाम्बवत्यब्रवीद्धि माम् ॥
प्रद्युम्नचारुगेष्णादीन् रुक्मिण्या वीक्ष्य पुत्रकान् ।
पुत्रार्थिनी मामुपेत्य वाक्यमाह युधिष्ठिर ॥
शूरं बलवतां श्रेष्ठं कान्तरूपमकल्मषम् ।
आत्मतुल्यं मम सुतं प्रयच्छाच्युत मा चिरम् ॥
न हि तेऽप्राप्यमस्तीह त्रिषु लोकेषु किञ्चन ।
लोकान् सृजेस्त्वमपरानिच्छन् यदुकुलोद्वह ॥
त्वया द्वादश वर्षाणि व्रतीभूतेन शुष्यता ।
आराध्य पशुभर्तारं रुक्मिण्यां जनिताः सुताः ॥
चारुगेष्णः सुचारुश्च चारुवेषो यशोधरः ।
चारुश्रवाश्चारुयशाः प्रद्युम्नः शम्भुरेव च ॥
घुष्यते ह्यचलं स्थानं कस्य त्रैलोक्यपूजितम् ।
वर्षते कोऽत्र पर्जन्यो ज्वलते तेजसा च कः ॥
कस्मादोषधिसम्पत्तिः को वा धारयते वसु ।
प्रकामं क्रीडते को वा त्रैलोक्ये सचराचरे ॥
ज्ञानसिद्धिक्रियायोगैः सेव्यमानश्च योगिभिः ।
ऋषिगन्धर्वसिद्धैश्च विहितं शरणं परम् ॥
कर्मयज्ञक्रियायोगैः सेव्यमानः सुरासुरैः ।
नित्यं कर्मफलैर्हीनं तमहं कारणं वदे ॥

PDF Compressor Free Version

स्थूलसूक्ष्ममनौपम्यमग्राह्यं गुणगोचरम् ।
गुणहीनं गुणाध्यक्षं परं माहेश्वरं पदम् ॥
विश्वेशं कारणगुरुं लोकालोकान्तकारणम् ।
भूताभूतभविष्यच्च जननं सर्वकारणम् ॥
अक्षराक्षरमव्यक्तं विद्याविद्ये कृताकृते ।
धर्माधर्मौ यतः शक्र तमहं कारणं ब्रुवे ॥
प्रत्यक्षमिह देवेन्द्र पश्य लिङ्गं भगाङ्कितम् ॥
देवदेवेन रुद्रेण सृष्टिसंहारहेतुना ।
मात्रा पूर्वं ममाख्यातं कारणं लोकलक्षणम् ।
नास्ति चेशात् परं शक्र तं प्रपद्य यदीच्छसि ॥
प्रत्यक्षं ननु ते सुरेश विदितं संयोगलिङ्गोद्भवं
त्रैलोक्यं सविकारनिर्गुणगणं ब्रह्मादिरेतोद्भवम् ।
यद्ब्रह्मेन्द्रहुताशविष्णुसहिता देवाश्च दैत्येश्वरा
नान्यत्कामसहस्रकल्पितधियः शंसन्ति हीशात् परम् ॥
तं देवं सचराचरस्य जगतो व्याख्यातवेद्योत्तमं
कामार्थी वरयामि संयतमना मोक्षाय सद्यः शिवम् ॥
हेतुभिर्वा किमन्यैस्तैरीशः कारणकारणम् ।
न शुश्रुम यदन्यस्य लिङ्गमभ्यर्चितं सुरैः ॥

न च श्रीमन्महाभारतस्यापि तामसत्वेनाप्रामाण्यम् ; तथात्वे त्वदुद्धृतवचनानां कथं प्रामाण्यम् ? न ह्यर्धजरतीयं युज्यते ; तुल्यं च साम्प्रदायिकमिति न्यायाच्च । अपि चैवं तदन्तःपातिगीतादि-वाक्यानामपि तथात्वापत्त्या शास्त्रद्रोहित्वं कथं न स्यात् ॥

'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः' इत्यादिना श्वेताश्वतरादौ च सम्यक् शिवस्यैव ब्रह्मत्वं मोक्षदातृत्वं च प्रतिपादितम् ॥

PDF Compressor Free Version

अन्यत्रापि भारते—व्यास उवाच—

प्रजापतीनां प्रथमं तैजसं पुरुषं प्रभुम् ।
भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुम् ॥
ईशानं वरदं पार्थ दृष्टवानसि शङ्करम् ।
तं गच्छ शरणं देवं वरदं भुवनेश्वरम् ॥
महादेवं महात्मानमीशानं जटिलं शिवम् ।
त्र्यक्षं महाभुजं रुद्रं शङ्खिनं चीरवाससम् ॥
महादेवं हरं स्थाणुं वरदं भुवनेश्वरम् ।
जगत्प्रधानमधिकं जगत्प्रीतिमधीश्वरम् ॥
जगद्योनिं जगद्बीजं जयिनं जगतो गतिम् ।
विश्वात्मानं विश्वसृजं विश्वमूर्तिं यशस्विनम् ॥
विश्वेश्वरं विश्वनरं कर्मणामीश्वरं प्रभुम् ।
शम्भुं स्वयम्भुं भूतेशं भूतभव्यभवोद्भवम् ॥
योगं योगेश्वरं सर्वं सर्वलोकेश्वरेश्वरम् ।
सर्वश्रेष्ठं जगच्छ्रेष्ठं वरिष्ठं परमेष्ठिनम् ॥
लोकत्रयविधातारमेकं लोकत्रयाश्रयम् ।
सुदुर्जयं जगन्नाथं जन्ममृत्युजरातिगम् ॥
ज्ञानात्मानं ज्ञानगम्यं ज्ञानश्रेष्ठं सुदुर्विदम् ।
दातारं चैव भक्तानां प्रसादविहितान् वरान् ॥

वेदान् कृत्वाथ चतुरश्चतुरोऽश्वान् महेश्वरः ।
उपवेदानखिलांश्च कृत्वा लोकत्रयेश्वरः ॥

गायत्रीं प्रग्रहं कृत्वा सावित्रीं च महेश्वरः ।
कृत्वोङ्कारं प्रतोदं च ब्रह्माणं चैव सारथिम् ॥

PDF Compressor Free Version

गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम् ।
विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च ॥
बाणं कृत्वाथ वाजाभ्यां पुङ्खे वैवस्वतं यमम् ।
विद्युत्कृत्वाथ निश्राणं मेरुं कृत्वाथ वै ध्वजम् ॥
आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः ।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः ॥
असुराणामन्तकरः श्रीमानतुलविक्रमः ।
स्तूयमानः सुरैः पार्थ ऋषिभिश्च तपोधनैः ॥
स्थानं महेश्वरं कृत्वा दिव्यमप्रतिमं प्रभुः ।
अतिष्ठत् स्थाणुभूतः स सहस्रं परिवत्सरान् ॥
यदा त्रीणि समेतानि अन्तरिक्षे पुराणि च ।
त्रिपर्वणा त्रिशल्येन तदा तानि बिभेद सः ॥
पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम् ।
शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतम् ॥

इत्यादिना सुस्पष्टं शिवस्य परत्वं विष्ण्वादीनां तदीयलीलोपकरणत्वम् । यदपि च श्रीनारायण एव परः, शिवश्चोपासक इति तन्न ; विपरीतस्यैव श्रुतिसूत्रसिद्धत्वात् । श्रीकण्ठीये शिवार्कमणिदीपिकायां च आपाततः नारायणपरत्वेन प्रतीयमानानां वाक्यानां शिवपरत्वं दर्शितम् । तथा हि— "अनुपपत्तेस्तु न शारीरः" इति (बादरायणब्रह्मसूत्र) अस्य महोपनिषदि श्रूयते विषयः— 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् । नारायणं महाज्ञेयम्' —इत्यादि । अत्र विश्वपतित्वादिलक्षणयुक्ततया नारायणशब्दवाच्यो मूर्त्यात्मा परमेश्वरोऽन्यो वेति संदेहः । 'सहस्रशीर्षं देवम्' इत्यारभ्य सहस्रशीर्षत्वादेर्विधेयत्वेन नारायणस्य मूर्त्यात्मन

PDF Compressor Free Version

एवोद्देश्यत्वेनाभ्यासात्, 'समुद्रेऽन्तं विश्वशम्भुवम्' इति समुद्रशायित्वादितल्लिङ्गाच्च तत्पर्यायवाचकाच्युतहरिशब्दादिप्रयोगाच्च, नारायण एव मूर्त्यात्मा विश्वपतित्वादिना लिङ्गेन प्रतिपाद्यत इति पूर्वपक्षः ॥

सिद्धान्तस्तु—नारायणात्मा महेश्वर इति । कुतः ? विश्वपतित्वादीनां परमेश्वरधर्माणां तदर्थान्तरे नारायणेऽनुपपत्तेः । 'पशूनां पतये' 'वृक्षाणां पतये' 'जगतां पतये' (तै. सं. ४. ५.) इत्यादिना परमेश्वर एव निखिलभुवनाधिपत्यमभ्यस्यते । 'एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीश त ईशिनीभिः' (श्वे. ३. २.) इति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते । 'विश्वाधिको रुद्रः' (महाना. १०.) इति विश्वाधिकत्वं च तस्यैव श्रूयते । अतो विश्वपतित्वादिलक्षणो नारायणात्मा परमेश्वर इति समीचीनम् । ननु 'नारायणात्मा' इति नारायणान्तर्यामी परमेश्वर इति हृदयम् । तदयुक्तम्; 'नारायणपरं ब्रह्म' इति नारायणस्य परब्रह्मभावमुक्त्वा 'तस्य मध्ये वह्निशिखा' इत्यादिना जीवस्वरूपमुक्त्वा 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' इति परमात्मत्वेन जीवान्तर्यामित्वेन तस्योपास्यत्वमवगम्यते । 'स ब्रह्मा स शिवः' इत्यादिना तद्विभूतित्वं ब्रह्मशिवादीनामुच्यते । अतो नारायण एव विश्वपतिः परब्रह्मभूतो जीवान्तर्यामित्वेनोपास्य इति तदात्मकत्वेन तदधिकत्वं तदुपास्यत्वं च परमेश्वरस्य वक्तुमयुक्तमित्यत आह— ॥ कर्मकर्तृव्यपदेशात् ॥ कर्मत्वं कर्तृत्वं च व्यपदिश्यते तत्र ध्यातृध्येययोः परमेश्वरनारायणयोः । कथम् ? 'पद्मकोशप्रतीकाशम्' इति प्रकृतस्य नारायणस्यैव हृदयमुच्यते 'परमात्मा व्यवस्थितः' इति परमेश्वर एव परमात्मा तदन्तर्वर्तितया ध्येयत्वेनोच्यते । ततो ध्यातृत्वेन

PDF Compressor Free Version

नारायणस्य ध्येयत्वेन परमेश्वरस्य च कर्तृत्वं कर्मत्वं च व्यपदिश्यते । अतो नारायणादन्य एवोपास्यः परमात्मा । 'स ब्रह्मा स शिवः' इत्यादिना हृदयपुण्डरीकं प्रस्तुत्य,

'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः' ॥ (कैव०)

इत्यादि । तन्न्यायोऽत्राध्याहार्यः । 'यो वै रुद्रः स भगवान् भूर्भुवः सुवर्यश्च ब्रह्मा तस्मै वै नमो नमः यश्च विष्णुः यश्च महेश्वरः' इत्याद्यथर्वश्रुतिरपि द्रष्टव्या । अत्र विभूतित्वेन ब्रह्मशिवयोर्मध्ये विष्णोरग्रहणं परमेश्वरोपासकतया तस्य प्रस्तुतत्वादित्यविरोधः । 'सहस्रशीर्षा पुरुषः' इत्यारभ्य प्रस्तुतस्य पुरुषस्य 'पादोऽस्य विश्वा भूतानि' इति निजैकांश-जगद्विशिष्टत्वमुच्यते । 'सहस्रशीर्षं देवम्' इति स एवात्र नारायण इति बोध्यते । स चायम् 'नारायणपरं ब्रह्म' इति ब्रह्मत्वेनोच्यते, ब्रह्मैव हि सर्वोपास्यम् । कथमस्य तथाभूतस्यान्यं प्रत्युपासकत्वमित्यत आह—ननु शिवशब्दस्य नारायणे क्षेमं-करत्वादियोगेन वृत्तिः सम्भवति । 'पन्थानः सन्तु ते शिवाः' 'पावको अस्मभ्यं शिवो भव' इत्यादिलौकिकवैदिकव्यव-हारेष्वन्यत्रापि तस्य योगेन प्रयोगदर्शनात् । नारायणशब्दस्य तु नारमयनमस्येत्यादियोगेन शिवे वृत्तिर्न सम्भवति । केवलयोगे णत्वासिद्धेः । 'पूर्वपदात् संज्ञायामगः' (पा. २—८—३) इति सूत्रतः संज्ञाशब्दस्यैव तत्र णत्वस्योपपादनीयत्वात् । तस्य शिव-नामत्वाभावेन तत्संज्ञाशब्दत्वेन णत्वस्योपपादयितुमशक्यत्वादिति

PDF Compressor Free Version

चेत् । यदि तस्य शिवनामत्वं नास्ति तदा विष्णुनाम्न एव तस्य भावितदवस्थोपलक्षिते सर्गाप्ययसमयवर्तिनि शिवे लक्षणया वृत्तिः स्यात्, घटं करोतीति वाक्य इव घटशब्दस्य भाविघटावस्थोपलक्षिते मृत्पिण्डे, न तु तस्य शिवे योगो न सम्भवतीत्येतावता शिवशब्दस्य नारायणपरत्वं स्यात् मन्त्रवाक्यवैयर्थ्यापत्तेरुक्तत्वात्, योगाद्रूढिपूर्वकलक्षणाया एवाभ्यर्हितत्वाच्च । यदि तु 'सर्वाणि ह वा एतस्य नामधेयानि' इत्याश्वलायनस्मरणात्

'नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥'

इति हरिवंशे शिववचनेन विष्णुनाम्नामन्येषां च प्रकृष्टप्रवृत्तिनिमित्तानां नाम्नाम् 'घनसारश्चन्द्रसंज्ञः' इति वचनेन चन्द्रनाम्नः कर्पूरनामत्ववत् शिवनामत्वस्य विधानात्, कूर्मपुराणे—

"वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः ।
ऋषिः सर्वगतत्वेन हरिः सर्वगुणायुतः ॥
अनुत्पादाच्च पूर्वत्वात् स्वयंभूरिति स स्मृतः ।
नारा अप्ययनं यस्मात्तेन नारायणः स्मृतः ॥
हरः संसारहरणाद्विभुत्वाद्विष्णुरुच्यते ।
भगवान् सर्वविज्ञानादवनादोमिति स्मृतः ॥
सर्वज्ञः सर्वविज्ञानात् सर्वः सर्वमयो यतः ।
शिवः स निर्मलो यस्माद्विभुः सर्वगतो यतः ॥"

इति साक्षादेव नारायणशब्दस्य शिवनामसु निर्वचनाच्च, तन्नामत्वमपीष्यते ; तदा न कश्चिच्छङ्कावकाशः । न च नारायणशब्दस्य विष्णावैकान्तिकत्वमस्ति ।

PDF Compressor Free Version

'एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे ।
तदा समभवद्ब्रह्मा सहस्राक्षः सहस्रपात् ॥
सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतीन्द्रियः ।
ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा ॥
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।
ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ता यस्मात्तेन नारायणः स्मृतः ॥'

इति विरिञ्चिनामत्वेनापि तन्निर्वचनदर्शनात् । न च तत्र कश्चित् कल्पविशेषे वैरिञ्चमप्यधिकारं निर्वर्तयन् विष्णुरेव ब्रह्मेत्युक्तः । अग्रे तस्य पृथिव्युद्धरणार्थं वराहरूपपरिग्रहोक्तेरिति वाच्यम् ; पृथिव्युद्धरणानन्तरं वराहरूपं परित्यज्य कौमारसर्गपर्यन्तं जगत्सृष्टिं कृतवतस्तस्यैव

'मुमोह मायया सद्यो मायिनः परमेष्ठिनः ।'

इति मोहप्राप्तिमुक्त्वा

'तं बोधयामास सुतं जगन्मायो महामुनिः ।
नारायणो महायोगी योगिचित्तानुरञ्जनः ॥'

इति जनकस्य भगवतो नारायणस्योपदेशात् तस्य मोहनिवृत्ति-प्रतिपादनात् प्रागचेतनस्य नारायणनाभिपद्मादाविर्भावं पुनरपि मोहप्राप्तिं तस्य नारायणोपदेशेन मोहनिवृत्तिम्

'कथं स भगवाञ्जज्ञे ब्रह्मा लोकपितामहः ।
अब्जजो भागवानीशस्तन्नो वक्तुमिहार्हसि ॥'

इति प्रश्नोपक्रमेण

'अवाप्य संज्ञां गोविन्दादात्मयोनिः पितामहः ।'

PDF Compressor Free Version

इत्यन्तेन प्रबन्धेन प्रतिपाद्य तस्य प्रजासृष्टिसामर्थ्यसिद्ध्यर्थं तपश्चर्यां ततो रुद्राविर्भावादिकं च रुद्रान्तर्धानपर्यन्तमुक्त्वा।

'सोऽपि योगं समास्थाय ससर्ज विविधं जगत् ।
नारायणाख्यो भगवान् यथापूर्वं प्रजापतिः ॥'

इति पुनः स्रष्टुं प्रवृत्ते तस्मिन् विरिञ्च एव नारायणनामत्वानुवाद-दर्शनाच्च विरिञ्चस्य वाराहरूपपरिग्रहोक्तिरपि न विरुध्यते । 'आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाचरत् स इमामपश्यत् तां वराहो भूत्वाहरत् तां विश्वकर्मा भूत्वा व्यमार्ट् साप्रथत सा पृथिव्यभवत् तत्पृथिव्यै पृथिवित्वम् तस्यामश्राम्यत् प्रजापतिः स देवानसृजत' इत्यादिश्रुतौ प्रजापति-शब्दोक्तस्य विरिञ्चस्य वराहरूपपरिग्रहप्रतिपादनात् । एवम्

'ब्रह्मा नारायणाख्योऽसौ ससर्ज भगवान् यथा ।
नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः ॥'

इत्यादिविष्णुपुराणप्रदेशेषु—

'तस्मादण्डादभूत् स्रष्टा शिवात्मा चतुराननः ।
सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजां पतिः ॥
स चाप्सु शयनादेव शिवात्मा स्वेच्छया चिरम् ।
नारायणाख्यमभजच्छक्तिरूपः प्रजापतिः ॥'

इति आश्वलायनधर्मशास्त्रे स्मृतिपुराणान्तरेषु विरिञ्चस्य नारायण-नामत्ववर्णनं द्रष्टव्यम् । तस्मात् 'यदा तमः' इति मन्त्रगते शिवपदे विष्णुविषयत्वशङ्कानवकाशात् सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयन् मन्त्रोऽयमिहानुग्राह्यप्रमाणत्वेन विवक्षित इति युक्तमेव । एतेन शिवस्य तामसत्वोक्तिरपास्ता । तस्य निरुक्तविधया प्राकृतगुणशून्यत्वात् 'तमसः परस्तात्' न तमो

PDF Compressor Free Version

मृत्युः शिव एव केवलः शान्तं शिवमद्वैतम्' इति श्रुतिशतैस्तस्य तमःपरत्वावगमात् । यच्च रुद्रविष्ण्वादीनां तामसत्वादिकथनं तत्तु कार्यान्तःपातितत्तद्ब्रह्माण्डनिविष्टसंहर्तृत्वपालकत्वाद्यभिप्रायेण । अन्यथा त्वन्मतेऽपि विष्णोः सात्त्विकत्वेन प्राकृतत्वापत्तेः । 'तमीश्वराणां परमं महेश्वरम्' 'एको रुद्रो न द्वितीयोऽवतस्थे' 'मायिनं तु महेश्वरम्' इत्यादिश्रुतिशतानुरोधात् 'मन्मना भव मद्भक्तो मामेव शरणं व्रज' इत्यादिगीतावचनान्यपि, अस्मदर्थप्रत्यगभेदाभिप्रायेण शास्त्रदृष्ट्या वामदेववत् शिवपराण्येवेति मन्तव्यम् । अपरं च काशीखण्डे श्रीकालभैरवोत्पत्तिप्रस्तावे ब्रह्मविष्ण्वोरहमहमिकया स्वस्योत्कृष्टत्वमभिमन्यमानयोर्विवदमानयोश्च सान्त्वनार्थं क्रमेण ऋग्यजुःसामप्रणवादिभिः शिवस्य तात्त्विकत्वं प्रत्यपादि, परं तावतापि तौ न तुतुषतुः, ततश्च भगवान् वृषभध्वजः ज्योतिर्मयोऽपि सन् लीलया विग्रहं कृत्वा प्रादुर्बभूव तयोः पुरतः । तदा च ब्रह्मा शिवस्य स्वपुत्रत्वमेवाभिजज्ञौ, प्रललाप च बह्वनर्गलम् , ततश्च श्रीशिवात् कालभैरवः प्रदुरभूत् । ब्रह्मणः शिरश्चिच्छेद । ततश्च विष्णुरपि तुष्टावाभिजज्ञौ च शिवस्यैव परत्वम् । अत एव क्वचित् परोक्षत्वेनैव निर्देशः, 'तमेव शरणं गच्छ' इत्यादि 'मया हताः' इत्यत्रापि शास्त्रदृष्ट्या मया महेश्वरेणेत्येवार्थः, तस्यैव सर्वसंहर्तृत्वात् । अनन्तकोटिब्रह्माण्डाधिपतिः सर्वनियन्ता शिवोऽन्यः, ब्रह्माण्डान्तर्गता ब्रह्मविष्णुरुद्रा गुणविशिष्टाश्चान्ये, तत एव विष्ण्वादीनामुपासकत्वं शिवस्य चोपास्यत्वम् । 'हरिस्ते साहस्रं कमलबलिमाधाय पदयोः' इत्यादि दृश्यते, पौराणिकशिवनिन्दावचनानि श्रुतिविरोधात्, वैष्णवैः प्रक्षिप्तानीति गम्यते । यथा 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति श्रुतिविरुद्धत्वात् 'औदुम्बरी सर्वा वेष्टयितव्या' इति कल्पवचनम् 'विरोधे त्वनपेक्षं

PDF Compressor Free Version

स्यादसति ह्यनुमानम्' (जै. सू. १. ३. ३) इति न्यायादुपेक्ष्यते।
'वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति' इति 'हेतुदर्शनाच्च' (जै. सू.
१. ३. ४.) तथैवात्रापि शिवनिन्दापराणि वाक्यानि निरुक्तश्रुति-
स्मृतिपुराणसहस्रविरुद्धत्वाद्धेयानि ; तत्तद्देवतास्तुत्यर्थानि वा 'ततो
भूय इव ते तमो य उ विद्यायां रताः' इति यथा
परमानन्दावाप्तिजननी विद्यापि समुच्चयस्तुतये निन्द्यते तद्वत्।
यच्च शिवस्य मोहकत्वोक्तिः सापि विष्णुपक्षे मोहिन्यादिरूपेण
सङ्गच्छते। न च शिवस्य निषिद्धचिताभस्मधारित्वमयुक्तमिति
वाच्यम् ; 'तेजीयसो न दोषाय वह्नेः सर्वभुजो यथा'
'रुद्रोऽब्धिजं विषम्' इति न्यायात्। अन्यथा विष्णोरपि
कथं वाराहरूपधारित्वम् ? न चैतानि श्रुतिस्मृतीतिहासपुराण-
वचनानि उपक्रमोपसंहारादिभिराञ्जस्येन परमशिवपराण्यन्यथयितुं
शक्रेणापि शक्यानि, न वा कल्पितत्वतामसत्वादिप्रलापेन प्रामा-
ण्याच्च्यावयितुम् ; तथात्वे चार्वाकजैनबौद्धादिवद्बाह्यत्वापत्तेः
'नास्तिको वेदनिन्दकः' इति स्मृतेः, यच्च शिवस्य श्रीमन्नारायणा-
पेक्षया परत्वप्रतिपादकानि तामसानि पाखण्डित्वप्रयोजकानि

'येऽन्यं देवं परत्वेन वदन्त्यज्ञानमोहिताः।
नारायणाज्जगन्नाथात्ते वै पाखण्डिनः स्मृताः ॥'

इति वचनादिति, तन्न ; 'न हि निन्दा निन्द्यं निन्दितुं
प्रवर्तते। अपि तु विधेयं स्तोतुम्' इति न्यायेन तस्य विष्णुस्तुति-
परत्वेन स्वार्थे तात्पर्याभावात्। अन्यथा शिवपरत्वप्रतिपादक-
श्रुतीनामपि तथात्वापत्तिः स्यात्। न च श्रुतीनां न शिवस्य
सर्वातिशायिमाहात्म्यवर्णनपरत्वमिति वाच्यम् ; उक्तोत्त-
रत्वात्। (मन्त्रः—शुक्लयजुर्वेदतः अ. २२. क. ३२. मन्त्र. ३८.)

PDF Compressor Free Version

प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । स॑सृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासदः ॥ (भाष्यम्) अनामिकया प्रास्तादादत्ते प्रसद्येति—अप्सु क्षिप्ताद्भस्मनः सकाशादनामिकया भस्म गृह्णाति प्रसद्येति चतुर्ऋग्भिः । हे अग्ने त्वं भस्मना कृत्वा योनिं कारणभूतां पृथिवीं योनिभूता अपश्च प्रसद्य प्राप्य मातृभिरद्भिः संसृज्यैकीभूय ज्योतिष्मान् तेजस्वी सम्पन्नः पुनरासदः स्वस्थानमुखामासीद । ३९ । पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्या॑ शिवतमः ॥ (भाष्यम्) हे अग्ने अपश्च पृथिवीं च सदनमासद्य जलभूमिरूपं स्थानं प्राप्य पुनरपि अस्यामुखायामन्तर्मध्ये त्वं शेषे स्वपिषि मातुरुपस्थे उत्सङ्गे यथा शिशुः शेते । किम्भूतस्त्वम्, शिवतमः कल्याणतमः इत्यादिमन्त्राश्च आहवनीयाग्निसमुद्भूतभस्मधारणे विनियुक्ताः 'अनामिकया प्रास्तादादत्ते प्रसद्येति' (का. श्रौ. सू. १६. ६. २९.) (भाष्यं च) अप्सु क्षिप्ताद्भस्मनः सकाशादनामिकया भस्म गृह्णाति प्रसद्येति । 'प्रास्योखायामुपतिष्ठते बोधायेति' (का. श्रौ. सू. ३०.) (भाष्यम्) तडागादागत्यानामिकया गृहीतं भस्म तूष्णीमुखायां प्रास्य बोधायेत्युपतिष्ठते इत्यादिकल्पसूत्रभाष्यादिभ्यो भस्मनो धार्यत्वं सुस्पष्टं बोध्यते । यच्च विधिबोधकपदाभावात् कथमुक्तमन्त्रस्य भस्मधारणे विनियोग इति, तदसत् ; न हि मन्त्रे विधिपदेनैव विनियोगः । विनियोगस्तु क्वचिद्विधायकमन्त्रे विधिबोधकपदस्य ब्राह्मणेन क्वचिल्लिङ्गेन क्वचिद्वाक्यादिना मन्त्रे विधिबोधकपदस्य काप्यभावात् । अत एव 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति वैयर्थ्ये प्राप्ते मन्त्राणां द्रव्यदेवतास्मारकत्वेन प्रामाण्यमङ्गीकृतं मीमांसारहस्यज्ञैः । तत एव

PDF Compressor Free Version

च 'शुची वो हव्या' इति विधिप्रत्ययाभावेऽपि बौधायनेन शुचितया कर्म कर्तव्यमिति लिङ्गबलात् कल्प्यते श्रुतिः। सात्त्विकत्वेनाभिमतपद्मपुराणादौ पातालखण्डे शिवराघवसंवादे च बहुधा भस्मधारणं विहितम्। भस्मजाबालकालाग्निरुद्रजाबालाद्युपनिषत्सु च भस्मनिर्माणस्य तद्धारणस्य स्थानानि मन्त्राश्च निर्दिष्टाः। तथा हि—'स एनं भुशुण्डः कालाग्निरुद्रमगमत्, आगत्य भो विभूतिमाहात्म्यं ब्रूहीति अवोचत्। तथेति प्रत्यवोचद्भुशुण्डं वक्ष्यमाणम्। किमिति। विभूतिरुद्राक्षयोर्माहात्म्यम्॥

मा नस्तोकेन मन्त्रेण मन्त्रितं भस्म धारयेत्।
त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवम्॥
इदं मुख्यं गृहस्थानां विरजानलजं भवेत्।
शतरुद्रेण मन्त्रेण भस्मोद्धूलितविग्रहाः॥
निर्धूतरजसः सर्वे तत्क्षणाच्च वयं मुने।

अथ जनको वैदेहो याज्ञवल्क्यमुपसमेत्योवाच—भगवन् त्रिपुण्ड्रविधिं नो ब्रूहि। स होवाच—सद्योजातादिपञ्चब्रह्ममन्त्रैः परिगृह्य 'अग्निरिति भस्म' इत्यामन्त्र्य 'मा नस्तोके' इति समुद्धृत्य 'त्र्यायुषम्' इति जलेन संमृज्य 'त्र्यम्बकम्' इति शिरोललाटवक्षःस्कन्धेषु धृत्वा पूतो भवति मोक्षी भवति शतरुद्रेण यत्फलमवाप्नोति तत्फलमश्नुते। स एष भस्म ज्योतिरिति वै याज्ञवल्क्यः। तज्ज्ञानं केनोपायेन जायते? पुनः स तमुवाच—विभूतिधारणादेव। तत्प्रकारः कथमिति, कुत्र धार्यम्। पुनः स तमुवाच—सद्योजातादिपञ्चब्रह्ममन्त्रैः भस्म संगृह्य 'अग्निरिति भस्म' इत्यनेनाभिमन्त्र्य 'मा नस्तोके' इति समुद्धृत्य

PDF Compressor Free Version

जलेन संसृज्य 'त्र्यायुषम्' इति शिरोललाटवक्षःस्कन्धेष्विति तिसृभिस्त्र्यायुषैस्त्र्यम्बकैस्तिस्रो रेखाः प्रकुर्वीत। व्रतमेतच्छाम्भवं सर्वेषु वेदेषु वेदवादिभिरुक्तं भवति। तत्समाचरेन्मुमुक्षुर्नपुनर्भवाय। अथ सनत्कुमारः प्रमाणं पृच्छति, त्रिपुण्ड्रधारणस्य त्रिधा रेखा आ ललाटादा चक्षुषोरा भ्रुवोर्मध्यतश्च यास्य प्रथमा रेखा, सा गार्हपत्योऽकारो रजोभूर्लोकः स्वात्मा क्रियाशक्तिरृग्वेदः प्रातः सवनम् प्रजापतिर्देवो देवतेति। यास्य द्वितीया रेखा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यन्दिनं सवनं विष्णुर्देवो देवतेति। यास्य तृतीया रेखा साहवनीयो मकारस्तमो द्यौर्लोकः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयं सवनं महादेवो देवो देवतेति त्रिपुण्ड्रं भस्मना करोति। यो विद्वान् ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स महापातकोपपातकेभ्यः पूतो भवति। स सर्वान् वेदान् ध्यातो भवति, स सर्वेषु तीर्थेषु स्नातो भवति, स सकलरुद्रमन्त्रजापी भवति। न स पुनरावर्तते। इति ओ३म् सत्यमित्युपनिषत्। ओं तत् तत्॥ श्री जाबाल्युपनिषत्॥

यच्च 'कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः। अवैदिकक्रियोपेतास्ते वै पाखण्डिनः स्मृताः॥' इत्यादिना भस्मधारणस्य निन्दितत्वमुक्तं तदेतदक्षरापरिचयनिबन्धनम्। अस्थिकपालादिसमुदितस्य पाखण्डित्वप्रयोजकत्वात् अन्यथा श्रुतिस्मृतिकल्पसूत्रादिविरोधोऽपरिहार्यः स्यात्। श्रुतिविरोधे च पुराणादिवाक्यानां स्वार्थापर्यवसायित्वमेव 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति न्यायात्। यत्तु जाबालादीनामागमत्वं नैवोपनिषत्त्वम्, श्रीभगद्गीतादिवदिति तन्न; नारायणाद्युपनिषदामपि तथात्वापत्तेः सम्प्रदायविच्छेदाविच्छेदयोः कथा तूभयत्र समानैव। तथा सति

PDF Compressor Free Version

कथं त्वदभिमतनारायणाद्युपनिषदामुपनिषत्त्वमन्यासां नेति । काशीखण्डादौ जाबालाद्युपनिषदां प्रामाण्योक्तिरपि तासामुपनिषत्त्वमुपोद्बलयति । किञ्च यदा काठरायणमाठरायणादिश्रुतीनामनाघ्रातनामगन्धानामपि प्रामाण्यं भवन्मते तदा प्रसिद्धतमानां जाबालादिश्रुतीनां तत्त्वे कैव कथा । मुक्तिकोपनिषदि च वायुसूनुं प्रति श्रीरामभद्रेण शरभजाबालाद्युक्तोपनिषदां निर्दिष्टत्वात् । तथा हि—

मैत्रायणी कौषीतकी बृहज्जाबालतापनी ।
कालाग्निरुद्रमैत्रेयीसुबालक्षुरमन्त्रिका ॥ १. ३२.

ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः । ३४.
दक्षिणा शरभस्कन्दं महानारायणाह्वयम् ॥
हृदयकुण्डलीभस्मरुद्राक्षगणदर्शनम् ।
कलिजाबालिसौभाग्यं रहस्यऋचमुक्तिका ॥

इत्यादिनामानि प्रदर्श्य हनुमत्प्रश्नेन शाखानुसारेण शान्तयोऽपि प्रदर्शिताः । अथ हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ—ऋग्वेदादिविभागेन शान्तिमनुब्रूहीति । स होवाच श्रीरामचन्द्रः—ऐतरेयकौषीतकीनादबिन्द्वात्मप्रबोधनिर्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृचानामृग्वेदगतानां दशसंख्याकानामुपनिषदाम् 'वाङ्मे मनसि' इति शान्तिः ॥

ईशावास्यबृहदारण्यजाबालहंसपरमहंससुबालमन्त्रिकानिरालम्बत्रिशिखीब्राह्मणमण्डलब्राह्मणाद्वयतारकपैङ्गलभिक्षुतुरीयातीताध्यत्मतारसारयाज्ञवल्क्यशाट्यायनीमुक्तिकानां शुक्लयजुर्वेदगतानामेकोनविंशतिसङ्ख्याकानामुपनिषदाम् 'पूर्णमदः' इति शान्तिः ॥

PDF Compressor Free Version

कठवल्लीतैत्तिरीयकब्रह्मकैवल्यश्वेताश्वतरगर्भनारायणामृतबिन्दु-मृतनादकालाग्निरुद्रक्षुरिकासर्वसारशुकरहस्यतेजोबिन्दुध्यानबिन्दु-ब्रह्मविद्यायोगतत्त्वदक्षिणामूर्तिस्कन्दशरीरिकयोगशिखैकाक्षराक्ष्य-वधूतकठरुद्रहृदययोगकुण्डलिनीपञ्चब्रह्मप्राणाग्निहोत्रवराहकलिसंतर-णोपनिषत्सरस्वतीरहस्यानां कृष्णयजुर्वेदगतानां त्रिंशत्सङ्ख्याकाना-मुपनिषदाम 'सह नाववतु' इति शान्तिः ॥ इत्यादि ।

एवं सत्यपि तासां प्रामाण्यमनङ्गीकुर्वाणा बाह्या वैदिका वेति स्वयमेव विभावयन्तु ॥

विभूतिर्यस्य नो भाले गले रुद्राक्षधारणम् ।
न हि शिवमयी वाणी तं त्यजेदन्त्यजं यथा ॥
यो महादेवमन्येन हीनदेवेन दुर्मतिः ।
साधारणं सकृद्ब्रूते सोऽन्त्यजो नान्त्यजोऽन्त्यजः ॥

एवं स्थिते भस्मत्रिपुण्ड्रादिनिन्दनस्यान्यपरत्वादाहवनीयाग्नि-समुद्भूतभस्मरुद्राक्षधारणस्य चोपदर्शितश्रुतिस्मृतिसूत्रादिविहित-त्वात् अस्थाने वादिनां प्रलापः । प्रत्युतोर्ध्वपुण्ड्रादीनामेव निषेधः ॥

किन्तु कृच्छ्रादिकं तापः कृच्छ्रचान्द्रायणं कृशः ।
पतितं तप्तलिङ्गाढ्यं चक्राङ्कितमथापि वा ॥
वाङ्मात्रेणापि नार्चेत पाखण्डाचारवत्परम् ।
शूद्रवत् स परित्याज्यो जीवन् शवसमाकृतिः ॥
तस्मै दत्तं च हव्यं च कव्यं चापि वृथा भवेत् ।
तद्दर्शनात् परित्याज्यमन्नं मन्त्राभिमन्त्रितम् ॥
अपि शूद्रेक्षणान्मुख्येलिङ्गचक्राङ्कितं विना ।
अपि चेन्निगमाचाररतो वेदाङ्गतत्परः ।
लिङ्गचक्राङ्कमात्रेण सद्यः स पतितो भवेत् ॥

PDF Compressor Free Version

बृहन्नारदीये—

वेदोक्तकर्महीनाश्च तान्त्रिकाचारतत्पराः ।
यूयं कलौ भवन्त्वेवमिति तानाह सा रुषा ॥

अतः कलियुगे प्राप्ते भविष्यन्ति वेदार्थहीनाः पाखण्ड लिङ्गचक्राङ्किताः ॥

कौर्मे. १४. अ.

कापालं पाञ्चरात्रं च यामलं वाममार्हतम् ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥ इति ।

वासिष्ठे लैङ्गे ८. अ.

पाञ्चरात्रं प्रशंसन्ति केचिद्भागवतं मुने ।
केचिद्बौद्धं प्रशंसन्ति केचिद्दैगम्बरं मुने ॥
तान्येव श्रद्धया युक्ताः परिगृह्य द्विजातयः ।
आचरन्ति महापापा युगान्ते समुपस्थिते ॥ इति ।

कूर्मे १४ अ. गौतमशापः—

भविष्यथ त्रयीबाह्या महापातकिभिः समाः ।
सर्वे सम्प्राप्य देवेशं शङ्करं विष्णुमव्ययम् ॥
अस्तुवँल्लौकिकैः स्तोत्रैरुच्छिष्टा इव शौनिकाः ।
तस्माद्वै वेदबाह्यानां रक्षणार्थाय पापिनाम् ॥
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ।
कापालं लागुडं वामं भैरवं पूर्वपश्चिमम् ॥
पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ।

हेमाद्रौ श्राद्धखण्डे ब्रह्मवैवर्ते—

बौद्धं धर्मं समास्थाय शाक्यास्ते तु बभूविरे ।
शैवाः पशुपताश्चान्ये पाञ्चरात्रास्तथा परे ॥

PDF Compressor Free Version

पाशब्देन त्रयीधर्मः पालनाज्जगतः स्मृतः ।
ये खण्डयन्ति यस्मात्ते पाखण्डास्तेन कीर्तिताः ॥

स्कान्दे यज्ञवैभवखण्डे (३२ अध्याये) गौतमशापः—
तज्ज्ञात्वा मुनिभिः श्रीमान् गौतमो मुनिसत्तमः ।

गौतम उवाच—
शङ्खचक्रगदापद्मदण्डपाशाङ्कुशादिभिः ।
आङ्कता श्रद्धया यूयं भवेयुर्ब्राह्मणाधमाः ॥
बहुनोक्तेन किं साक्षाच्छिवे संसारमोचके ।
तत्सम्बन्धिषु सर्वेषु श्रुतिस्मृत्यादिकेषु च ॥
युष्माकं वंशजातानां युष्माकं च तथैव च ।
श्रद्धाभावः सदैवास्तु शापस्तीव्रः कृतो मया ॥

सौरपुराणे ७ अ. दधीच उवाच—
एते च ब्राह्मणाः सर्वे ये द्विषन्तो महेश्वरम् ।
भवन्तु वेदबाह्यास्ते तमोऽपहतचेतसः ॥
वामाः पाशुपताचारास्तथा वै पाञ्चरात्रकाः ।
भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियास्तथा ॥

पराशरपुराणे अ. ११—
शङ्खचक्रगदापद्मवज्रपाशाङ्कुशादिभिः ।
अङ्किताश्च भविष्यन्ति मनुष्याः पापकर्मणा ॥

हेमाद्रौ प्रायश्चित्तकाण्डे पद्मपुराणवचनम्—
शृणु राम महाबाहो लिङ्गचक्रादिधारणम् ।
शूद्रधर्मरतानां हि तेषां नास्ति पुनर्भवः ॥
विप्रस्यैतद्विगर्ह्यत्वात् प्रायश्चित्तमुदीरितम् ।
किं तत्र प्रायश्चित्तमिति चेदत्र हेमाद्रिः, वामनपुराणे—

PDF Compressor Free Version

ब्राह्मणो यदि मूढात्मा तापयेद्वह्निमुद्रया ।
कर्मार्हो न भवेदत्र स वै पाखण्डसंज्ञितः ॥

नारदीये—

ब्राह्मणस्य तनुर्ज्ञेया सर्ववेदमयी यतः ।
सा चेत् संतापिता येन किं वक्ष्यामि महौजसः ।
चक्राङ्किततनुर्विप्रो राजन् लिङ्गाङ्कितोऽपि वा ।
जपेच्च पौरुषं सूक्तमन्यथा रौरवं व्रजेत् ॥

लिङ्गपुराणे—

चक्रशङ्खौ तापयित्वा यस्तु देहं समङ्कयेत् ।
सजीवकुणपस्त्याज्यः सर्वधर्मबहिष्कृतः ॥

आदित्यपुराणे—

देवेषु यज्ञभागेषु यो नेच्छेदधिकारिताम् ।
स तापयित्वा चक्रादीन् धारयेत् स्वभुजद्वये ॥
ब्राह्मणो यदि मोहेन धारयेत्तप्तमुद्रिकाः ।
तस्य दर्शनमात्रेण कुर्यात् सूर्यावलोकनम् ॥

वह्निपुराणे—

पूर्वजः स्वतनुं दग्ध्वा शङ्खचक्रादिभिः पृथक् ।
तस्य वै निष्कृतिर्नास्ति स्नानदानजपादिभिः ॥
तस्य निष्कृतिरुत्पन्ना पाराशर्येण चोदिता ।
केशानां वापयित्वाथ पुनः कर्म समाचरेत् ॥
गर्भगोलात् समुद्धृत्य गर्भाधानादिपूर्वकम् ।
पतितं तप्तलिङ्गाढ्यं चक्राङ्कितमथापि वा ॥
वाङ्मात्रेणापि नार्चेत पाखण्डाचारतत्परम् ।
संतप्तशङ्खचक्रादिलिङ्गचिह्नतनुर्नरः ॥

PDF Compressor Free Version

स सर्वयातनाभोगी चाण्डालो जन्मकोटिषु ।
द्विजं तु तप्तशङ्खादिलिङ्गाङ्किततनुं नरः ॥
सम्भाव्य रौरवं यान्ति यावदिन्द्राश्चतुर्दश ।

बृहन्नारदीयोक्तिः । ऊर्ध्वपुण्ड्राधिकारिणस्तु—

ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरश्रकम् ।
अर्धचन्द्रादिकं चैव वेदनिष्ठो न धारयेत् ॥

देवीभागवते—

उर्ध्वपुण्ड्रं भ्रमेणापि नैव कुर्याद्द्विजः क्वचित् ।
अश्रौतमूर्ध्वपुण्ड्रादि ललाटे श्रद्धया तु यः ॥

शिवरहस्ये—

तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः ।
वेदमार्गैकनिष्ठस्तु मोहेनाप्याङ्कितो यदि ॥
पतत्येव न संदेहस्तथा पुण्ड्रान्तरादपि ।
शङ्खं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ॥
शूद्रवत् स बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ।

बृहन्नारदीये—

सन्तप्तशङ्खचक्राद्यैर्लिङ्गैरङ्कितविग्रहम् ।
पश्यतो नरकप्राप्तिर्जायते नात्र संशयः ॥

इत्यादिप्रमाणैरूर्ध्वपुण्ड्रतप्तमुद्रादिधारणं वेदानधिकारिणां व्रात्यानामेव । 'अतप्ततनूर्न तदामो अश्नुते' इत्यनया श्रुत्या चक्रादिधारणं विधीयत इति तु न भ्रमितव्यम् ॥

तपसा च तनुर्यस्य स तप्ततनुरुच्यते ।
वह्निनाप्ता तनुर्यस्य स दग्धतनुरुच्यते ॥

PDF Compressor Free Version

इत्यादिरीत्या तत्र कृच्छ्रादितपःपरत्वादित्यादि श्रीशुक्लादिभिःप्रदर्शितम्। ननूपदर्शितवचनचयेन शैवपाशुपतादीनामपि निन्दनमिव क्रियते इति कथं शैवैरेवं वक्तुं शक्यते,

यत्रोभयोः समो दोषः परिहारश्च तादृशः ॥
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥

इत्याप्तोक्तेरिति चेन्न, लिङ्गाङ्कितानामवैदिकशैवानामेव पूर्वोक्त-निन्दाविषयत्वात् । वैदिकशैवैर्न हि लिङ्गाद्यङ्कनं क्रियते, तथा आचारदर्शनात् । यच्च शैवसिद्धान्तस्य 'पत्युरसामञ्जस्यात्' इति सूत्रकारैरेव निराकृतत्वान्न तस्य समुन्मेष इति तन्न; जीवादिभिन्नं तटस्थमीश्वरमभ्युपगच्छतस्तवैव सिद्धान्तस्योक्तसूत्रेण निराकरणात् । माध्वसिद्धान्तस्यावैदिकत्वं श्रीमच्चिन्नहण्णशुक्लादि-विद्वद्वरैर्बहुधा प्रदर्शितम् ; किमाम्रेडितेन ॥

समन्वयसाम्राज्यपथानुसारिणस्तु 'एकं सन्तं बहुधा कल्पयन्ति' 'यो देवानां नामधा एक एव तम्' 'तं यथा यथोपासते तथेतः प्रेत्य भवन्ति' 'एको देवः सर्वभूतेषु गूढः' इत्यादिश्रुतिस्मृत्यनुरोधात् ; एकमेव तत्त्वमचिन्त्यापरिमेय-विशुद्धशक्तिज्ञानादियोगेन विभिन्नविभिन्नमङ्गलमयविग्रहादिमत्त्वेन भक्तचित्तानुसारेण शिवविष्ण्वादिसंज्ञां लभते । यथा एक एवादित्यो जलपात्रादिगतप्रतिबिम्बापेक्षया बिम्बपदवाच्यतां याति, तद्वदेव अनन्तकोटिब्रह्माण्डतद्गतभोग्यभोक्तृनियन्तृनपरान् नियम्यान् तत्तदुपादानभूताचिन्त्यानिर्वाच्यशक्तिचयमाश्रित्योत्पाद्य तत्तद्रूपेण च प्रादुर्भूय स्वयं च स्वरूपतो विशुद्धमेवान्तरङ्गा-माह्लादिनीं शक्तिमाश्रित्य च भक्तमनोभावनामनुसृत्य शिव-विष्ण्वादिरूपेण प्रादुर्भवति । यथा वा तैजसोऽस्यैव बिम्बत्व-

PDF Compressor Free Version

प्रतिबिम्बत्वजलत्वपात्रत्वानि दृश्यन्ते, तद्वदेकस्यैव सर्वस्व-रूपत्वम् । अयमभिप्रायः—तेज एव जलादिक्रमेण घटो भवति, तदेव च जलं भवति, प्रतिबिम्बतामपि तदेव याति 'अग्नेरापः, अद्भ्यः पृथिवी' इति श्रुतेः । एवं स्थिते यथा दृष्टान्ते एकस्यैव बिम्बप्रतिबिम्बतदाधारादित्वम्, तथैवैकस्य जीवेशादिस्वरूपत्वमिति । एतावांस्तु विशेषः—यथा दृष्टान्ते बिम्बप्रतिबिम्बयोर्व्यवधानराहित्येन स्वरूपत ऐक्यं सुग्रहम्, तदाधारादीनां तु कार्योपाधिव्यवधाना-धिक्यात् स्वकीयपरमकारणादभेदो न सुग्रहः ; एवमेव दार्ष्टान्तिकेऽपि जीवेशयोः परमकारणात् व्यवधानातिशया-भावात् स्वरूपतोऽभेदः सुग्रहः, अचेतनानां तु व्यवधानाति-शयात् बाधित्वैव शक्योऽभेदः सुग्रहीतुम् । बिम्बश्चानन्त-जलपात्रप्रतिबिम्बितरूपापेक्षयैव बिम्बपदव्यपदेशभाग्भवति, तदभावे तु बिम्बत्वानाक्रान्तो विशुद्धो गगनादित्य एवेति व्यपदिश्यते, परन्तु बिम्बत्वाक्रान्तितदनाक्रान्त्यवस्थाया-मुभय्यामपि तत्त्वमविकृतमेव; तद्वन्नियम्यापेक्ष्या प्रत्यस्तमिता-शेषविशेषस्यैवाचिन्त्यानन्तमहामहिमस्वात्मवैभवयोगेन निखिलहेय-प्रत्यनीकानन्तज्ञानानन्दात्मकस्य स्वाभाविकानवधिकातिशयासंख्येय-कल्याणगुणगणास्पदत्वमपि संगच्छते । एवं सत्यपि सकलविशेषा-नागन्धितपरमार्थसदनन्तप्रज्ञानानन्दघननिर्गुणमेव गुणादिकृतस्या-तिशयस्याभावात्, सौख्यमहत्त्वाद्यर्थमेव प्राकृता अप्राकृता वा गुणा अपेक्ष्यन्ते । अनन्तकोटिब्रह्माण्डगतब्रह्मादिसमुप-भोग्यसौख्यजातं यस्य प्रज्ञानानन्दजलनिधेस्तुषारस्थानीयम्, तस्य सजातीयादिभेदत्रयशून्यस्य महतो महीयसः किं गुणैः, तत्कृतसौख्यादिभिर्वा । तस्मात् स्वरूपतो निर्गुणमपि सर्वे गुणाः

PDF Compressor Free Version

सौख्यमहत्त्वादयो वा स्वस्य साफल्याय गुणत्वादिसिद्धये वा भगवन्तं स्वयमेवाश्रयन्ते । तदुक्तम्—

'निर्गुणं मां गुणाः सर्वे भजन्ति निरपेक्षकम् ।'

स एवापारकारुण्यसौशील्यवात्सल्यौदार्यजलनिधिः परमान्तरङ्ग-याह्लादिन्याख्यया स्वकीययानिर्वाच्यशक्त्या स्वीयाभिमतानुरूपैक-रूपाचिन्त्यादिव्याद्भुतनित्यनिरवद्यनिरतिशयसौन्दर्यसौगन्ध्यसौकु-मार्यलावण्याद्यनन्तगुणगणादिव्यरूपं बहुधा स्वीकरोति । उपास-काश्च स्वस्वभावनानुसारेणैकमेव तत्त्वं श्रीमन्नारायणतरुणेन्दुशेखर-रघुनन्दनरामभद्रनन्दनन्दनादिरूपेण पश्यन्ति ध्यायन्ति कृतार्थाश्च भवन्ति स्वीयध्येयातिरिक्तं च नान्यत् पश्यन्ति । तथा च श्रुतिः—'तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृत-मभयमेतद्ब्रह्माभयं ब्रह्म भवति य एवं वेद इति रहस्यम् अनुज्ञैकरसो ह्ययमात्मा प्रज्ञानघन एवायं यस्मात् सर्वस्मात् पुरतः सुविभातोऽतश्चिद्घन एव न ह्ययमोतो नानुज्ञाते-तदात्म्यं हीदं सर्वं सदैवानुज्ञैकरसो ह्ययमोंकार ओमिति ह्येवानुजानाति वाग्वा ओंकारो वागेव ह्यनुजानाति चिन्मयो ह्ययमोंकारश्चिदेव ह्यनुज्ञाता तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद इति रहस्यम् अविकल्पो ह्ययमात्माद्वितीय-त्वादविकल्पो ह्ययमोंकारोऽद्वितीयत्वादेव चिन्मयो ह्ययमोंकार-स्तस्मात् परमेश्वर एवैकमेव तद्भवत्यविकल्पोऽपि नात्र काचन भिदास्ति नैव तत्र काचन भिदास्त्यत्र हि भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोति तदेतदद्वयं स्वप्रकाशमहानन्दमात्मैवैतदमृतमभयमेतद्ब्रह्मामयं वै ब्रह्माभयं हि वै ब्रह्म भवति च एवं वेद इति रहस्यम्' ॥

PDF Compressor Free Version

देवा ह वै प्रजापतिमब्रुवन्निममेव नो भगवन्नोंकारमात्मानमुपदिशेति तथेति उपद्रष्टानुमन्तैष आत्मा नृसिंहश्चिद्रूप एवाविकारो ह्युपलब्धः सर्वस्य सर्वत्र न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयो मायया ह्यन्यदिव स वा एष आत्मा पर एषैव सर्वं तथा हि प्रज्ञैनैषा विद्या जगत्सर्वमात्मा परमात्मैव स्वप्रकाशोऽप्यविषयज्ञानत्वाज्ज्ञानन्नेव ह्यन्यत्रान्यन्न विजानात्यनुभूतेर्माया च तमोरूपानुभूतिस्तदेतज्जडं मोहात्मकमनन्तमिदं रूपमस्यास्य व्यञ्जिका नित्यनिवृत्तापि मूढैरात्मैव दृष्टास्य सत्त्वमसत्त्वं च दर्शयति सिद्धत्वासिद्धत्वाभ्यां स्वतन्त्रास्वतन्त्रत्वेन सैषा वटबीजसामान्यवदनेकवटशक्तिरेकैव तद्यथा वटबीजसामान्यमेकमनेकान् स्वाव्यतिरिक्तान् वटान् सबीजानुत्पाद्य तत्र तत्र पूर्णं सत्तिष्ठत्येवमेवैषा माया स्वाव्यतिरिक्तानि पूर्णानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति सैषा चित्रा सुदृढा बह्वङ्कुरा स्वयं गुणभिन्नाङ्कुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी चैतन्यदीप्ता तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमभिमन्ता जीवो नियन्तेश्वरः सर्वाहंमानी हिरण्यगर्भस्त्रिरूप ईश्वरवद्व्यक्तचैतन्यः सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मना सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः सर्वास्ववस्थासु तथाप्यल्पाः स वा एष भूतानीन्द्रियाणि विराजं देवताः (नृसिंहतापनीयोपनिषत्) ॥

नान्तःप्राज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं नप्रज्ञं नाप्रज्ञम् अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ (माण्डूक्य. ३.) अत एव—

PDF Compressor Free Version

वेदानुवर्तिनं मार्गं देवं नारायणं तथा ।
एकीभावं च पश्यन्तो मुक्ताश्चैव भवन्ति माम् ॥
विष्णोर्व्यतिरिक्तं ये ब्रह्मणा च द्विजोत्तम ।
भजन्ते पापकर्माणस्ते यान्ति नरकं नराः ॥ (वा. ११)
अहं त्वं सर्वगो देव त्वमेवाहं जनार्दन ।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ॥

हरिवंशे—

विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च ।
कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वधः ॥
यो विष्णुः स स्वयं रुद्रो यो रुद्रः स जनार्दनः ।
इति मत्वा भजेद्देवं स याति परमां गतिम् ॥

'आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' इति श्रुतिमुपजीव्य 'यदुदिते सूर्ये प्रातर्जुहुयात् यथातिथये प्रद्रुताय शून्यायाव-सथायाहार्यं हरन्ति तादृगेव तत्' इत्युदितानुदितहोमयोः प्रकरणे इतरनिन्दा स्तुत्यविधेयस्तुत्यर्थमेवाङ्गीक्रियते, न तु निन्दायां तात्पर्यम् । अन्यथा उभयस्य निन्दितत्वेन त्याज्यत्वापत्तेः । न चेष्यते सा, विधानवैयर्थ्यात् । न हि त्यागाय विधानं युज्यते, 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायादिति तद्वत् । न चाप्राप्तस्य निषेधासम्भव इति निषेध्यसमर्पकत्वेनैव विधायक-वचनसाफल्यमिति वाच्यम्, वैषम्यात्, तत्त्वावगत्यादिप्रयोजनं विना विधिनिषेधयोः काप्यदृष्टचरत्वात् । न वा विष्णुभजनं शिवभजनं वा तदङ्गमूर्ध्वपुण्ड्रत्रिपुण्ड्रादि वा सुरापानादिवत् न रागतः प्राप्तं येन निन्दावादानुमितनिषेधशास्त्रबलादनिष्टकरं स्यात् । अपि च यत्र 'नातिरात्रे षोडशिनं गृह्णाति' इति स्वार्थपर्यवसाय्यपि निषेधः, तत्रापि 'अतिरात्रे षोडशिनं गृह्णाति' इति विहितत्वात्

PDF Compressor Free Version

नात्यन्तनिषेधः विधानवैयर्थ्यादेव, किन्तु ग्रहणाग्रहणयोर्विकल्प एव यथाभ्युपेयते, तथा विहितत्वान्निन्दितत्वाच्च प्रकृतेऽपि विकल्प एव। वस्तुतस्तु निन्दार्थवादस्यातत्परत्वेन विधानस्य च स्वार्थपरत्वात् 'तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि' इति न्यायात् विधानस्य बलवत्त्वात् विशिष्टफलवत्त्वेनाविरोधे समुच्चय एव युक्तः। यथा विद्याविद्ययोः 'कर्मणा पितृलोको विद्यया देवलोकः' 'अन्धंतमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः' इति विहितत्वत् निन्दितत्वाच्च समुच्चयः, तद्वत् शिवविष्ण्वाद्युपासनयोर्विहितनिन्दितत्वाच्च समुच्चय एव। उभयसमुच्चिचीषयैव चैकैकस्य निन्दनम्। अत एव च स्मार्तेषु पञ्चदेवोपासनसमुच्चयः शिष्टपरम्परया प्राप्तः समाद्रियते। अर्थात् यथा—ये विद्यामुपेक्ष्य सर्वथा केवले अविद्यापदवाच्ये कर्मणि रतास्ते अन्धं तमः प्रविशन्ति इति कर्मनिन्दनम्, ये श्रौतस्मार्तलक्षणं कर्म परित्यज्य केवलायां विद्यायां रतास्ते ततोऽपि भूयस्तमः प्रविशन्ति इति विद्यानिन्दनम्। क्वचिच्चैकस्याङ्गित्वेनेतरेषामङ्गतया प्राधान्याप्राधान्यभेदेन पञ्चदेवोपासनं स्मार्तेषु प्रचलितम्। अयमभिप्रायः—केचिच्छ्रीमन्नारायणं श्रीरघुवंशविभूषणं वृन्दावनचन्द्रनन्दनन्दनं वा तदीयचरणाम्बुजानुरक्तिदार्ढ्याय प्राधान्येन स्वोपास्यतया निश्चित्य तत्पोषणाय शिवगणपत्यादिकमपि ध्यायन्ति। त एव स्मार्तवैष्णवा उच्यन्ते। यथा श्रीगोस्वामीतुलसीदासतुकारामादयः। श्रीमत्तरुणेन्दुशेखरं पार्वतीरमणं स्वोपास्यतया अध्यवसाय तदङ्गत्वेनेतरेषामुपासनं ये कुर्वन्ति त एव स्मार्तशैवा इत्युच्यन्ते। किञ्च सर्वभूतानुजिघृक्षया प्रवृत्तः परमकारुणिकः श्रीव्यासाचार्यः कथमन्यथा परस्परविरुद्धं शिवविष्ण्वादिनिन्दनमुपासनं च विदध्यात्। तस्मात् सर्वव्यापित्वोपास्यदार्ढ्यायैव तदिति मन्तव्यम्। अन्यथा

PDF Compressor Free Version

शिवोपासनविधायकशास्त्रस्याप्रामाण्याध्यवसाने विष्णूपासनविधायकशास्त्रस्यापि तथात्वापत्त्या सर्वपुराणोच्छेदः स्यात् । न च शिवपरत्वप्रतिपादकपुराणस्य तामसत्वमेवेति वाच्यम्, विष्णुपरत्वप्रतिपादकशास्त्रस्य ततोऽप्यपकृष्टतायाः शैवैर्निरुक्तत्वात् । न च तर्हि शिवविष्णुनिन्दास्तुती किमालम्बने इति वाच्यम्, श्यालशुनकन्यायेन शिवविष्णुगोचरनिन्दास्तुत्योः सङ्केतभेदमाश्रित्य कार्यकारणब्रह्मगोचरतया व्याख्यातत्वात् । तदुक्तं श्रीनीलकण्ठाचार्यैः— यथा हि कश्चित् कुतुकी मुग्धां भार्यां कोपयितुं गृहशुनकं श्यालनाम्ना सङ्केत्य गालयति, सा च मद्भ्रातरं गालयतीति कुप्यति, तद्वच्छैवैर्विष्णुशब्देन कार्यब्रह्मणो विवक्षितत्वात्, तद्भजनाद्भावनातारतम्येनैश्वर्यतारतम्यवत्तया हीनसम्पदां पुंसां दुःखकरत्वात्, नरकशब्दोदितस्य ब्रह्मलोकस्य प्राप्तिरिष्यत इति । अयमभिप्रायः—विश्वात्मकस्य गगनादित्यस्थानीयस्य परमतत्त्वस्य समुपासने नित्यनिरतिशयपरमानन्दावाप्तिलक्षणो मोक्षः प्राथ्यते । तत्तद्ब्रह्माण्डान्तरगतविशुद्धोपाधिप्रतिबिम्बितकार्यब्रह्मात्मकशिवाद्युपासनेन कार्यब्रह्मलोकप्राप्तिरिष्यते । बिम्बात्मकगगनादित्यस्थानीयमेव तत्त्वमुक्तविधया भावनाभेदानुविधायित्वेन विष्णुपुराणादौ विष्णुशब्देन शिवस्कन्दादिपुराणेषु शिवशब्देन श्रीमद्भागवते श्रीकृष्णशब्देन श्रीरामायणे श्रीरामभद्रशब्देन चाभिलक्ष्यते । तदुक्तम्—

> वेदे रामायणे चैव पुराणे भारते तथा ।
> आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ॥ इति ।

विष्णुपुराणादौ विष्णुशब्देन परमतत्त्वं निर्दिश्यते । शिवादिशब्देन चापरमेव कार्यं ब्रह्माभिधीयते । तथैव शिवस्कन्दादिपुराणेषु शिवशब्देन बिम्बात्मकं परं ब्रह्माभिधीयते विष्ण्वादिशब्देन कार्यब्रह्माभिधीयते । विष्णुः सर्वोत्तमः शिवो जीवः, शिवः सर्वोत्तमो विष्णु-

PDF Compressor Free Version

र्जीव इत्युपासकानामाग्रहो विष्ण्वाद्युत्कर्षप्रतिपादकश्रीभागवत-सूतसंहितादीनामनार्षत्वासुरत्वादिवचनैर्दूषणं च शास्त्रार्थानवबोध-मूलकम्। परमतत्त्वे चित्तावताराय स्वरूपविशेषस्य भावनाभेदेनोप-दिष्टत्वात्। विशिष्टफलायैव च विकल्पोऽपि सम्भवति। यथा चैकस्यैव भामनीत्यादिगुणविकल्पैरुपास्यभेदः, यथा वा कामविजेतृ-त्वादिविशिष्टस्योपासनं तद्गुणप्राप्तये।

'विक्रीडितं व्रजवधूभिरिदं च विष्णोः
श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः।
भक्तिं परां भगवति प्रतिलभ्य कामं
हृद्रोगमाश्वपहिनोत्यचिरेण धीरः॥'

इत्यादिप्रामाण्यात्। यत्तु शैववैष्णवपुराणेष्वितरनिन्दास्मरणं तत् 'न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुम्' इति न्यायेन विधेयस्तुत्यर्थमेव। यथा—'उद्यन् खलु वा आदित्य आहवनीयेन रश्मीन् सन्दधाति' इत्युपक्रम्य 'प्रातः प्रातरनृतं ते वदन्ति, पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्ज्योतिर्न तदा ज्योतिरेषाम्' इति॥

श्रीरामायणे तु श्रीराम एव श्रीभागवते कृष्ण एव परत्वे-नाभिलक्ष्यते। तदितरेषां तत्र तत्र कार्यरूपतया अपरत्वमेव। किं बहुना। ब्रह्मवैवर्तपुराणादौ श्रीकृष्णस्यैव परत्वं श्रीनाराय-णादीनामुपासकत्वमवगम्यते। न चैवं शिवविष्ण्वादिद्वैविध्यानु-पपत्तिरिति वाच्यम्;

'क्वाहं तमो महदहंखचराग्निवार्भू-
संवेष्टिताण्डघटसप्तवितस्तिकायः।
क्वेदृग्विधाविगणिताण्डपराणुचर्या-
वाताध्वरोमविवरस्य च ते महित्वम्॥'

PDF Compressor Free Version

'तस्यास्तेजःकणाज्जाता लक्ष्मीवाक्कोटयः पुरा ।
शिवतेजःसमुद्भूता हरिब्रह्मादिकोटयः ॥'

इत्यादिवचनेभ्यो विभिन्नब्रह्माण्डपालकसंहर्तृत्वादेः सिद्धत्वात् । तथा च बिम्बात्मकपरमतत्त्वोपासकस्य निरुपप्लुतब्रह्मात्मभावापेक्षया कार्यात्मकविष्णवाद्युपासकस्य ब्रह्मलोकप्राप्तिर्नरकप्राप्तिरेव । यथा परमतत्त्वविदपेक्षया अनात्मज्ञा देवा अपि असुषु तदुपलक्षितदेहादिषु रमणादेवासुरा उच्यन्ते, तद्वत्

'असुर्या नाम ते लोका अन्धेन तमसा वृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥'

इति मन्त्रवर्णात् । एवमेव कार्यब्रह्मात्मकरुद्राद्युपासनेऽपि ब्रह्मलोकप्राप्तिरेव परमतत्त्वप्राप्त्यपेक्षया नरकप्राप्तिः । मोक्षधर्मे जापकोपाख्याने

'अमूनि यानि स्थानानि देवानां परमात्मनाम् ।'

इत्यादिना—

'तस्य स्थानवरस्येह सर्वे निरयसंज्ञिताः ॥'

इत्यन्तेन । नन्वनन्यतासिद्धये तथापीतरदेवोपेक्षणाय तत्तन्निन्दनं स्वार्थपरमेवेति चेन्न, अनन्यताया भावानवबोधात् । तथा हि—किमियमनन्यता, तदेकपरत्वमिति चेत् भोजनपानादिलौकिकवैदिकव्यवहारपरस्य तदसंभवात् । लौकिकवैदिककर्मार्पणेनापि स्वेष्टदेवोपासनमेव क्रियत इति चेदत्रापि इतरदेवार्चनस्यापि तथात्वसम्भवात् ॥

वस्तुतस्तु—

'वर्णाश्रमवता राजन् पुरुषेण परः पुमान् ।
हरिराराध्यते भक्त्या नान्यत्तत्तोषकारणम् ॥'

PDF Compressor Free Version

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥'

'स्वकर्मणा तमभ्यर्च्य'

इत्यादिवचनैर्वर्णाश्रमानुसारिश्रौतस्मार्तलक्षणकर्मभिरेव हरेरुपासनं विहितम्, श्रौतस्मार्तलक्षणकृत्येषु तु इन्द्राग्निवरुणरुद्र-प्रजापतिप्रभृतिदेवानामर्चनं पदे पदे दृश्यते । ततश्च कथं वैदिको ब्रूयात् यन्मया विष्णुव्यतिरिक्ता देवा नार्चनीया इति । यदि तु तत्तद्देवात्मना विष्णुरेवाभ्यर्च्येत इति नानन्यपरता-व्याघात इति तदा जीव्यताम् ; तथैव शिवगणपत्यादयोऽपि समर्चनीयाः, न तथा सत्यपि अनन्यताव्याघातः, विज्ञजन-समितिन्यक्कृतकाञ्चनकामिन्यादिविषयविषदग्धचेतसां पदे पदे लोभाद्याविष्टतया म्लेच्छानपि संनमतां शिवविष्ण्वादिवन्दन-मशेषाघौघविध्वंसनमनन्यताव्यापादकमिति महदाश्चर्यम् ! तस्मा-दुक्तप्रकारेण भगवदर्थमेव भगवदाराधनबुद्ध्या परगुरौ सर्वा-र्पणमेवानन्यता इति मन्तव्यम् ॥

का. खण्डे २. अ. ॥ श्रीध्रुवः श्रीविष्णुं प्रति—

'मित्राणां हि कलत्रं त्वं धर्मस्त्वं सर्वबन्धुषु ।
त्वत्तो नान्यज्जगत्यस्मिन्नारायण चराचरे ॥
त्वमेव माता त्वं तातस्त्वं सुहृत्त्वं महाधनम् ।
त्वमेव सौख्यसम्पत्तिस्त्वमेव जीवनेश्वरः ॥
सा कथा यत्र ते नाम तन्मनो यत्त्वदर्पितम् ।
तत्कर्म यत्त्वदर्थं वै तत्तपो यद्भवत्स्मृतिः ॥
अहो पुंसां महामोहस्त्वहो पुंसां प्रमादिता ।
वासुदेवमनादृत्य यदन्यत्र कृतश्रमाः ॥

PDF Compressor Free Version

नाधोक्षजात् परो धर्मो नार्थो नारायणात् परः ।
न कामः केशवादन्यो नापवर्गो हरिं विना ॥
इयमेव परा हानिरुपसर्गोऽयमेव हि ।
अभाग्यं परमं चैतद्वासुदेवं न यत्स्मरेत् ॥
गोविन्दं परमानन्दं मुकुन्दं मधुसूदनम् ।
त्यक्त्वान्यं नैव जानामि न स्मरामि भजामि च ॥
न नमामि न च स्तौमि न पश्यामीह चक्षुषा ।
न स्पृशामि न वा यामि गायामि न हरिं विना ॥

इत्यादिश्लोकैरनन्यतायाः स्वरूपं प्रदर्शितवान् । अत्र प्रघट्टकस्याय-मेवाभिप्रायो यद्वासुदेवमुपेक्ष्य नान्ये संश्रयितव्याः, वासुदेव-बुद्धया वासुदेवाराधनबुद्ध्या वा सर्वे देवाः समाराध्या एव । अत एवाग्रे श्रीमन्नारायणोपास्यं श्रीहरं भगवदाज्ञयैव पूजितवान् ध्रुवः । श्रीभगवांश्च वरप्रदानाद्यनन्तरमेवमाह ध्रुवं प्रति । श्रीभगवानुवाच—

ध्रुवावधेहि वक्ष्यामि हितं तव महामते ।
येन ते निश्चलं सम्यक् पदमेतद्भविष्यति ॥
अहं जिगमिषुस्त्वासं पुरीं वाराणसीं शुभाम् ।
साक्षाद्विश्वेश्वरो यत्र तिष्ठते मोक्षकारणम् ॥
विपन्नानां च जन्तूनां यत्र विश्वेश्वरः स्वयम् ।
कर्णे जापं प्रकुरुते कर्मनिर्मूलनक्षमम् ॥
अल्पसंसारदुःखस्य सर्वोपद्रवदायिनः ।
उपाय एक एवास्ति काशिकानन्दभूमिका ॥
इदं रम्यमिदं नेति बीजं दुःखमहातरोः ।
तस्मिन् काश्यग्निना दग्धे दुःखस्यावसरः कुतः ॥

PDF Compressor Free Version

प्राथ्र्यं सम्प्राप्यते येन न भूयो येन शोच्यते ।
वैकुण्ठनगरात् काशीं नित्यं विश्वेशमर्चितुम् ॥
अहमायामि नियमाज्जगदघ्र्यां तदङ्किताम् ।
मायायाः परमा शक्तिस्त्रिलोक्या रक्षणक्षमा ।
तत्र हेतुर्महेशानः ससुदर्शनचक्रदः ॥
पुरा जालन्धरं दैत्यं ममापि परिकम्पनम् ।
पादाङ्गुष्ठाग्ररेखोत्थं चक्रं कृत्वा हरोऽहरत् ।
तच्च चक्रं मया लब्धं नेत्रपद्मार्चनाद्विभोः ।
एतत् सुदर्शनाख्यं वै दैत्यचक्रप्रमर्दनम् ।
तन्मया तव रक्षार्थं भूतविद्रावणं परम् ॥
तावत् प्रणुन्नं पुरतस्ततश्चाहमिहागतः ।
काशीमिदानीं यास्यामि विश्वेश्वरविलोकने ॥
पञ्चक्रोश्याश्च सीमानं प्राप्य देवो जनार्दनः ।
वैनतेयादवारुह्य करे धृत्वा ध्रुवं ततः ॥
मणिकर्ण्यां परिस्नाय विश्वेशमभिपूज्य च ।
ध्रुवं बभाषे भगवान् हितं तस्य चिकीर्षयन् ॥
लिङ्गं स्थापय यत्नेन क्षेत्रेऽत्रैवाविमुक्तके ।
त्रैलोक्यस्थापनं पुण्यं यथा भवति तेऽक्षयम् ॥

इममं शास्त्रीयमभिप्रायमजानन्तः पामराः शैववैष्णवापसदाः

'ब्रह्माणं केशवं रुद्रं भेदभावेन मोहिताः ।
पश्यन्त्येकं न जानन्ति पाखण्डोपहता जनाः ॥'

इति वचनशतैरुपदिश्यमानमभेदमपश्यन्तः परमकारणमेव बहुधा सन्तमित्युपेक्ष्यान्यतरपरिग्रहेणेतरं निन्दन्तः परस्परं कलहायमानाः स्वामिद्रोहान्नरकायैव सज्जमाना यथा भृत्यावन्योऽन्यस्वामिनौ

PDF Compressor Free Version

परस्परानुरक्तावपि निन्दन्तौ स्वामिद्रोहिणावेव तथैव परस्परात्मानौ परस्परनुतिप्रियौ माधवोमाधवौ निन्दन्तः स्वामिद्रोहिण एव। तस्मात् बुभूषुभिर्भावनानुसारेण स्वोपास्य एव वन्दनीयो न चान्यदीयासूया कर्तव्या। ऊर्ध्वपुण्ड्रत्रिपुण्ड्रादीनामपि विकल्पसमुच्चयादयो युज्यन्ते।

स्नात्वा पुण्ड्रं मृदा कुर्याद्धृत्वा चैव तु भस्मना।
देवान् विप्रान् समभ्यर्च्य चन्दनेन समाचरेत् ॥

इति स्मृतेः समुच्चय एव। समुच्चिचीषयैवैकैकस्य निन्दापि। शैववैष्णवादिसम्प्रदायभेदेन व्यवस्था वा। 'श्रोणामेक उदकं गामवाव्रजति मांसमेकः पिंशति सूनयाभृतम्। आ निम्रुचः शकृदेकोऽपाभरत् किंस्वित् पुत्रेभ्यः पितरावुपावतुः ॥', इति मन्त्रवर्णेनापि नीलकण्ठाचार्यैः सर्वसामञ्जस्यमुक्तम्। हे ऋभवः! भवतां मध्ये एकः श्रोणां श्लक्ष्णां गां मृदं गोपीचन्दनादिरूपां तीर्थनिकटस्थां मुख्यकर्मभूतां प्रति उदकं जलं गौणं कर्म आव्रजति अवगमयति। अन्तर्भावितण्यर्थोऽयम्। श्रोणां गामुदकेन मिश्रयति इत्यर्थः। श्रोणां गां रक्तचन्दनरूपां वा। तथा एकः सूनया हिंसया तत्कर्त्रा आभृतमाहृतं मांसं गोरोचनाख्यं पिंशति पिनष्टि। उदकेन सहेति शेषः। निम्रुचः नितरामस्तं गच्छतो दग्धेन्धनस्याग्नेः सम्बन्धि शकृत् गोमयं शुष्कगोमयोत्थं भस्मेति यावत्। अपाभरत् अपाहृतवान्। अत्रापि उदकेनेति शेषः। 'व्यवहिताश्च' इति छन्दसि व्यवहितेनाप्युपसर्गेण क्रियायाः सम्बन्धः। 'हृग्रहोर्भश्छन्दसि' इति भत्वम् ॥

यद्यात्रैव तिर्यक्पुण्ड्रादिबोधकानां पौरुषेयवाक्यानामप्रामाण्यशङ्कायाम् 'आ निम्रुचः शकृदेको अपाभरत्' इति मन्त्रलिङ्गानुमितविधिमूलत्वात् प्रामाण्यमित्युक्त्वा त्रिपुण्ड्रभस्मधारणविषये

PDF Compressor Free Version

विधिः कथमेतन्मन्त्रलिङ्गेनानुमीयते। अस्मिन् मन्त्रे भस्मधारण-बोधकपदाभावादित्याशङ्क्य मन्त्रस्थशकृत्पदस्य बृहज्जाबालरूपोप-बृंहणानुसारेण करणीयमित्युक्तं नीलकण्ठेन। यदि जाबालोपनिषदः वेदत्वं मन्येत तर्हि स्पष्टं भस्मधारणविधायकैतद्वाक्यमेव भस्म-धारणबोधकपौरुषेयवचनस्य मूलमुच्येत। तस्मान्न जाबालादीनां वेदत्वमिति तदेतदनाकलितपौर्वापर्यस्य स्वार्थसाधनचातुर्यम् आचार्याभिप्रायानभिज्ञानात्। तथा च स्वयमेवाचार्यः 'इषे त्वा इति शाखां छिनत्ति' इति ब्राह्मणस्य दृष्टान्ततयोपादानात् बृहज्जाबालादीनां ब्राह्मणत्वेन वेदत्वं सूचयति। तथा हि—एतानि मन्त्रपदान्यसंपूर्णार्थत्वात्स्वार्थलाभाय ब्राह्मणमपेक्षन्ते। कथं कश्चार्थलाभोऽपेक्ष्यत इत्यप्याह 'इषे त्वोर्जे त्वा' इत्यादिमन्त्रवत्। तत्र यथा 'इषे त्वेति शाखामाच्छिनत्ति' 'ऊर्जे त्वेत्यनुमार्ष्टि' इति ब्राह्मणानुसारात्। हे शाखे त्वा त्वाम् इषे अन्नाय छिनद्मि इति, ऊर्जे पशुभ्य अनुमार्ज्मि इति व्याख्यातम्; एवमिहापि वासुदेवोपनिषद्-ब्राह्मणतन्त्रपुराणोपबृंहणानुसारादूर्ध्वपुण्ड्रार्थं श्लक्ष्णां मृदं जलेनेति व्याख्येयम्। तथा कालाग्निरुद्रबृहज्जाबालाद्युपनिषद्ब्राह्मणतन्त्रपुराणोपबृंहणानुसारात् त्रिपुण्ड्रं कर्तुम् 'निम्रुचः शकृदपाभरत्' इति च व्याख्येयम्। तथा च 'श्रोणाम्' इति पदस्य रक्तामिति व्याख्याने सौरशाक्तगाणेशानां रक्तमेव पार्थिवं द्रव्यं पुण्ड्रार्थे तन्त्रे विधीयते, वैष्णवानां पीतम्, शैवानां भस्मेति। अनेन तत्तत्पुण्ड्रविशेषोपलक्षित-तत्तद्देवताभजनेनापि देवताभावं प्राप्नुवन्तीति विधीयते। केवल-वैदिकानां तु श्रोणां श्लक्ष्णामिति व्याख्यानेन त्रितयस्यापि समुच्चयः। स्नात्वा पुण्ड्रं मृदा कुर्यादित्यत्र गोरोचनाग्रहणं चन्दनाद्यष्टगन्धोप-लक्षणार्थम्। एतेषां विकल्पसमुच्चयपक्षाणां पितृपितामहपरंपराक्रमेण व्यवस्थामाह—किंस्वित् पुत्रेभ्यः पितरावुपावतुरिति। पुत्रहितार्थे

PDF Compressor Free Version

यत्किञ्चित् व्रतं मातापितरौ पितृपितामहौ वा उपेत्य स्वीकृत्य अवतुः व्रतं सम्यक् परिपालयामासतुः। तदेव तस्य पुत्रस्य श्रेयःसाधनव्रतं मित्यर्थः। एवं सत्यवादिनां तीर्थानि यज्ञादयस्तन्त्रमार्गेण सूर्यान्यतमोपास्तिः केवलवैदिकता चेति देवताभावसाधनानीति मन्त्रद्वयतात्पर्यं सिद्धम्। तस्मादस्माभिरल्पज्ञैर्दृष्टमूलमदृष्टमूलं वा मनुव्यासादिसर्वज्ञप्रणीतं स्मृतिजातम् 'वेदवद्वेदविदां वचनम्' इति न्यायेनावगमयितव्यम्। इत्यादिपत्रस्थे प्रथमाध्यायादावेव नीलकण्ठीयव्याख्याने सुस्पष्टम्। एवं स्थिते नीलकण्ठीयोक्त्या बृहज्जाबालाद्युपनिषदाम् 'इषे त्वेति शाखां छिनत्ति' इत्यादिब्राह्मणवद्वेदत्वं सिध्यति। वेदत्वे च ऊर्ध्वपुण्ड्रार्थं रक्तपीतगोपीचन्दनादिरूपविशेषार्थग्रहणायेव ब्राह्मणतन्त्रादिसमाश्रयणं भस्मरूपविशेषग्रहणार्थमिति नास्ति तिरोहितमिदम्। साम्प्रदायिकं तुल्यम्। 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति मन्त्रब्राह्मणात्मकशब्दराशेर्वेदत्वस्य सर्वसंमतत्वात्। यदि च 'प्रसद्य भस्मना' 'त्र्यायुषम्' इत्यादिमन्त्राणां भस्मार्थत्वाभावात् न तत्र विनियोगः, अन्यथा 'अग्निमीळे' इत्यादीनामपि भस्मधारणे विनियोगापत्तिः स्यादिति। तदप्यपरिशीलितमीमांसावृत्तान्तस्यैव शोभते। लिङ्गादिना कात्यायनादिभिरनामिकया भस्मधारणविनियोगसूत्रस्य सूत्रितत्वात् तान् प्रत्येव तादृशस्य पर्यनुयोगस्य युक्तत्वात्। किञ्च 'गणानां त्वा' 'शन्नो देवीरभिष्टये' इत्यादिमन्त्राणां गणपतिशनैश्चरादिदेवपूजनादौ 'इषे त्वा' इत्यस्य शाखाच्छेदनादौ विनियोगः ब्राह्मणादिसमाश्रयेण यथा तद्वत्। यदपि च 'नमाम्यभोगिपरिवारसम्पदं निरस्तभूतिम्' इति त्वदाचार्यैरेव शङ्कराचार्यस्य भस्मनिराकर्तृत्वमुच्यते, तदसत्। श्लोकार्थानभिज्ञानात्। तथा हि तदर्थस्तत्त्वदीपने—"भाष्यार्थप्रतिपत्त्यर्थं तत्कर्तारं नमति—नमामीति। प्रसिद्धशङ्करविलक्षणं

PDF Compressor Free Version

परमहंसपरायणं शङ्कराचार्यं नमामीत्यर्थः । वैलक्षण्यमाह—अभोगीति । भोगिनामधेयसर्पपरिवारसम्पन्नः प्रसिद्धः शङ्करः सः, अयं तु निरस्तसमस्तैषणमुनिनिकरपरिवृत इत्यर्थः । भूतिर्भसितं तदनुलिप्तगात्रः सः, अयं त्वैश्वर्यलक्षणः भूतिविधुर इत्यर्थः । गिरिजार्धविग्रहः सः, अयं तु न तथा भवति । सः क्रूरः, उग्रत्वात्; अयं तु शान्त इत्याह—अनुग्रमिति । कण्ठेकालः सः, अयं तु कृष्णाविद्यालाञ्छनरहित इत्याह—उन्मृदितेति । विनायको गणेशस्तत्सहितः सः, एष विनायकं विना वर्तते, निरस्तसमस्तबौद्ध इत्यर्थः" ।

यदि भस्मरहितमिति व्याख्यानं तदापि चितादिभस्मरहितमित्यत्र तात्पर्यं वेदितव्यम् । प्रत्युत,

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
इति सत्यादिलक्ष्यस्योपास्त्यगोचरता मता ॥

ततो ब्रह्मावतारस्य शिवस्योपासनं श्रुतौ ।
प्रोक्तं तस्य निरासो नो कर्तुं केनापि शक्यते ॥

भूतिरुद्राक्षयोश्चापि कर्तव्यं धारणं नरैः ।
किं तु लिङ्गादिचिह्नानां धारणे मानशून्यता ॥

लिङ्गादेर्धारणं नैव प्रसिद्धं किं तु तेषु वै ।
भूत्यादेर्धारणं किञ्च कैवल्योपनिषद्वचः ॥'

इत्यादिना प्राचीनशांकरजये पाशुपतमतखण्डनावसरे भस्मरुद्राक्षादिधारणमनुमन्यन्ते स्माचार्यपादाः । प्राचीनशाङ्करजयस्तु नानन्दगिरिकृतः । आनन्दगिरिस्तु विद्यारण्यादर्वाचीनः, तत्कृतदीपिकाया ऐतरेयभाष्यटीकायामुद्धरणात् । तथा हि—'नान्यत्

PDF Compressor Free Version

किञ्चन मिषत्' इत्यत्र दीपिकायां तु धातूनामनेकार्थत्वेन मिषदिति धातोः आसीदित्यर्थः । आनुपूर्व्या चायं पाठो दीपिकायां दृश्यते । यश्चानन्दज्ञान आचार्यसमकालिकः स त्वन्यः । यत्तु खण्डनकारादिनामानिर्देशात् विद्यारण्यकृतशाङ्करविजयस्याप्रामाण्यं तन्न, सनाम्नामन्येषामपि सत्त्वात् ; वाचस्पतिमिश्रा यथानेके, तथा श्रीहर्षमिश्रा अप्यनेक इति सम्भवात् । यत्तु विद्यारण्येनानन्दगिरिनिर्मितप्राचीनशङ्करजयादेव सारमाकृष्य लिखितं तत्त्व 'प्राचीनशङ्करजये सारमाकृष्य लिख्यते' इति तेनैव सुस्पष्टीकृतमिति तन्न ; २४००० श्लोकात्मकः चिद्विलासाख्येनाचार्यशिष्येण निर्मितः शाङ्करजयः, तत एव च सारमाकृष्य लिखितं विद्यारण्याचार्येण । अनन्तानन्दगिरिस्तु ततोऽर्वाचीनः । तन्निर्मितोऽप्यन्यः शाङ्करजयः प्रसिद्धः । तत्र विरोधे पूर्वपूर्वाचार्याणामुक्तिरेवादर्तव्या, अविरुद्धांशे सर्वेषामाचार्याणाम् । भाष्यकारीयसिद्धान्तग्रन्थविरोधे तु तदानुगुण्येनैव सर्वे नेतव्याः । पद्मपादाचार्यपद्मपादुकाचार्यविषये तु श्रीशुक्लमहोदयप्रत्युक्तिचयं समाधायैव किंचिद्वक्तव्यमित्यनवसरप्रत्याहृतम् । यच्चानन्दगिरीयवाक्यान्युद्धृत्य श्रीमच्छङ्करभगवत्पादं प्रति भट्टपादकृतावज्ञा श्रीमदाचार्यावतारस्य धर्मसंस्थापनार्थमनावश्यकता श्रीमद्विद्यारण्यवाक्यान्युद्धृत्य प्रसाधिता तन्न, विद्यारण्यकृतशाङ्करदिग्विजयविरोधात् । तथा हि—

एकदा देवता रूप्याचलस्थमुपतस्थिरे ।
देवदेवं तुषारांशुमिव पूर्वाचलस्थितम् ॥

प्रसादानुमितस्वार्थसिद्धयः प्रणिपत्य तम् ।
मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ॥

PDF Compressor Free Version

विज्ञातमेव भगवन् विद्यते यद्धिताय नः ।
वञ्चयन् सुगतान् बुद्धवपुर्धारी जनार्दनः ॥

तत्प्रणीतागमालम्बैर्बौद्धैर्दर्शनदूषकैः ।
व्याप्तेदानीं प्रभो धात्री रात्रिः सन्तमसैरिव ॥

वर्णाश्रमसमाचारान् द्विषन्ति ब्रह्मविद्विषः ।
ब्रुवन्त्याम्नायवचसां जीविकामात्रतां प्रभो ॥

न सन्ध्यादीनि कर्माणि न्यासं वा न कदाचन ।
करोति मनुजः कश्चित् सर्वे पाखण्डतां गताः ॥

श्रुते पिदधति श्रोत्रे क्रतुरित्यक्षरद्वये ।
क्रियाः कथं प्रवर्तेरन् कथं क्रतुभुजो वयम् ॥

शिवविष्ण्वागमपरैर्लिङ्गचक्रादिचिह्नितैः ।
पाखण्डैः कर्म संन्यस्तं कारुण्यमिव दुर्जनैः ॥

अनन्येनैव भावेन गच्छन्त्युत्तमपूरुषम् ।
श्रुतिः साध्वी मदक्षीबैः का वा शाक्यैर्न दूषिता ॥

सद्यः कृत्तद्विजशिरःपङ्कजार्चितभैरवैः ।
न ध्वस्ता लोकमर्यादा का वा कापालिकाधमैः ॥

अन्येऽपि बहवो मार्गाः सन्ति भूमौ सकण्टकाः ।
जनैर्येषु पदं दत्त्वा दुरन्तं दुःखमाप्यते ॥

तद्भवाँल्लोकरक्षार्थमुत्साद्य निखिलान् खलान् ।
वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥

इत्युक्त्वोपरतान् देवानुवाच गिरिजाप्रियः ।
मनोरथं पूरयिष्ये मानुष्यमवलम्ब्य वः ॥

दुष्टाचारविनाशाय धर्मसंस्थापनाय च ।
भाष्यं कुर्वन् ब्रह्मसूत्रतात्पर्यार्थविनिर्णयम् ॥

PDF Compressor Free Version

मोहनप्रकृतिद्वैतध्वान्तमध्याह्नभानुभिः ।
चतुर्भिः सहितः शिष्यैश्चतुरैर्हरिवद्भुजैः ॥

यतीन्द्रः शंकरो नाम्ना भविष्यामि महीतले ।
मद्वत्तथा भवन्तोऽपि मानुषीं तनुमाश्रिताः ॥

तं मामनुसरिष्यन्ति सर्वे त्रिदिववासिनः ।
तदा मनोरथः पूर्णो भवतां स्यान्न संशयः ॥

ब्रुवन्नेवं दिविषदः कटाक्षाननन्यदुर्लभान् ।
कुमारे निदधे भानुः किरणानिव पङ्कजे ॥

क्षीरनीरनिधेर्वीचीसचिवान् प्राप्य तान् गुहः ।
कटाक्षान् मुमुदे रश्मीनुदन्वानैन्दवानिव ॥

अवदन्नन्दनं स्कन्दममन्दं चन्द्रशेखरः ।
दन्तचन्द्रातपानन्दिवृन्दारकचकोरकः ॥

शृणु सौम्य वचः श्रेयो जगदुद्धारगोचरम् ।
काण्डत्रयात्मके वेदे प्रोद्धृते स्याद्द्विजोद्धृतिः ॥

तद्रक्षणे रक्षितं स्यात् सकलं जगतीतलम् ।
तदधीनत्वतो वर्णाश्रमधर्मततेस्ततः ॥

इदानीमिदमुद्धार्यमितिवृत्तिमतः पुरा ।
मम गूढाशयविदौ विष्णुशेषौ समीपगौ ॥

मध्यमं काण्डमुद्धर्तुमनुज्ञातौ मयैव तौ ।
अवतीर्यांशतो भूमौ संकर्षणपतञ्जली ॥

मुनी भूत्वा मुदोपास्तियोगकाण्डकृतौ स्थितौ ।
अग्रिमं ज्ञानकाण्डं तूद्धरिष्यामीति देवताः ॥

PDF Compressor Free Version

संप्रति प्रतिजाने स्म जानात्येव भवानपि ।
जैमिनीयनयाम्भोधेः शरत्पर्वशशी भव ॥

विशिष्टं कर्मकाण्डं त्वमुद्धर ब्रह्मणः कृते ।
सुब्रह्मण्य इति ख्यातिं गमिष्यसि ततोऽधुना ॥

नैगमीं कुरु मर्यादामवतीर्य महीतले ।
निर्जित्य सौगतान् सर्वानाम्नायार्थविरोधिनः ॥

ब्रह्मापि ते सहायार्थं मण्डनो नाम भूसुरः ।
भविष्यति महेन्द्रोऽपि सुधन्वा नाम भूमिपः ॥

तथेति प्रतिजग्राह विधेरपि विधायिनीम् ।
बुधानीकपतिर्वाणीं सुधाधारामिव प्रभोः ॥

अथेन्द्रो नृपतिर्भूत्वा प्रजा धर्मेण पालयन् ।
दिवं चकार पृथिवीं स्वपुरीममरावतीम् ॥

सर्वज्ञोऽप्यसतां शास्त्रे कृत्रिमश्रद्धयान्वितः ।
प्रतीक्षमाणः क्रौञ्चारिं मेलयामास सौगतान् ॥

ततः स तारकारातिरजनिष्ट महीतले ।
भट्टपादाभिधा यस्य भूषा दिक्सुदृशामभूत् ॥

स्फुटयन् वेदतात्पर्यमभाज्जैमिनिसूत्रितम् ।
सहस्रांशुरिवानूरुव्यञ्जितं भासयञ्जगत् ॥

तदेवमित्थं सुगतादधीत्य प्राघातयं तत्कुलमेव पूर्वम् ।
जैमिन्युपज्ञेऽभिनिविष्टचेताः शास्त्रे निरास्थं परमेश्वरं च ॥

भट्टपादानां श्रीमदाचार्ये कीदृशी श्रद्धासीत्, तदाह—

दोषद्वयस्यास्य चिकीर्षुरर्हन् यथोदितां निष्कृतिमाश्रयाशम् ।
प्राविक्षमेषा पुनरुक्तभूता जाता भवत्पादनिरीक्षणेन ॥

PDF Compressor Free Version

भाष्यं प्रणीतं भवतेति योगिन्नाकर्ण्य तत्रापि विधाय वृत्तिम् ।
यशोऽधिगच्छयेमिति स्म वाञ्छा स्थिता पुरा सम्प्रति किं तदुक्त्या ॥

जाने भवन्तमहमार्यजनार्थजातमद्वैतरक्षणकृते विहितावतारम् ।
प्रागेव चेन्नयनवर्त्म कृतार्थयेथाः पापक्षयाय न तदेदृशमाचरिष्यम् ॥

प्रायोऽधुना तदुभयप्रभवाघशान्त्यै
प्राविक्षमार्य तुषपावकमात्तदीक्षः ।
भाग्यं न मेऽजनि हि शाबरभाष्यवक्त्र-
द्भाष्येऽपि किंचन विलिख्य यशोऽधिगन्तुम् ॥

इत्यूचिवांसमथ भट्टकुमारिलं त-
मीषद्विकस्वरमुखाम्बुजमाह मौनी ।
श्रुत्यर्थकर्मविमुखान् सुगतान्निहन्तुं
जातं गुहं भुवि भवन्तमहं तु जाने ॥

संभावनापि भवतो न हि पातकस्य
सत्यं व्रतं चरसि सज्जनशिक्षणाय ।
उज्जीवयामि करकाम्बुकणोक्षणेन
भाष्येऽपि मे रचय वार्तिकमङ्ग भव्यम् ॥

इत्यूचिवांसं विबुधावतंसं स धर्मविद्ब्रह्मविदां वरेण्यम् ।
विद्याधनः शान्तिधनाग्रगण्यं सप्रश्रयं वाचमुवाच भूयः ॥

नार्हामि शुद्धमपि लोकविरुद्धकृत्यं
कर्तुं मयीड्य महितोक्तिरियं तवार्हा ।
आजानतोऽतिकुटिलेऽपि जने महान्त-
स्त्वारोपयन्ति हि गुणं धनुषीव शूराः ॥

संजीवनाय चिरकालमृतस्य च त्वं
शक्तोऽसि शङ्कर दयोर्मिलदृष्टिपतैः ।

PDF Compressor Free Version

आरब्धमेतदधुना व्रतमागमोक्तं
मुञ्चन् सतां न भवितास्मि बुधाविनिन्द्यः ॥

जाने तवाहं भगवन् प्रभावं संहृत्य भूतानि पुनर्यथावत् ।
स्रष्टुं समर्थोऽसि तथाविधो मामुज्जीवयेच्चेदिह किं विचित्रम् ॥

नाभ्युत्सहे किन्तु यतिक्षितीन्द्र संकल्पितं हातुमिदं व्रताग्र्यम् ।
तत्तारकं देशिकवर्य मह्यमादिश्य तद्ब्रह्म कृतार्थयेथाः ॥

अयं च पन्था यदि ते प्रकाश्यः सुधीश्वरो मण्डनमिश्रशर्मा ।
दिगन्तविश्रान्तयशा विजेयो यस्मिन् जिते सर्वमिदं जितं स्यात् ॥

सदा वदन् योगपदं च साम्प्रतं स विश्वरूपः प्रथितो महीतले ।
महागृही वैदिककर्मतत्परः प्रवृत्तिशास्त्रे निरतः सुकर्मठः ॥

निवृत्तिशास्त्रे नकृतादरः स्वयं केनाप्युपायेन वशं स नीयताम् ।
वशं गते तत्र भवेन्मनोरथस्तदन्तिकं गच्छतु मा चिरं भवान् ॥

यदपि श्रीमदाचार्यैः तप्तमुद्रादिधारणमङ्गीक्रियते इति तन्न, प्राचीनशांकरजये तन्निराकरणदर्शनात् । प्राचीनशांकरजयस्योद्धरणं यत्तप्तमुद्रादिधारणविषयकानुमतिप्रदर्शनाय स्वग्रन्थे क्रियते तत् प्राचीनशांकरजये नैवोपलभ्यते । केवलं मूढजनप्रतारणायैव सर्वज्ञशिरोमणेर्भगवतोऽशङ्कमानस्य दुःसाहसमिदम् ।

सर्वलोकात्मिका तस्य विष्णोश्चिह्नस्य धारणम् ।
समर्थश्चेत् कुरुष्वाशु तप्तेनैकेन वा दृढम् ॥

शीर्षादिपादपर्यन्तं देहमङ्कय नाशतः ।
विभूतिमूर्तयस्तस्य मत्स्याद्याः परिकीर्तिताः ॥

तप्तलोहमयीभिर्वै ताभिरङ्कय देहकम् ॥

PDF Compressor Free Version

इत्यादिना भागवतखण्डनावसरे तैरेव निराकृतत्वात् । वेदाविरुद्धमभिगमनादिकमेवाङ्गीक्रियते । तप्तमुद्रादिधारणविषये तु निर्णयसिन्धुकाराः मतद्वयमुपन्यस्य पृथिवीचन्द्रोदयादिकाराशयमित्थमाहुः—विष्ण्वाश्वलायनादिवचनात् ऋग्वेदादिश्रुतीनामन्यार्थत्वात्, अन्यश्रुतीनां चासत्त्वात् चक्रादिधारणं शूद्रविषयमिति । यद्यपि निषेधस्य प्राप्तिसापेक्षत्वाद्विधिं विना च तदयोगादुपजीव्यविरोधेन 'न तौ पशौ करोति' इतिवद्विकल्पो युक्तः; तथापि 'एकजातेरयं धर्मः' इत्यनेन विधिवाक्यानामुपसंहारात् । द्विजातिनिषेधो नित्यानुवाद इति तदाशयः । निम्बार्कानुयायिनो विष्णुस्वामितन्मतवर्तिवल्लभाचार्यानुयायिनश्च चक्रादिमुद्राङ्कनस्य विधानान्निषेधाच्च शीतलमुद्रादिधारणं विधिविषयः । तप्तमुद्रादिधारणं निषेधविषय इत्याहुः । अत्र शिष्टाचार एव संकटपाशनिःसरणसृणिरिति निर्णयसिन्धुकाराः । तस्माद्वृथैव स्वपक्षपोषकेऽपि व्याख्याने दोषमुद्भाव्य व्यामोहात् कलहबीजारोपणम् । अस्मिन्नेव च पक्षे साक्षात् परम्परया वा बाह्यानां वैदिकानां च सुखेनान्तर्भावः द्वैतविशिष्टाद्वैतद्वैताद्वैतशुद्धाद्वैतसिद्धान्ता अपि सोपानारोहक्रमेण निर्विशेषाद्वैत एव पर्यवस्यन्ति ॥

अन्यथा सुन्दोपसुन्दन्यायेन परस्परव्याहतत्वान्न कश्चिदपि सिद्धान्तः सुस्थः स्यात् । आस्तां बाह्यानां कथा तत्तद्देवावतारत्वेन तत्तद्बाद्यभिमतानां वैदिकानामपि मात्सर्यादिदोषशून्यानाम् 'प्रमाणं परमं श्रुतिः' इत्युद्घुष्यतां कथमतात्त्विकनिष्प्रयोजनासिद्धान्तस्थापने प्रयासः संभाव्येत । ननु तथापि कथमत्यन्तविरोधिनां द्वैताद्वैतादिसिद्धान्तानां साक्षात् परम्परया वा सामञ्जस्यमेकत्र संभाव्यते यतो द्वैताद्वैतयोस्तमःप्रकाशस्वभावयोः दहनतुहिनयोरिव वा सामञ्जस्यं दुःशकमिति चेत् शृणुत प्रत्यक्षैकसमधिगम्यदृष्टार्थमेव

PDF Compressor Free Version

अभ्युपगच्छतां तदतिरिक्तस्यास्तित्वमपह्नुवानानां लौकायतिकानामपि प्रत्यक्षादिसिद्धं दृश्यमात्रं परमार्थसत्तया किञ्चिदप्यनभ्युपगम्य, अचिन्त्याऽव्यक्ताऽव्यवहार्यपरमतत्त्वमेव सर्वस्वमित्यभ्युपगच्छद्भिरद्वैतिभिरविरोधः परम्परया यदा सुसंपादस्तदा वेदैकसमधिगम्यतत्त्वे श्रद्धावतां द्वैतिनां तैरविरोधस्तु सुतरां संगच्छते । तथा च यद्यपि द्वैते तन्निषेधरूपस्याद्वैतस्य नान्तर्भावसंभवः, तथाप्यद्वैते द्वैतस्यान्तर्भावः सुसमञ्जसः । यथा चैकस्माद्बीजाद्बहूनि फलादीनि सागरात्तरङ्गादीनि मृत्तिकायाश्च घटशरावाद्यमत्राणि जायन्ते एवमेव 'एकोऽहं बहु स्याम्' इति श्रुत्या एकस्य बहुभवनं श्रूयते कार्यस्य कारणात्मकत्वात्तत्र कार्यस्य सुखेनान्तर्भावः ॥

अनन्तकोटिब्रह्माण्डगतविविधवैचित्र्योपेतभोग्यभोक्तृकर्तृकरणादिनिर्माणपटीयस्याचिन्त्यानिर्वाच्यकार्यानुमेयस्वानुरूपरूपया श्रुतिसमधिगम्ययाथातथ्यभावया अवान्तरानन्तशक्तिकेन्द्रभूतमहाशक्त्या प्रत्यस्तमिताशेषविशेषमनोवचनातीतप्रज्ञानानन्दघनस्य स्वमहिमप्रतिष्ठमेव परमार्थतत्त्वं नानोपाधिवशात् सकलविरुद्धधर्माश्रयसर्वविकल्पास्पदं भवति, यथा नीलपीतहरितकाचाद्युपाधियोगेन प्रदीपप्रकाशः तत्तदाकारतामापद्यते, यथा वा स्वसंनिहितस्वच्छातिस्वच्छतारतम्योपेतबहुसंख्यकाचाद्युपाधिसंसर्गात् प्रदीपशिखा तारतम्येन तत्र तत्र तदाकारतया अभिव्यज्यते तद्वत् आनन्दमयादिदेहान्तोपाधिसंसर्गादानन्दमयाद्याकाराकारितमेव न भवति, अपि तु तत्तदिन्द्रियमुखेन संसृष्टपुत्रकलत्राद्याकाराकारितमपि भवति ; उपाधिसंसर्गात्तदुपहितस्योपाधिस्वरूपता स्फटिकादौ प्रसिद्धा अतः तत्तदुपाधिसंबन्धात्तद्भावापन्नस्य आत्मनो आनन्दमयादिपुत्रान्तस्वरूपेण श्रुतिषु निर्देशः, तदित्थं

PDF Compressor Free Version

सकलविभ्रमास्पदे नानाविधा वादिविप्रतिपत्तयः स्वमतिवैभवानुसारेण तत्त्वप्रतिपत्तयश्च भवन्ति । एवं सकलविरुद्धधर्माश्रयस्य सकलवादिविप्रतिपत्तिविषयस्य विविधस्वरूपस्य सोपानारोहक्रमेण परमतत्त्वप्रतिपत्तये मातृपितृशतादपि हितैषिणी श्रुतिस्ता अनुवदति। पुत्राद्यात्मभावव्यावृत्तये अन्नमयात्मवादोऽपि उपयुज्यते ; एवं देहात्मभावव्यावृत्त्यर्थं प्राणात्मभावोपदेशः प्राणात्मभावव्यावृत्त्यर्थमेव मनोमयात्मभावोपदेशः ; मनोमयात्मभावव्यावृत्तये चाभासान्वितक्षणिकबुद्धिवृत्तिसंततौ तन्निर्वाणे शून्याभिमानिनामपि वादाः कासुचित् कक्ष्यासूपयुज्यन्ते । एवं सङ्घातातिरिक्तदेहपरिमाणपरमितात्मास्तित्वमुपगच्छतां विसिचामपि पक्षः पूर्वप्रातिपन्नात्मभावापनुत्तये युज्यते । नैयायिकवैशेषिकास्तु लौकिकवैदिकसकलव्यवहारोपयुक्तप्रमाणादिपदार्थसङ्घातातिरिक्तसर्वगतात्मादिसाधनेन परमतत्त्वप्रतिपत्तये परमोपकारकाः । सांख्यास्तु प्रकृतिपुरुषयोः क्षीरनीरयोरिव संभिन्नयोरन्यताख्यापनेन व्यापकस्यात्मनोऽसंगत्वं स्वप्रकाशचिदात्मकत्वं चोपदिशन्ति । योगिनस्ततोऽपि भिन्नं क्लेशकर्मविपाकाशयैरपरामृष्टं नित्यशुद्धबुद्धमुक्तस्वभावं परमपुषार्थहेतुत्वेन समुपास्यतया प्रसाध्य तदुपासनप्रकारं वर्णयन्ति । पूर्वमीमांसकाः परमरहस्यभगवदाराधनात्मकवैदिककर्मतत्स्वरूपप्रकारादिनिर्णयेनात्यन्तमेवोत्तमर्णाः ॥

अत्रेदं बोद्धव्यम्—

सर्वेषामपि दार्शनिकानां स्वकीयेऽसाधारणविषय एव परमतात्पर्यम् । तेनैव चाविरोधोऽपि संपादनीयः, इतरांशे तेषां तात्पर्यप्राधान्याभावात् विरोधस्यापरिहार्यत्वेऽपि न क्षतिः । तत्तद्दार्शनिकपरमतात्पर्यविषय एवाविरुद्धत्वेनोपयुक्तत्वात् ग्राह्यः । अग्राह्यश्चेतरां-

PDF Compressor Free Version

क्षोऽतथात्वात्, यथा वैशेषिकनैयायिकाः सर्वांशमुपपादयन्तोऽपि प्रमाणनिरूपणं परमतात्पर्यविषयतया कुर्वन्ति इति प्रमाणशास्त्रनिर्मातृत्वेन प्रमाणज्ञा इत्युच्यन्ते। पूर्वोत्तरमीमांसयोश्चानेकार्थावभासकत्वेऽपि वाक्यशास्त्रमित्येव व्यपदेशः, व्याकरणशास्त्रस्यापि पदशास्त्रत्वमेवेति परीक्षकप्रसिद्धिः; येषां येषां परीक्षकाणामाचार्यैः अपूर्वतत्त्वप्रतिपित्सयासाधारण्येन धारणाध्यानसमाधयः कृताः तेषां तद्विषयिणी प्रतिपत्तिः प्रमा भवति। तत्रैव तेषामसाधारण्येन मान्यता। यत्र च साधारणे विषये धारणादयो न कृतास्तत्र तेषां गौणतात्पर्यत्वाद्विरोधे त्याज्यतैव। दृश्यते च पदशास्त्रस्यासाधारणविषयो वादिभिः सर्वैरुपादीयमानः वाक्यशास्त्रस्याप्यसाधारणविषयोऽन्यैरप्युपादीयमानः। तदास्तां प्रसक्तानुप्रसक्त्या। प्रकृतमनुसरामः। उत्तरमीमांसाद्वैतभाष्यकाराः

'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।'

इति परमतत्त्वयाथात्म्यप्राप्तिपत्त्यसाधारणहेतुभूततदीयानुरक्तितदुपयुक्तानन्तकल्याणगुणगणनिलयमुपास्यस्वरूपमुपपाद्य तदभिन्नमुपासकस्वरूपं निर्धारयन्ति। विशिष्टाद्वैतिनस्तु प्रतिपत्तृप्रतिपत्तव्ययोर्गुणगुणिनोरिव सम्बन्धविशेषमनुरक्तिविशेषासिद्ध्यर्थम्, अद्वैतवादिनीनां श्रुतीनामनादरनिरासार्थं कृतप्रयत्नाः। द्वैताद्वैतिनः 'अन्योऽसावन्योऽहमस्मि इति न स वेद' इत्यादिश्रुत्यभिप्रायेण प्रतिपत्तृप्रतिपत्तव्ययोरभेदस्य प्रतिपत्तिसौष्ठवहेतुत्वेन भेदवदभेदस्यापि अनुपचरितत्त्वं साधयन्ति। शुद्धाद्वैतिनो ब्रह्मव्यतिरिक्तस्य तत्त्वान्तरस्य परमतत्त्वपूर्णताप्रतिपत्तिप्रतिहतिहेतुत्वेन तस्यास्तित्वमपनोद्य शुद्धाद्वैतसिद्धान्तं व्यवस्थापयन्ति। यद्यपि चास्मिन् पक्षे भगवदीयस्यात्मवैभवेनाद्वैततत्त्वस्यैव 'एकोऽहं

PDF Compressor Free Version

बहु स्याम्' इत्यनुरोधात् बहुभवनमाश्रित्य लौकिकवैदिक-समस्तव्यवहाराः सूपपद्यन्ते, तथापि कूटस्थस्याविकारिणो वस्तुनः कथञ्चिदपि बहुभावः, अजस्य च जायमानत्वं न सम्भवति इति 'सबाह्याभ्यन्तरे ह्यजे सजातीयादिभेदत्रयशून्ये' स्वप्रकाशप्रज्ञानानन्द-घने 'अजायमानो बहुधाभ्यजात' 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्याद्यनुरोधाच्चाचिन्त्यानिर्वाच्यस्वात्मशक्त्यैव तत् संपादनीय-मित्यद्वैतिनः ॥

एवं प्रेक्षावतां सूक्ष्मेक्षिकया पर्यालोच्यमाने सर्वे पक्षाः स्वस्वप्रधानांशे अविरुध्यमानाः क्रमशोऽद्वैताभिमुखा अभिसरन्ति, तदा को नाम विवादावसरः ॥

द्वैतिनाम्, श्रीमद्भगवच्चरणपङ्कजपरागसंदोहास्वादनाभिरतिः परमतात्पर्यविषयीभूता । सा चाद्वैतिभिरप्याद्रियते । व्यावहारिक-पारमार्थिकभेदेन द्वैताद्वैतयोरुभयोरप्यस्मिन् पक्षे सामञ्जस्यम् ॥

न चाद्वैतस्य व्यावहारिकत्वमिति वक्तुं युक्तम्, अव्यवहार्य-त्वात् । प्रपञ्चस्य मिथ्यात्वमपि नात्यन्तासत्त्वाभिप्रायेण ; किन्तु सकलशास्त्रपरमतात्पर्यविषयीभूतत्रिकालाबाध्यपरमतत्त्वसत्तापेक्षया किञ्चिन्न्यूनसत्ताकत्वमेवेति वक्ष्यते ॥

सर्वेषां शास्त्राणां परमतात्पर्यविषयः परं ब्रह्मैव, 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिश्रुति-स्मृतिभ्यः ; इतरच्च परमतत्त्वप्रतिपत्त्यङ्गत्वेनावन्तरतात्पर्यविषय एवेति मन्तव्यम् ॥

मिथ्याभूतमपि द्वैतं श्रौतस्मार्तधर्मानुष्ठानतदाराधितभगव-च्चरणाम्बुजद्वन्द्वप्रसादलेशानुग्रहं विना नापनेतुं शक्यम् ॥

PDF Compressor Free Version

यद्यपि च सामान्यजनदृष्ट्या सत्यं न विभिद्यते, तथापि अध्यात्मशास्त्रपरिशीलिनां तत्र महद्वैलक्षण्यमाभाति । तदीय-दृष्ट्या वस्तुसत्त्वं विना कस्याप्यपरोक्षप्रतीतिर्न भवति । अत एव शुक्तिरूप्यादीनामपि तत्कालोत्पन्नप्रातिभासिकसत्ताकत्वमभि-धीयते तैः । गगनादीनां ततोऽप्यधिकसत्ताकत्वेन व्यवहारकाला-बाध्यत्वात् व्यावहारिकत्वम् । ततोऽप्यधिकसत्ताकत्वेन आत्मनः पारमार्थिकत्वमित्यपि वक्ष्यामः ॥

प्रपञ्चस्य च मिथ्यात्वम् 'तस्मादिदं जगदशेषमसत्स्वरूपम्' इति प्रमाणैः प्राचीनैरर्वाचीनैस्तुकारामज्ञानेश्वरतुलसीदासादिभिः परमभागवतैरप्यङ्गीकृतम् ॥

सूरदासहरिदासप्रभृतिभिः परमरसिकशिरोमणिभिरपि निःसारसंसारस्य सत्यत्वमसत्यत्वं वा अपरिगणय्य श्रीमन्नन्द-नन्दनपदारविन्दमकरन्दमधुव्रतैः तदीयभवभयहारिपरमपावनचरित्र-वर्णनेनैव कालो यापितः ॥

प्रेमतत्त्वं च व्यवधानासहिष्णुत्वेनाभेदानुगुणमेवेति न तदर्थमपि वास्तविकभेदकल्पनमावश्यकम् ॥

अत एव पुत्रवत्सला प्रियतमं शिशुं प्रेमातिशयेन देशादि-व्यवधानापनुत्तये पुनः पुनः परिष्वजति । प्रियतमा च प्रेष्ठ-व्यवधायकरोमाञ्चोद्गतिमपि सोढुं सीदति । तदभिप्रायेणैव क्रमशो व्यवधानापचिकीर्षया विशिष्टाद्वैतद्वैताद्वैतशुद्धाद्वैता इत्येते अभेदानु-गुण्येन पक्षाः स्थापिता आचार्यैः ॥

यत्र यावतांशेन प्रेमाधिक्यं तत्र तावतैवांशेनाभेदोऽभि-लष्यते । 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुत्यापि सर्वव्यवधानशून्ये स्वात्मन्येव सर्वातिशायी प्रेमा प्रदर्श्यते ॥

PDF Compressor Free Version

इतरेषु च यथायथं व्यवधानतारतम्येन तच्छेषतया प्रेम-तारतम्यं विश्वजनीनानुभवनिवेदितमेव ॥

देहादौ सन्निहिते प्रातिकूल्याचरणेन प्रियतमपुत्रकलत्रादय-स्त्यज्यन्ते । ततोऽप्यान्तरे मनोमये प्रतिकूल्यप्रयोजकदेहादिरपि शस्त्रादिभिश्छिद्यते । मनोऽपि विज्ञानमयप्रतिकूलतया निरुध्यते । एवमग्रेऽपि बोध्यम् ।

प्रतीच एव परप्रेमास्पदत्वेन परस्यापि तद्रूपत्वेनैव परप्रेमास्प-दत्वं युक्तम् । न च परस्य प्रतीचोऽपि प्रत्यक्त्वमिति वाच्यम्; प्रत्यक्त्वकल्पना यत्र विरम्यते, तस्यैव प्रत्यक्त्वाभ्युपगमात् । अन्यथा तत्रापि एवं तत्राप्येवमिति, अनवस्था, परस्य प्रतीचोऽ-भिन्नत्वानभ्युपगतौ पराक्त्वेनानात्मत्वप्रसङ्गाच्च तथैवाभ्युप-गन्तव्यम् ॥

अपि च 'रसो वै सः' इति श्रुतिसिद्धरसात्मकत्वमेव प्रेम्णो वक्तव्यम् । तथा च संचार्यादिभिर्द्रुतचेतसि निखिलरसा-मृतमूर्तिर्भगवानेवाभिव्यक्तः सन् प्रेमपदाभिलप्यो भवति ॥

तस्य चोक्तविधया स्वाश्रयविषययोर्व्यवधानासहिष्णुत्वस्वाभा-व्यमित्यत्रोचाम । किं च यथा रश्मिमालिनः समुद्भूता रश्मयस्था निरतिशयतया अव्यभिचारितया च स्वोद्गमस्थले रश्मिमालिन्येव स्यास्नवः, अन्यत्र सातिशयत्वव्यभिचारित्वाभ्यामेव, एवमेव सर्वान्तरतमप्रत्यगभिन्नपरमप्रेमास्पदनिखिलरसामृतसिन्धुसुधामयात् भगवतः समुपलब्धसत्ताकस्तन्मयः प्रेमा तत्रैव सम्यक् प्रतिष्ठितः । अन्यत्र तु तारतम्येन सातिशयत्वव्यभिचारित्वाभ्यामेव । यथा चैकस्मिन्नेव महत्यर्णवे वायवीयसंसर्गात् तरङ्गतरङ्गितत्संबन्धा

PDF Compressor Free Version

विलक्षणाः प्रतिभान्ति ; एवमेव सजातीयादिभेदत्रयशून्येऽनाद्यनन्ते सौख्यसुधासिन्धौ अनन्तब्रह्मादिसौख्यानि तुषारस्थानीयानि प्रादुर्भवन्ति । तत्रैवाचिन्त्यानिर्वाच्यपरमविशुद्धयाह्लादिन्याद्यात्मिकया शक्त्या स्वाश्रयविषयाभ्यां सह विकसति प्रेमा, स्वरूपतस्तदभिन्नोऽपि तरङ्गादिवदेवाद्भुतचमत्कारकारी निरुपमो विकासः स्वाभिवृद्ध्यर्थं स्वाश्रयविषययोर्विप्रयोगं यथापेक्षते ततोऽप्याधिक्येन संप्रयोगमपेक्षते अन्यथा तदुत्पत्तेरनुपपत्तेः ; संप्रयोगमपेक्ष्यैव विप्रयोगस्य रसाभिव्यञ्जकत्वाभ्युपगमात् । परोक्षे परस्मिन् तदसंभवेन प्रेम्ण एवानुदयापातात् । विप्रयोगाग्निसंतप्तस्य संप्रयोगामृतमन्तरा भावुकस्यावस्थानासम्भवाच्चाश्रयविषययोरभेदोऽभ्युपगन्तव्यः । एतावांस्तु विशेषः—बहिरङ्गा अल्पदर्शिनो देशकालव्यवधानस्यापनये सातिशयाव्यवधानेनैव तृप्यन्ति । अन्तरङ्गाः सहृदयभावुकास्तु देशकालवस्तुकृतस्याशेषव्यवधानस्य राहित्यं विना नैव तृप्यन्ति । रसात्मकस्य परस्य तादात्म्यापत्तिरेव संभोगः । यथा जलस्य रश्मितादात्म्यापत्तिरित्येवोपभोगः । स्वगोभिः स्वस्मिन्नन्तर्भाव एव रसस्यादित्योपभोग्यत्वमिति तद्वत् ॥

स्वात्मसमर्पणमपि स्थूलदर्शिनो वित्तकलत्रादिस्वात्मव्यतिरिक्तसमर्पणेनैव मन्यन्ते । सहृदया रसिकशिरोमणयश्च अपरिच्छिन्नस्वप्रकाशपरमतत्त्वेऽनेकानर्थोपप्लुतजीवभावकल्पनायाः स्वप्रकाशात्मके सवितरि तमएकदेशकल्पनाया इवानौचित्यं मन्वानाः प्रियतमपूर्णत्वप्रतिबन्धकत्वेन स्वात्मानमपि तत्रैव समर्पयन्ति ॥

ननु सगुणस्य मिथ्यात्वेनास्मिन् सिद्धान्तेऽश्रद्धेयत्वेन कथं परानुरक्तिरिति चेन्न ; यथा पूर्णस्य चन्द्रमसः प्रादुर्भावनिमित्तत्वमेव प्राच्याः, तद्वदेवाचिन्त्यविशुद्धसत्त्वस्य निमित्तत्वेन पूर्णस्यैव तद्रूपेण प्रतिभानात् । मिथ्यात्वमपि 'सविशेषणे हि विधि-

प्रतिषेधौ विशेषणमुपसंक्रामतः' इति न्यायेन 'शिखी ध्वस्तः' इतिवत् विशेषण एव पर्यवस्यति । यथा चार्चिः शिखाकारेण प्रादुर्भूतावेव वर्तिकादीनां निमित्तत्वमेव, न तु स्वरूपेणोपादानत्वादिकमिति । तद्वदेव विशुद्धतत्त्वमाश्रित्य निर्गुणस्य गुणात्मकत्वम्, मिथ्यात्वमपि व्यावहारिकत्वमेव । तत्र च यथा पार्थिवत्वाविशेषेऽपि लोष्टहीरकयोर्वैलक्षण्यं तथैव व्यावहारिकत्वाविशेषेऽपि जगदुपादानभूतमायाशक्त्यपेक्षया अनन्तसौन्दर्यमाधुर्यकारुण्यसुधासिन्धुभगवदीयमङ्गलमूर्तिस्वरूपेण विकारानिमित्तं महद्वैलक्षण्यम् । यथा चास्वच्छमेघादियोगेन सवितृस्वरूपमाच्छाद्यते यद्यपि, तथापि परमविशुद्धदूरवीक्षणकाचादियोगेन सवितृस्वरूपं न नाच्छाद्यत इत्येव, किन्तु पूर्वापेक्षयाप्याधिक्येन प्रस्फुरति ; एवमेवाचिन्त्यविशुद्धशक्तियोगेन परमतत्त्वमनावृतमित्येव न, किन्तु शुकसनकादिमुनीन्द्रमनोमिलिन्दप्रेमसौरभामोदितदिगन्तविग्रहात्मना प्रादुर्भवति । किं बहुना ; अपरिमेयमहामहिमसौन्दर्यमाधुर्यसौकुमार्यादिसुधासीधुस्वरूपं मणिमयप्राङ्गणप्रतिबिम्बितं स्वरूपपानपात्रैरापीय मुग्धमनस्त्वेन स्वयमेव माद्यति । तदुक्तम्—

> रत्नस्थले जानुचरः कुमारः संक्रान्तमात्मीयमुखारविन्दम् ।
> आदातुकामस्तदलाभखेदाद्विलोक्य धात्रीवदनं रुरोद ॥

तादृशस्य परप्रेमास्पदस्य स्वेन व्यवधानासहिष्णुत्वेन चक्षुषि हृदि ततोऽप्यान्तरे वा रक्षणं समीहितम् । परं तस्याशक्यत्वादेव रोदनमिति भावः । अन्यदपि समन्वयाभिलाषुका वैलक्षण्यं किञ्चिदभ्युपगच्छन्ति — यदेकतोऽचिन्त्यानन्तकल्याणगुणगणास्पदत्वमभ्युपगच्छन्ति, तदैवान्यतः सत्ताभेदेन निर्गुणं निष्क्रियमित्यनुरोधात् निर्गुणत्वादिकमपि परस्याभ्युपगच्छन्ति ॥

PDF Compressor Free Version

PDF Compressor Free Version

अन्ये तु सगुणस्यैव प्राकृतगुणगणराहित्याभिप्रायेण निर्गुणत्वमित्याहुः। केचित्तु आदित्यस्थानीयस्य सगुणतत्त्वस्यातपस्थानीयं निर्गुणमिति वदन्ति। तत्राद्वैतिनः—कल्याणगुणानां स्वाश्रये सौख्यमहत्त्वादिसंपादकत्वेनैवादरणीयता दृश्यते। अनन्तपदसमभिव्याहृतबृहत्त्वार्थकब्रह्मपदबोधितस्य परमतत्त्वस्य निरतिशयसौख्यमहत्त्वास्पदत्वं पर्यवस्यति—इति। अयमभिप्रायः—सर्वे ब्राह्मणा भोजयितव्या इत्यत्रेव संकोचकाभावात् ब्रह्मपदस्य सर्वातिशायिबृहत्त्वमित्यर्थस्तावल्लभ्यते, तच्च देशकालपरिच्छिन्ने तावन्नोपपद्यते, संसर्गाभावत्रयप्रतियोगित्वेन तदनुपपत्तेः; नापि अन्योन्याभावप्रतियोगिनि वस्तुपरिच्छिन्ने निरतिशयबृहत्त्वं संभाव्यते; परिच्छिन्नत्वादेव। किञ्च तस्यान्योन्याभावप्रतियोगित्वे क्वचिदपि देशे तद्व्यतिरिक्तस्य स्थितिर्न वक्तुं शक्यते। देशकालयोश्चापि वस्तुत्वाविशेषात् क्वचित् स्थितिर्वक्तव्या। सा च नात्मनि, तस्य निरवकाशात्मकत्वात्। सावकाशे ह्यन्यस्मिन्नाकाशादौ अन्यस्य स्थितिः सम्भाव्यते; नानवकाशात्मके स्फटिकशिलादौ। ब्रह्म चिदानन्दघनत्वेनावकाशशून्यमेव। यदपि च स्फटिकादावपि सावयवत्वेन कथञ्चिदवकाशः कल्पयितुमपि शक्यते, तथापि निरवयवे ब्रह्मणि तदप्यशक्यचोद्यम्। असङ्गत्वाच्च तत्र नान्यदीया स्थितिः सम्भवति। नाप्यन्यत्र, तद्रहितदेशादेरेवाभावात्॥

एवमादित्यस्थानीयं सगुणतत्त्वं यद्यातपस्थानीयनिर्गुणप्रदेशेऽपि निरतिशयभावेन विद्यते न वा, आद्ये परिच्छिन्नत्वापत्तिः। यदि च निरतिशयरूपेण सार्वत्रिकं तत् तदा नाममात्रे विवादः, यतो यत्रैवातिशयताकल्पनं विरम्यते तस्यैव निर्गुणत्वमभ्युपेयते वेदवादिभिः। तस्मात् परमतत्त्वे गुणादिकृतस्यातिशयस्य कल्पनाया अप्यसंभवात्। स्वभावतो निर्गुणे स्वप्रकाशपरमानन्दघने तत्प्रयोजनराहित्येऽपि

PDF Compressor Free Version

अचिन्त्यानिर्वाच्यानन्तकल्याणगुणगणाः स्वस्य गुणत्वमहत्त्व-कल्याणरूपत्वादिसिद्धये समाश्रिता भूत्वा भगवन्तं भजन्ति ॥ तदुक्तं श्रीमुखेनैव—

'निर्गुणं मां गुणाः सर्वे भजन्ति निरपेक्षकम् ।' इति ।

तदित्थं सर्वरूपप्रत्यगभिन्नप्रज्ञानानन्दघने निर्गुणे निरपेक्षे स्वात्म-भावेन परिनिष्ठिता अपि रसज्ञा अपरिगणितकन्दर्पदर्पदलनपटीयसः सौन्दर्यादिसुधामयस्य मुनिमनोमोहकं माधुर्यमास्वादयन्ति ॥

ब्रह्मवादिशून्यवादिनोर्वैलक्षण्यप्रदर्शनाय तावत् सर्वसामयिक-निरूढः सौगतसिद्धान्तः संक्षेपतो निर्दिश्यते—

सौगताः खलु चतुर्विधाः । केचित् पार्थिवाप्यतैजस-वायवीयपरमाणुसङ्घातरूपान् भूतभौतिकान् बाह्यान्, चित्तचैत्य-रूपांश्चाभ्यन्तरानर्थान् स्वीकुर्वन्ति । केचित् बाह्यानां प्रत्यक्षाग्राह्य-त्वेऽपि एकस्वरूपस्य विज्ञानस्य वैलक्षण्यानुपपत्त्या तद्धेतुत्वेनानु-मितानर्थान् ज्ञानानि चाभ्युपयन्ति । अपरे तु अर्थशून्यं विज्ञानमेव परमार्थः, बाह्यार्थास्तु स्वप्नादिवदसन्त एवेति । सर्वेऽप्येते स्वाभ्युपगतं वस्तु क्षणिकमाचक्षते ॥

अन्ये माध्यमिकास्तु सर्वशून्यत्वमेव संगिरन्ते । तत्र शून्यवादिनोऽसदात्मकमेव शून्यमभ्युपगच्छन्ति, ज्ञानानन्दात्मकं वेति विचारणीयम् । तत्र

'केवलां संविदं स्वच्छां मन्यन्ते मध्यमाः पुनः'

'मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परां संविदम्' इत्यादिवचनानुसारेण यद्यपि शून्यस्य सत्संविदात्मकतैव प्रतीयते; न तदपि सर्वाभावसाधकम्; 'नास्ति बुद्धिरपीत्याह' इत्यपि साकारबुद्ध्यभावाभिप्रायमित्युच्यते; तथापि स्वप्रकाशात्मकस्य

PDF Compressor Free Version

सवितुर्यथा अन्धकारस्वरूपत्वं न वक्तुं शक्यते तद्वदेव स्वप्रकाशात्मिकायां संविदि सत्यां शून्यतापदव्यपदेशोऽपि नोपपद्यते । शून्यपदस्याभावार्थकता दृश्यते च लोके, यथा मेघशून्यं नभः, जनशून्यो देश इति । तथा च शून्यवादी सर्वनास्तित्ववाद्येव ॥

न च कोटिचतुष्टयविनिर्मुक्तत्वाभिप्रायेण शून्यत्वं तस्येति वाच्यम्, तस्यापि तथात्वात् । स्वप्रकाशात्मिकायां संविदि मानाभावात् ॥

न चैवमद्वैतमपि तथैव किं न स्यादिति वाच्यम्, सतः सत्तायोगिलक्षणसतोऽतिरिक्तत्वेऽपि सद्रूपत्वात् । सद्बुद्धिविषयस्यैव सत्त्वं प्रसिद्धम्, आत्मतत्त्वं तु स्वप्रकाशात्मकत्वान्न सद्बुद्धिविषयः, नाप्यसद्बुद्धिविषयः, अपि तु अवेद्यः सन्नेवापरोक्षः । तदभिप्रायेणैव 'न सत्तन्नासदुच्यते' इत्याद्युक्तिः । तस्माच्छून्यवादस्य निरुपप्लुतसंविदेव शून्यमिति काचित् कक्ष्यैव, अन्यसिद्धान्तानुकरणमेव वा ॥

मोक्षश्चाद्वैतिनां ज्ञातत्वोपलक्षितो निरतिशयसच्चिदानन्दात्मक एव । निरुपप्लुतविज्ञानसन्ततिरूपमेव निर्वाणमिति विज्ञानवादिनः । तत्क्षयरूपा सर्वशून्यतेति शून्यवादिनः ॥

अत्रैव परीक्षकाणां संवादः प्रदर्श्यते—

'तत्रार्थशून्यविज्ञानं योगाचाराः समाश्रिताः ।
तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः ॥' (श्लो० वा०)

मोक्षश्च विचित्रवासनावशेन विचित्रनीलपीतादिरूपेण प्रवहतो ज्ञानसन्तानस्य निःशेषवासनोच्छेदान्नीलपीतादिवैचित्र्यं हित्वा केवलं संविन्मात्रेणावस्थानमिति विज्ञानवादिनो बौद्धाः (शा० दी०) । दीपसन्तानस्येव ज्ञानसंतानस्योपरम इति शून्यवादिनः

PDF Compressor Free Version

(शा० दी०)। निःशेषानर्थोपबर्हणपूर्वकं सत्यचिदानन्दात्मनावस्थान-मित्यौपनिषदाः ॥

श्रीमद्रामानुजाचार्यास्तु शून्यवादविषय इत्थं प्राहुः—'सर्वथानुपपत्तेश्च' इति सूत्रे शून्यवाद एव हि सुगतमतकाष्ठा। शिष्यबुद्धियोग्यतानुगुण्येनार्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः विज्ञानं बाह्यार्थाश्च न सन्ति शून्यमेव तत्त्वम्। अभावापत्तिरेव मोक्ष इत्येव बुद्धस्य अभिप्रायः। तदेव हि युक्तम्। शून्यस्याहेतुसाध्यतया स्वतः सिद्धेः। सत एव हेतुरन्वेषणीयः। तच्च सत् भावादभावाच्च नोत्पद्यते। भावात्तावन्न कस्यचिदुत्पत्तिर्दृष्टा। न हि घटादिरनुपमृदिते पिण्डादिके जायते। नाप्यभावादुत्पत्तिः सम्भवति, नष्टे पिण्डादिके ह्यभावादुत्पद्यमानं घटादिकमभावात्मकं स्यात्। तथा स्वतः परतश्चोत्पत्तिर्न सम्भवति। स्वतः स्वोत्पत्तावात्माश्रयदोषप्रसङ्गात्। परतः परोत्पत्तावविशेषात् सर्वेभ्यः सर्वेषामुत्पत्तिप्रसङ्गः स्यात्। जन्माभावादेव विनाशस्याभाव इति शून्यमेव शून्यवादिपक्षो न्यायभाष्ये तद्वार्तिके च इत्थं निर्दिष्टः—

'अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्'

(४ अ० १ आ० १४ सू०)

असतः सदुत्पद्यत इत्ययं पक्षः। कस्मात्? (उपमृद्य प्रादुर्भावात्) उपमृद्य बीजम् अङ्कुर उत्पद्यते नानुपमृद्य, न चेद्बीजोपमर्दः अङ्कुरकारणम्, (अविनष्टेऽपि बीजे) अङ्कुरोत्पत्तिः स्यात् ॥ (भा०)

अभावाद्भावो जायत इति कस्यचिद्दर्शनम्। तत्र न्यायं ब्रुवते—नानुपमृद्य प्रादुर्भावादिति। न किलाविनष्टे कारणे

PDF Compressor Free Version

कार्यमुत्पद्यत इति । यथा बीजविनाशोत्तरकालमङ्कुरः प्रादुर्भवति, यदि बीजाविनाशोऽङ्कुरकारणं नाभविष्यत् अविनष्टेऽपि बीजेऽङ्कुरोऽभविष्यत् । न चैवमस्ति । तस्माद्बीजविनाशोऽङ्कुरकारणमिति ॥ (वा०)

तत्र तावदेके प्राहुः—अभावाद्भावोत्पत्तिः । कुतः ? नानुपमृद्य प्रादुर्भावो यतः तस्मादित्यर्थः । विश्वं हि शून्यताया एव जायते । एवं किल श्रूयते 'असदेवेदमग्र आसीत्' इति । अत एवाद्यप्यसत एव जन्म दृश्यते, न सतः । तत्कस्य हेतोः ? अभावस्तस्य कारणमिति । उपलक्षणं चेदं नानुपमृद्य प्रादुर्भावादिति । असतः उत्पादादित्यपि द्रष्टव्यम् । तस्मादसदुपादानं विश्वमिति सिद्धम् ॥ (ता० टी०)

'सर्वमभावो भावेष्वितरेतराभावसिद्धेः ।'

(४ अ० १ आ० ३७ सू०)

यावद्भावजातं तत्सर्वमभावः । कस्मात् ? भावेष्वितरेतराभावसिद्धेः असन् गौरश्वात्मना, अनश्वो गौः, असन्नश्वो गवात्मना, अगौरश्वः इत्यसत्प्रत्ययस्य प्रतिषेधस्य च भावशब्देन सामानाधिकरण्यात् सर्वमभाव इति ॥ (भा०)

यावद्भावजातं तत्सर्वमभावः । कस्मात् ? भावेष्वितरेतराभावसिद्धेः । असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात् सर्वमभावोऽनुत्पन्नप्रध्वस्तपटवत् , सर्वो भावशब्दोऽसत्समानाधिकरणः प्रतिषेधसमानाधिकरणश्च प्रध्वस्तपटवत् , यथा नास्ति पट इति । कथं नास्ति, कदा च नास्तीति ? स्थाल्याद्यात्मनानुत्पद्यमानो ध्वस्तश्चेति सोऽयं घटशब्दोऽसत्प्रत्ययसमानाधिकरणो घटस्यात्यन्तासत्त्वं प्रतिपादयति । तथा च सर्वे भावा असत्प्रत्ययसमानाधिकरणाः, तस्मात् सर्वमभाव इति ॥ (वा०)

PDF Compressor Free Version

सर्वमभाव इति प्रतिज्ञा। अत्र हेतुर्भावेष्वितरेतराभावसिद्धेरिति। सर्वमिदं प्रमाणप्रमेयप्रमितिरूपमभावस्तुच्छम्। भावेष्वितरेतराभावसिद्धेरिति। वार्तिककारो व्याचष्टे—असत्प्रत्ययभावप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात्। प्रमाणादयः खल्वमी परस्परानात्मकतया असदिति प्रत्ययस्य नञश्च गोचरा इत्यनुभूयन्ते, अतस्तद्वाचिनां शब्दानां तत्सामानाधिकरण्यम्, ततः प्रमाणादयोऽसन्तः अनुत्पन्नप्रध्वस्तपटवत्। अपि चामी भावा नित्या अनित्या वा? नित्यत्वे सर्वसामर्थ्यरहितस्यासत्त्वम्। न हि नित्यं क्वचित् कार्य उपयुज्यते, क्रमाक्रमानुपपत्तेरित्युक्तम्। अनित्यत्वे तु विनाशस्वभावाश्चेत् द्वितीयादिक्षण इव प्रथमक्षणेऽपि न स्युः। सत्त्वे वा नामी विनाशस्वभावाः। अतत्स्वभावत्वे वा क्षणान्तरेऽपि न विनश्येयुः। नो खलु नीलं स्वकारणादुपजातं जातु कारणसहस्रैरपि शक्यं पीतं कर्तुमिति विनाशस्वभावकत्वमकामेनापि अनित्यानामेषितव्यम्। तस्माद्भावानां शून्यतैव पारमार्थिकी, कल्पनया त्ववस्तुसत्या सन्त इवावभासन्त इति युक्तमुत्पश्यामः। तथा च सर्वे भावा इति। सर्वे भावशब्दा इत्यर्थः। प्रयोगश्च सर्वे भावशब्दा असद्विषया असत्प्रत्ययप्रतिषेधाभ्यां सामानाधिकरण्यात् अनुत्पन्नप्रध्वस्तपटशब्दवत्॥

अत्र तावदुत्सूत्रं भाष्योक्तं दूषणं वार्तिककार आह—प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोश्च व्याघात इति। अभिन्नविभक्तिकत्वमभिन्नार्थकविभक्तिकत्वं न त्वभिन्नविभक्तिकत्वमेव। भिन्नविभक्तिकानामपि सामानाधिकरण्यात्। यथा चैत्रः पठतीति। यथा च न त्वां तृणाय मन्य इति। नासति तत्प्रत्ययेन भवितुमिति। न ह्यत्यन्तासन्निरुपाख्यं सर्वमिति वा भाव इति वाभिधानस्य गोचरः। उपपादितं हि द्वितीयसूत्र

PDF Compressor Free Version

एव यथासद्वानिर्वचनीयं वा न ख्यातिगोचरः, अपि तु सदेव सदन्तरात्मना, तथा च कुतोऽत्यन्तासतः कल्पनागोचरत्वमपीति । शेषं भाष्य इति । प्रतिज्ञाहेतोर्व्याघातो भाष्ये प्रपञ्चित इति ॥ (ता० टी०)

इदानीं माध्यमिकवृत्तिबोधिचर्यावतारपञ्जिकादिबौद्धग्रन्थानाश्रित्य स्वपरसिद्धान्तयोर्वैलक्षण्यमुच्यते—

शून्यवादिनो निःस्वभावोऽसन्नेवेति शून्यतामभ्युपगच्छन्ति ; अद्वैतिनस्तु स्वप्रकाशसदानन्दात्मकं ब्रह्मेति । सर्वाभावात्मकमेव शून्यमिति प्रदर्श्यते—

फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा ।
मरीचिसदृशीः संज्ञाः संस्कारा: कदलीनिभाः ॥
मायोपमं च विज्ञानमुक्तमादित्यबन्धुना ।
एवं धर्मान् वीक्षमाणो भिक्षुरारब्धवीर्यवान् ॥
दिवा वा यदि वा रात्रौ संप्रजानन् प्रतिस्मृतः ।
प्रतिविध्येत् पदं क्षान्तं संस्कारोपशमं शिवम् ॥

इत्यादिना ॥

यत्तु नित्यज्ञानरूपैव शून्यतेति, तन्न ; प्रथमतो निरालम्बनतासाधने प्रयासाधिक्यमिति तावदर्थशून्यं ज्ञानमेव भावनीयम् इति शून्यवादस्य काचित् कक्ष्यैव शून्यस्य ज्ञानरूपता, न शून्यस्य वस्तुतो ज्ञानरूपता । एतेन,

अजरामरविज्ञप्तिशून्यताद्वयलक्षणा ।
अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम् ॥

PDF Compressor Free Version

निर्ममो निरहङ्कारो यश्च सोऽपि न विद्यते ।
निर्ममं निरहङ्कारं यः पश्यति स पश्यति ॥

इत्यादिना शून्यस्य ज्ञानरूपत्वोक्तिः पराहता ॥

शून्यमाध्यात्मिकं पश्य पश्य शून्यं बहिर्गतम् ।
न विद्यते सोऽपि कश्चिद्यो भावयति शून्यताम् ॥

बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितम् ।

इत्यादिवचनविरोधात् ।

अपरप्रत्ययमित्यादीनां त्वयमर्थः—नास्मिन् परप्रत्ययोऽस्ति, इत्यपरप्रत्ययं परोपदेशागम्यं स्वयमेवाधिगन्तव्यमित्यर्थः । यथा हि तैमिरिकाः वितथं केशमशकमक्षिकादिरूपं पश्यन्तो वितिमिरोपदेशेनापि न शक्नुवन्ति केशानां यथावदवस्थितं स्वरूपं दर्शनन्यायेनाधिगन्तव्यमतैमिरिका इवाधिगन्तुम । किं तर्हि अतैमिरिकोपदेशात् मिथ्यैतादित्येतावन्मात्रकमेव प्रतिपद्यन्ते । यदा तु तिमिरोपघात्यविपरीतशून्यतादर्शनाञ्जनाञ्जितबुद्धिनयनाः सन्तः समुत्पन्नतत्त्वज्ञाना भवन्ति तदा तत्त्वमनाधिगमनयोगेन स्वयमधिगच्छन्तीति । एवमपरप्रत्ययं भावानां यत् स्वरूपं तत्तत्त्वम् ; एतच्च शान्तस्वभावमतैमिरिककेशादर्शनवत् स्वभाव-विरहितमित्यर्थः । अत एवैतत् प्रपञ्चैरप्रपञ्चितम् । प्रपञ्चो हि वाक् । प्रपञ्चयत्यर्थानिति कृत्वा । प्रपञ्चैरप्रपञ्चितं वाग्भिर-व्याहृतमित्यर्थः । निर्विकल्पं च तत्, विकल्पश्चित्तप्रचारः, तद्रहितत्वात्तत्त्वं निर्विकल्पं यथोक्तं परमार्थसत्यं कतमत् यत्र ज्ञानस्याप्यप्रचारः । नानार्थोऽस्येति नानार्थं भिन्नार्थं न नानार्थम् अनानार्थम् अभिन्नार्थम् इति । नानेनासत्त्वं शून्यस्य निवर्तते, किं तु सर्वाभावात्मकत्वमेव सिध्यति ॥

PDF Compressor Free Version

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतम् ॥
अनेकार्थमनानार्थमनुच्छेदमशाश्वतम् ।
एतत्तल्लोकनाथानां बुद्धानां शासनामृतम् ॥

यदपि चार्यसत्यपरीक्षाप्रकरणे, यदि शून्यमिदं सर्वमेव नास्ति तदा सर्वान्तःपातित्वाद्धर्माधर्मौ सह तद्धेतुकेनेष्टानिष्टफलेन न सम्भवतः । सर्व एव चामी लौकिका व्यवहाराः 'कुरूपचर खाद तिष्ठ' इत्येवमादयोऽपि सर्वान्तर्गतत्वात् सर्वधर्माणां च शून्यत्वान्नैव युज्यत इत्याक्षिप्य प्रतिक्षिप्तम् ;

अत्र ब्रूमः शून्यतायां न त्वं वेत्सि प्रयोजनम् ।
शून्यतां शून्यतार्थं च तत एवं विहन्यसे ॥

शून्यतास्वरूपं तत्प्रयोजनं च तत्रैवोक्तम्—

यः प्रतीत्य समुत्पादः शून्यतां तां प्रचक्ष्महे ॥
कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशाविकल्पनः ।
ते प्रपञ्चात् प्रपञ्चस्तु शून्यतायां निरूप्यते ॥
द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।

निर्वाणस्वरूपं च निर्वाणप्रकरणे—

अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतम् ।
अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते ॥

यद्धि नैव प्रहीयते रागादिवत्, नापि प्राप्यते श्रामण्यफलवत्, नाप्युच्छिद्यते स्कन्धादिवत्, यच्चापि न नित्यं शून्यवत्, तत् स्वभावतोऽनिरुद्धम् अनुत्पन्नं च सर्वप्रपञ्चोपशमलक्षणं निर्वाणमुक्तम् ॥

PDF Compressor Free Version

न चाभावोऽपि निर्वाणं कुत एवास्य भावता ।
भावाभावपरामर्शक्षयो निर्वाणमुच्यते ॥

केषाञ्चिद्विज्ञानरूपता शून्यताया यत् तदपि पूर्वोक्तनीत्या न स्वसिद्धान्तानुरूपम्, किं तु शङ्करसिद्धान्तानुकरणम् । तच्चेन्निर्विशेषं सन्मात्रं सर्वाधिष्ठानमभ्युपेयते तदा 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुत्यनुरोधात् 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिवचनशतैः सर्ववेदवेद्ये परस्मिन्नाममात्रे विवादः ॥

परन्तु नैतत्; तदुक्तं श्रीगौडपादाचार्यैः—

क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तायिनः ।
सर्वे धर्मास्तथा ज्ञानं नैतद् बुद्धेन भाषितम् ॥
(मा० का० प्र० ४,९९)

तत्रत्यं भाष्यं च—यस्मान्न हि क्रमते बुद्धस्य परमार्थदर्शिनो ज्ञानं विषयान्तरेषु धर्मेषु धर्मसंस्थं सवितरीव प्रभा । तायिनः, तायः अस्यास्तीति तायी संतानवतो निरन्तरस्य आकाशकल्पस्येत्यर्थः । पूजावतो वा प्रज्ञावतो वा । सर्वे धर्मा आत्मानोऽपि ज्ञानवदेव आकाशकल्पत्वात्, न हि क्रमते क्वचिदप्यर्थान्तरे । यदादावुपन्यस्तम् 'ज्ञानेनाकाशकल्पेन' इत्यादि तदिदमाकाशकल्पस्य तायिनो बुद्धस्य तदनन्यत्वादाकाशकल्पं ज्ञानं न क्रमते क्वचिदप्यर्थान्तरे, तथा धर्मा आकाशमिवाचलमविक्रियं निरवयवं नित्यमद्वितीयमसङ्गमदृश्यमग्राह्यमशनायाद्यतीतं ब्रह्मात्मतत्त्वम् 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुतेः । ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वमद्वयमेतन्न बुद्धेन भाषितम् । यद्यपि बाह्यार्थनिराकरणं ज्ञानमात्रकल्पना च अद्वयवस्तुसामीप्यमुक्तम् । इदं तु परमार्थतत्त्वमद्वैतं वेदान्तेष्वेव विज्ञेयमित्यर्थः । यदप्यत्र—

PDF Compressor Free Version

अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चलस्थिरोभयाभावैरावृणोत्येव बालिशः ॥ (मा०का०प्र० ४,८३)
कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सदावृतः ।
भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् ॥ (मा०का०प्र०४,८४)

इत्यादिकारिकाभिः शून्यवाद्यभिमतकोटिचतुष्टयविनिर्मुक्तशून्यतावत् अद्वैतमपि कोटिचतुष्टयविनिर्मुक्तमेवेति तदेतत् परसिद्धान्तानभिज्ञानविजृम्भितम् । सम्प्रदायपरम्परया कारिकार्थस्तावदध्येतव्यः ॥

तत्रत्यं भाष्यं चेत्थम् "अस्ति, नास्ति इत्यादिसूक्ष्मविषया अपि पण्डितानां ग्रहा भगवतः परमात्मन आवरणा एव, किमुत मूढजनानां बुद्धिलक्षणा इत्येतमर्थं प्रदर्शयन्नाह—अस्तीति । अस्त्यात्मेति वादी कश्चित् प्रतिपद्यते ; नास्तीति अपरो वैनाशिकः ; अस्ति नास्तीति अपरोऽर्धवैनाशिकः सदसद्वादी दिग्वासाः ; नास्ति नास्तीति अत्यन्तशून्यवादी । तत्रास्तिभावश्चलः घटाद्यनित्यविलक्षणत्वात् । नास्तिभावः स्थिरः सदाविशेषत्वात् । उभयं चलस्थिरविषयत्वात् सदसद्भावः । अभावोऽत्यन्ताभावः प्रकारचतुष्टयस्यापि । तैरेतैश्चलस्थिरोभयाभावैः सदसदादिवादी भगवन्तमावृणोत्येव बालिशोऽविवेकी, यद्यपि पण्डितो बालिश एव, परमार्थतत्त्वानवबोधात्, किमु स्वभावमूढो जन इत्यभिप्रायः । कीदृक् पुनः परमार्थतत्त्वं यदवबोधादबालिशः पण्डितो भवतीत्यत आह—कोट्यः प्रावादुकशास्त्रनिर्णयान्ता एता उक्ताः, अस्ति नास्ति इत्याद्याश्चतस्रः यासां कोटीनां ग्रहैर्ग्रहणैरुपलब्धिनिश्चयैः सदा सर्वदा आवृत आच्छादितस्तेषामेव प्रावादुकानां यः स भगवानाभिः अस्ति नास्ति इत्यादिकोटिभिश्चतसृभिरप्यस्पृष्टः अस्त्यादिकल्पनावर्जित इत्येतत् ॥"

PDF Compressor Free Version

'देहातिव्यतिरिक्तोऽस्तीत्याद्यो वैशेषिकादिपक्षः। देहादिव्यतिरिक्तोऽपि नासौ बुद्धेर्व्यतिरिच्यते। क्षणिकस्य विज्ञानस्यैवात्मत्वादिति द्वितीयो विज्ञानवादिपक्षः। तृतीयो दिगम्बरपक्षः। चतुर्थे तु शून्यवादिपक्षे शून्यस्यात्यन्तिकत्वद्योतनार्था वीप्सा' इत्यानन्दगिरिः॥

यदि च अस्ति नास्ति इत्यादिकल्पनाविवर्जितत्वोक्त्या शून्यवादापत्तिस्तदा 'न सत्तन्नासदुच्यते' 'अन्यदेव तद्विदितादथो अविदितादधि' 'नेदं यदिदमुपासते' इत्यादिनापि शून्यत्वापत्तिर्दुर्निवारा ॥

यदपि च शून्यवाद एवाद्वैतवाद इति, तन्न; सिद्धान्तापरिज्ञानात्। शून्यवादिनां शून्यं कोटिचतुष्टयशून्यमपि असत्येव पर्यवस्यति। अद्वैतिनां तत्त्वं तु स्वेतरसत्त्वादिकोटिचतुष्टयशून्यमपि स्वप्रकाशात्मकं सद्रूपमेव ॥

कथञ्चित् शून्यस्यापि भावना तैरुपायत्वेनैवास्थीयते, अन्ते तत्रापि अभिनिवेशस्यानिष्टत्वात्। तथा हि—शून्यं शून्यमिति भावनीयं स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात्। यदि दृष्टं सत्तदा तद्विशिष्टस्य दर्शनस्य इदंताया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेः तत्संबन्धस्य च समवायादेः सत्त्वं स्यात्, न चैदिष्टं कस्यचिद्वादिनः। न चार्धजरतीयमुचितम्, न हि कुक्कुट्या एको भागः पाकाय, अपरो भागः प्रसवाय कल्पतामिति कल्प्यते। तस्मादध्यस्ताधिष्ठानतत्संबन्धदर्शनद्रष्टृणां मध्य एकस्यानेकस्य वा असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्थमचीकथन्। भिक्षुपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानक्रमेण सर्वशून्यतायामेव पर्यवसानम्।

PDF Compressor Free Version

अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव । सत्पक्षे सत्त्वेनाभिनिवेशः । असत्पक्षेऽपि मा भूदभिनिवेश इति तद्वारणायैव कोटिचतुष्टयविनिर्मुक्तत्वोक्तिः ॥

बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः ॥
आकारसहिता बुद्धिर्योगाचारस्य संमता ।
तस्याप्यभावमिच्छन्ति (श्लो० वा०)

श्रीकण्ठीयभाष्येऽपि 'सर्वथानुपपत्तेश्च' इति सूत्रे सर्वशून्यवादो युक्तो न वेति संदिह्य—'सर्वं जगन्न सत्, बाधितत्वात्; नासत्, प्रतीयमानत्वात्; नोभयात्मकम्, विरोधात्; नानुभयात्मकम्, असम्भवात्; किं तु चतुष्कोटिविनिर्मुक्तं सर्वं शून्यमेव । प्रत्यक्षावभासस्तु संवृतिमूलः । तस्माच्छून्यवादः समीचीन इति'—पूर्वपक्षय्य—'न सम्भवति सर्वशून्यवादः, कुतः, सदिति प्रतिज्ञायामिव असदिति प्रतिज्ञायामन्यथाप्रतिज्ञायां च तुच्छत्वानुपपत्तेः । सदसद् बुद्धितच्छब्दानां वस्तुगतान्योऽन्यविरुद्धभावाभावरूपावस्थाविशेषविषयत्वात् । यत्तु संवृतिमूलः प्रत्यक्षावभास इति तदप्यपहास्यम्; सर्वस्य शून्यत्वे कः संवृतेराश्रयः यस्यैवमवभासः । ततः सर्वशून्यवादः सर्वविरुद्ध एव' —इत्येवमधिष्ठानाभावादेवापाकृतम् ॥

'नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम् ।
एकानेकस्वभावेन वियोगाद्वियदब्जवत् ॥

न सन्नासन्न सदसन्न वाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥' इति ॥

PDF Compressor Free Version

खण्डनपरः सूत्रार्थश्चेत्थं वर्णितष्टीकाकृता—सत्त्वादिप्रकार-चतुष्टयेन हि निषेधः शून्यवादिना प्रतिज्ञायते चतुष्कोटिविनि-र्मुक्तमिति । तेन सर्वेणापि प्रकारेण निषेधप्रतिज्ञायां सर्व-शून्यत्वरूपं तुच्छत्वं नोपपद्यते । किन्त्ववश्यं सद्वस्तुपरिशेषः संपद्यत इत्यतो न युक्तः शून्यवादः ॥ (शि.वार्कमणिदीपिका)

अत एव शून्यतायामपि नाभिनिवेष्टव्यम् । अन्यथा भावाभिनिवेशो वा शून्यताभिनिवेशो वेति न कश्चिद्विशेषः, उभयोरपि कल्पनात्मकतया सांवृतत्वात् । न चाभावस्य कल्पित-स्वभावतया किञ्चित् स्वरूपमस्ति ; न च भावनिवृत्ति-रूपोऽभावः, निवृत्तेर्निःस्वभावत्वात् । यदि च भावस्यैव कश्चित् स्वभावः स्यात् तदा तत्प्रतिषेधात्माभावोऽपि स्यात् । भावस्य तु स्वभावो नास्तीति प्रतिपादितमेव । अतो न भावनिवृत्तिरूपो अभावो नाम कश्चित् । न च भावाभावयोरुक्तक्रमेणासत्त्वे प्रति-पादिते तदुभयसंकीर्णता सम्भवति । उभयप्रतिषेधस्वभावता वा, भावविकल्पस्यैव सकलविकल्पनिबन्धनत्वात्तस्मिन्निराकृते सर्व एवामी एकप्रहारेण निरस्ता भवन्ति । तस्मात् न सन्नासन्न सदसन्न चाप्यनुभयात्मकं किञ्चिदभिनिवेशाविषयतया मन्तव्यम् ।

सर्वसङ्कल्पहानाय शून्यतामृतदेशना ।
यस्य तस्यामपि ग्राहस्त्वयासाववसादितः ॥

एतेन सुस्पष्टं शून्यवादिनां शून्यं वेदान्तिस्वीकृतब्रह्मणो महद्वि-लक्षणम् । अयमत्र समुदायार्थः—सर्वधर्मशून्यता हि भावाभि-निवेशप्रहाणायोपादीयते । सापि शून्यताशून्यताभिमुखीकरणात् पश्चात् प्रहीयते, यापि कथञ्चित् भावकल्पना जायते सापि समनन्तरविचारेण निवर्तते ॥

PDF Compressor Free Version

अत एवैतत्समस्तकल्पनाजालनिवर्तनाय भगवत्यां प्रज्ञापारमितायां विस्तरेणाध्यात्मशून्यतादयोऽष्टादश शून्यताः प्रोक्ताः ॥
अद्वैतिनां मते—

'अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ।'

'शिवः केवलोऽहम् ।'

शून्यवादिनस्तु—

'यतस्ततो वास्तु भयं यद्यहं नाम किञ्चन ।
अहमेव न किञ्चिच्चेद्भयं कस्य भविष्यति ॥'

अपि च शून्यवादिभिरेव उपनिषद्वादिनां पक्षः बोधिचर्यावतारपञ्जिकायां नवमपरिच्छेदे निर्दिश्यते—उपनिषद्वादिनस्तु समस्तप्राणिसंतानान्तर्गतमेकमेव व्यापि नित्यं च ज्ञानमिच्छन्ति । तद्विवर्तरूपतया सकलमिदं क्षितिजलपवनहुताशनादिकं जगदवभासते । तत्स्वभाव एव चात्मा न बाह्यं किमप्यवयवि परमाण्वादिकं ग्राह्यं प्रमाणप्रसिद्धमस्ति । स्वमते च रूपमेव शून्यम्, शून्यतैव रूपम्, न वेदनीयशून्यतया वेदना शून्या, वेदनैव शून्या, शून्यतायामपि नाभिनिवेशः कर्तव्यः । सर्वस्य शून्यत्वे संवृतेः कश्चिदाश्रय एव नास्ति यस्मिन् सती तदाच्छादयासत्यं प्रपञ्चं सत्यतयावभासयेत्—इति ॥

श्रुतिरपि 'ब्रह्म सदात्मकम्' 'सदेव सोम्य' सर्वनिषेधात्मकमेव शून्यमित्याह । 'नैवेह किञ्चनाम आसीत् मृत्युनैवेदमावृतमासीत्' ॥

'नैवेह किञ्चनाम आसीत्'—इह संसारमण्डले किञ्चन किञ्चिदपि नामरूपविभक्तविशेषं नैव आसीत् न बभूव । अपि प्रागुत्पत्तेर्मनआदेः । किं शून्यमेव बभूव ? शून्यमेव स्यात् 'नैवेह किञ्चन' इति श्रुतेः ॥

PDF Compressor Free Version

न कार्यं कारणं वासीत् । उत्पत्तेश्च । उत्पद्यते हि घट: । अत: प्रागुत्पत्तेर्घटस्य नास्तित्वम् । ननु कारणस्य न नास्तित्वम् । मृत्पिण्डादिदर्शनात् । यत्रोपलभ्यते तस्यैव नास्तिता अस्तु कार्यस्य, न तु कारणस्य, उपलभ्यमानत्वात् , न ; प्रागुत्पत्ते: सर्वानुपलम्भात् ॥

'तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसत: सज्जायत' । तत्तत्र हैतस्मिन् प्रागुत्पत्तेर्वस्तुनिरूपणे एके वैनाशिका आहु: वस्तु निरूपयन्त: ; असत्सदभावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाग्रेऽद्वितीयमासीदिति । सदभावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति बौद्धा: ; न तु तत्प्रतिद्वन्द्विवस्त्वन्तरमिच्छन्ति ॥

आत्मख्यातिवादिनो योगाचारा: । अनिर्वचनीयख्यातिवादिनोऽद्वैतिन: । अद्वैतिनोऽर्थकृतमेव ज्ञानवैचित्र्यमभ्युपयन्ति । अत एव रूप्यादिभ्रमेष्वपि प्रातिभासिकरूप्योत्पत्तिं स्वीकुर्वन्ति ॥

योगाचारास्तु साकाराणां ज्ञानानां स्वयं वासनावशात् वैचित्र्यं स्वीकुर्वन्ति । अद्वैतिनो मृद्घटादीनां हेतुहेतुमद्भावमभ्युपगच्छन्ति ॥

योगाचारास्तु ज्ञानस्यैव अर्थगतव्यवहारयोग्यताया अपि संपादकत्वमिति सर्वसामयिकसम्मतम् । अन्यथा स्वपरवेद्ययोरनतिशयताप्रसक्ति: । निराकारस्य ज्ञानस्य प्रकाशत्वानुपपत्त्या साकारस्यैव तस्य भ्रमकृतो बहिर्वदवभासोऽभ्युपेतव्य: ॥

किं चार्थस्य ज्ञानवैलक्षण्यजननद्वारैव व्यवहारहेतुत्वमभ्युपेतव्यम् । तच्च ज्ञानस्यानादिवासनावशात् स्वत: सिद्धं ततोऽपार्थेवार्थकल्पना इति बाह्यार्थास्तित्वं निराकुर्वन्ति ॥

PDF Compressor Free Version

वेदान्तिनस्तु चिदात्मकं ब्रह्म स्वतः समुत्खातसकलप्रपञ्च-संसर्गमपि अनिर्वाच्यमायानिर्मितप्रपञ्चेन मिथ्यातादात्म्यवशात्तथैव भाति, न स्वतः साकारम् । अर्थश्च प्रमाणेन प्रमितो भवति । न तु प्रमाणस्वरूपमिति ॥

यच्च भ्रान्तिप्रकाशे 'अर्थतश्च नैरात्म्यमभ्युपेत्यालयविज्ञानं समस्तवासनाधारमभ्युपगच्छन्नक्षरमात्मानम् अभ्युपैति' (भामती) 'अक्षरमविनाशिनमनादिवासनानामाश्रयत्वात् अक्षरत्वसिद्धिः' (कल्पतरुः) इत्यादिवचनैर्बौद्धाभिमतविज्ञानस्य नित्यत्वं सिषाधयिषितं तत्तु उत्तानाभिप्रायस्याप्यनभिज्ञातां सूचयति । आपादनस्य सिद्धान्तत्वेन कैश्चिदपि अपरिग्रहात् । अन्यथा त्वन्मतस्य अवैदिकत्वापादनेऽवैदिकत्वस्य त्वत्सिद्धान्तत्वापत्तेः । क्षणिकस्य विज्ञानस्य वासनाश्रयत्वेन नित्यत्वापत्त्या क्षणिकत्वरूपसिद्धान्तो व्याहन्यत इति क्षणिकविज्ञानसंततिवादिनो नित्यत्वापादनं दूषणतया तत्र तत्र मन्तव्यम् ॥

न चांशतः साधर्म्येणाद्वैतवादस्य विज्ञानवादत्वमपि वक्तुं युज्यते । तदुक्तं विवरणाचार्यैः—तस्मात् सत्यपि विषयाभेदेऽहं-संवेदनस्य यथाप्रतिभासमद्वितीयात् संवेदनाद्भेदेनाप्यर्थक्रिया-समर्थतयावस्थायित्वमस्तीति महदेतत् सिद्धान्तवैलक्षण्यमस्ती-त्युपसंहरति तदेवमहङ्कर्तुः सदैकरूपावगमादिति । यत्किञ्चि-त्साम्येन च सिद्धान्तसाङ्कर्ये मन्त्रार्थवादेतिहासपुराणप्रामाण्या-नभ्युपगमाद्देवतास्वर्गेश्वरमोक्षानभ्युपगमात् क्षणिकप्रमाणसंबन्धस्य क्षणिकस्यैव सत्त्वाभ्युपगमाल्लोकायतबौद्धांशद्वयपरिणतः प्रभाकरः, भेदाभेदाभ्युपगमात् मन्त्राद्यप्रामाण्याच्च लोकायतक्षपणकांशद्वय-परिणतो वार्तिककारः । यस्तु कश्चित् क्षपणकपादावनतशिरोबिम्बः तत्त्वदर्शनतन्निष्ठपरमहंसप्रद्वेषतीव्रवायुविक्षिप्तविवेकविज्ञानलवः स्व-

PDF Compressor Free Version

परपक्षगुणदोषविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बन्धमोक्षादिसङ्करमिव कुर्वन् दुर्जनरमणीयां वाचं जल्पति सुगतविज्ञानवादसमानोऽयं वेदान्तवाद इति स सम्प्रदायश्रवणपरिचयशून्यतया दर्शनविवेकमनवबुध्यमानो नापवाद्यः, किं तु शोचनीय इत्युपेक्षणीयो विद्वद्भिः ॥

ननु विज्ञाने प्रपञ्चस्य कल्पितत्वं तव तस्य च तुल्यम्। सत्यम्, विज्ञाने प्रतिभासमानत्वं च तव तस्य च तुल्यमिति विज्ञानवादस्त्वदीयं दर्शनं किं न स्यात्? सत्यपि प्रतिभास्यत्वे सत्यमिथ्याविभागोऽस्तीति चेत्, इहापि सत्यपि मिथ्यात्वे अर्थक्रियासमर्थसत्त्वासत्त्वविभागोऽस्त्येव। कल्पितत्वे नेयं विभागसिद्धिरिति चेत्, प्रतिभास्यत्वेऽपि न सत्यमिथ्याविभागसिद्धिः। दृश्यते विभाग इति चेत्, तदेव विभागदर्शनं मम किं न स्यात्? घटादेर्मिथ्यात्वमप्रसिद्धमिति चेत्, न; प्रतिभास्यसत्यत्वस्याप्यसिद्धत्वाच्छुक्तिरजतघटार्थक्रियाभावाभावसत्त्वासत्त्वविभागदर्शनाच्च। दृश्यते च मायाप्रीतिद्वेषादिकारणम्। श्रूयते च देवासुरसंग्रामादिषु मायाविनिर्मितशस्त्रभेदानां दाहच्छेदभेदादिहेतुत्वमित्यलमतिप्रसङ्गेन ॥

शिवस्य हृदयं यश्च यस्यात्मा शङ्करः स्मृतः।
तं देवं पुण्डरीकाक्षं स्वात्मना समुपास्महे ॥

यत्तु द्वैतदर्शनसाधनाय 'य आत्मनि तिष्ठन्' इत्यादिश्रुतिजातमुपन्यस्तं तदेतदाकाशमुष्टिहननायते, यतो न ह्यद्वैतिभिर्व्यावहारिकीमचिन्त्यानिर्वाच्यानाद्यविद्याप्रत्युपस्थापितां सत्तामाश्रित्य नियम्यनियन्तृत्वादिभेदो नाभ्युपेयते। अपि च 'यत्परः

PDF Compressor Free Version

शब्दः स शब्दार्थः' इति सरणिमनुसृत्य भवदुपन्यस्तवाक्यद्वयस्य उपासनाविधिशेषतया भेदपर्यवसायित्वमप्यनुपपन्नम्, वाक्यभेदप्रसक्तेः। व्यावहारिकीं भेददृष्टिमाश्रित्य नियम्यनियन्तृत्वानुपपत्तौ पारमार्थिकभेदसाधनाय श्रुतार्थापत्तिरपि न पर्याप्ता, भेदस्य लोकप्रसिद्धत्वादेव तत्प्रतिपादकवेदस्य 'अग्निर्हिमस्य भेषजम्' इतिवत् अनुवादकत्वेन अनधिगतगन्तृत्वाभावात् स्वार्थे प्रामाण्यासंभवेन 'नेह नानास्ति किञ्चन' इति स्वार्थपर्यवसितनिषेधवाक्यापेक्षितनिषेध्यसमर्पकत्वेनैव प्रामाण्यस्य त्वयापि वक्तुमुचितत्वात्। एवं भेदसिद्धेरापामरप्रसिद्धत्वात् अपुरुषार्थत्वाच्च तस्य शास्त्रीयतात्पर्यविषयत्वासंभवाद्द्वैतासिद्धिरनुपपन्ना। श्रीमद्भिरपि अचिन्त्यानन्तकल्याणगुणगणमयी श्रीमदनन्तानुस्मृतिरेव परमपुरुषार्थत्वेनास्थीयते, न तु बालजनसिद्धा भेदसिद्धिरपि। लोकशास्त्रविलक्षणा भेदसिद्धिरप्यनुपन्ना, तस्याः खपुष्पायमाणत्वात्॥

नन्वु घटपटादिभेदस्य लोकसिद्धत्वेऽपि परमात्मनः 'सत्यकामः सत्यसङ्कल्पः' इत्यादिश्रुतिशतबोधितानवगाह्यमहामहिमशालित्वस्य शास्त्रैकसमधिगम्यत्वेन कथं तस्य प्रत्यस्तमिताशेषविशेषपरवाक्यबाध्यत्वमिति चेत्, न; 'तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि' इति न्यायमनुसृत्य अचिन्त्यानन्तमहामहिमशालित्वादिप्रतिपादकवाक्यानामुपासनार्थमुपदिष्टत्वेनानन्यशेषत्वाभावेनाप्रधानत्वात् अनन्यशिष्टनिर्विशेषाद्वैतबोधकवाक्यबाध्यत्वोपपत्तेः। यथा 'जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा' इत्युपदिष्टस्यापि जर्तिलादिहोमस्य 'अजक्षीरेण जुहुयात्' इति विधिशेषत्वेनाप्रधानत्वात्, 'अनाहुतिर्वै' इति स्वार्थपर्यवसायित्वेन प्रधानभूतनिषेधवाक्यबाध्यत्वमिति तद्वत्। अद्वैतसिद्धेश्च निश्शेषानर्थनिर्मूलनक्षमत्वेन परमपुरुषार्थत्वात् शास्त्रैकसमधिगम्यत्वात् शास्त्रीयपरम-

PDF Compressor Free Version

तात्पर्यविषयत्वाच्च भवद्भिरप्यादरणीयैव सा। तदुक्तं खण्डनकृता—

'भीषणा बाधनाऽस्यास्तदा प्रज्ञां प्रयच्छथ।
क्षेप्तुं चिन्तामणिं पाणौ लब्धमब्धौ यदीच्छथ ॥' इति।

अपि च अद्वैतिभिः सह भवतां विरोधोऽपार्थ एव, यतः सर्वेषां वैष्णवाचार्याणां सिद्धान्तपर्यालोचनया निःशेषानर्थोपप्लुतायाः सनिदानाया जननमरणाविच्छेदलक्षणायाः संसृतेर्निर्मूलनपटीयस्यां श्रीहरिचरणाम्बुजानुरक्तावेव प्रतिभाति तात्पर्यम्, न तु द्वैतसिद्धौ अद्वैतखण्डने वा; देवावतारत्वेन द्वेषमात्सर्यादिदोषशून्यानां परपक्षखण्डनप्रयोजनाभावात्। खण्डनत्वेन प्रतीयमानानामपि तत्र तत्र निक्षिप्तवचनानाम् 'न हि निन्दा निन्दितुं वा प्रवर्तते, अपि तु विधेयं स्तोतुम्' इति न्यायात् 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते' 'ततो भूय इव ते तमो य उ विद्यायां रताः' इतिवत् स्वार्थे तात्पर्याभावात्। अशेषाघौघविध्वंसिन्या भगवदुपास्तेस्तन्निर्वाहकयथाप्राप्तभेदस्य च समर्थन एव तात्पर्यम्। तच्चाद्वैतिनामपि सम्मतमेव, सत्ताभेदेन भेदाभेदयोः एकत्र सामञ्जस्यात्। समसत्ताकयोरेव भावाभावयोर्विरोधः, न तु विषमसत्ताकयोरिति सिद्धान्तस्य सर्वसम्मतत्वात्। श्रीमच्छङ्करभगवत्पादैरपि

'सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥'

इत्यादिवचनशतैः श्रीभगवच्चरणाम्बुजानुरक्त्युपयुक्तव्यावहारिकभेदस्याभ्युपगतत्वात् तादृशव्यावहारिकभेदस्य परमार्थभूतनिरुपप्लुताद्वैतस्य च विरोधलेशोऽपि नास्ति। पारमार्थिकभेदस्यैव तादृशाभेदेन विरोधसंभवात् समस्तसाधनफलभूतायामपि निरुपमसुखसंवि-

PDF Compressor Free Version

दात्मिकायां परानुरक्तौ भेदनिष्ठपारमार्थिकत्वस्यानपेक्षणात् । न च स्वारसिकभेदमादाय परानुरक्तिः संभावयितुमनर्हेति वाच्यम् ;

'या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतो नाथ हृदयान्नापसर्पतु ॥'

इति भक्तमुकुटमणिभूतेन प्रह्लादेन स्वारसिकभावेन रागानुगामेव भक्तिं प्रार्थयता व्यावहारिकीं दृष्टिमाश्रित्यैव भक्तेर्महत्त्वस्याभ्युपगमात् ॥

अत एव स्वनामधन्यैः श्रीवल्लभचैतन्यचरणप्रभृतिभिरद्वैतखण्डने प्रयासमकृत्वैव प्रेमप्रवाहेणाप्लाव्य निखिलं जगत् स्वसिद्धान्तः प्रतिष्ठापितः । इदानीन्तनानां यथा परमतखण्डनेऽभिनिवेशो न तथा परमपुरुषार्थभूतायाः श्रीहरिचरणाम्बुजानुरक्तेः प्रचारणे। न चाद्वैतस्य भक्तिविरोधित्वादादौ तत्खण्डनमेवोचितमिति वाच्यम् , अनुपस्थितत्वात् । न च द्वैतवदद्वैतं पूर्वं समुपस्थितम् , येन तद्बाधित्वा उपास्योपासकभावानुपपत्तावुपासनं कर्तुमशक्यं स्यात् । तदुक्तम्—'पूर्वं परमजातत्वादबाधित्वैव जायते।' न चैवमद्वैतिनः परमतखण्डने प्रवृत्ता दृश्यन्ते । ते हि निर्विशेषाद्वैतमेव परमपुरुषार्थत्वेन मन्वानास्तत्सिद्धौ साक्षाद्विरोधित्वात् , उपस्थितत्वाच्च द्वैतस्य पारमार्थिकत्वमेव खण्डयन्ति , न तु स्वरूपतो द्वैतमपि तत्र तस्यानुपयुक्तत्वात् । अद्वैतिनां हि अद्वैतनिष्पत्त्यनन्तरमेव कृतार्थताभिमता , 'ब्रह्म वेद ब्रह्मैव भवति ' 'तरति शोकमात्मवित् '

'ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥'

इत्यादिवचनशतात् । न च भवतां मते द्वैतसिद्धिरेव पुरुषार्थत्वेन

PDF Compressor Free Version

अभिमता, निष्प्रमाणत्वात्, श्रवणकीर्तनादिसाधनपरम्पराया विधानात्, स्वतः सिद्धत्वाद्भवद्भिरप्यनङ्गीकृतत्वाच्च ॥

यच्च भाष्यभामतीब्रह्मविद्याभरणादिकृतामाचार्याणामुक्तीरुदाहृत्य द्वैतसाधनम्, तदेतत् कुशकाशावलम्बनमित्यतिरोहितमेव विदितवेदितव्यानाम्, पूर्वोत्तरपक्षीयग्रन्थार्थविवेकानवधारणनिबन्धनत्वात्। यद्वा, ग्रन्थरहस्यमवबुद्ध्यापि स्थलविशेषाद्यनुल्लिख्य अनभ्यस्तग्रन्थान् मृदुमतीन् वञ्चयितुमेवेदं शिष्टजनगर्हितं स्वरूपाननुरूपं दुःसाहसम्। तत्र भाष्यकृतामेव भवदुपन्यस्तवचनानि उल्लिख्य भवतां समक्षं स्वोक्तिः समर्थ्यते ॥

श्रीमद्भिरुट्टङ्कितम्—एवमेव श्रीशङ्कराचार्यैरपि 'न केवलमुपनिषदो ब्रह्मैकत्वं प्रतिपादन्त्यः यस्वार्थविघातं कर्मकाण्डप्रामाण्यविघातं च कुर्वन्ति प्रत्यक्षादिभिर्निश्चितभेदप्रतिपत्त्यर्थप्रमाणैश्च विरुध्यन्ते तस्मादप्रामाण्यमेवोपनिषदाम्, अन्यार्थता वास्तु न त्वेव ब्रह्मैकत्वप्रतिपत्त्यर्थता' इति वेदवाक्यानां भेदपरत्वमुक्तम्—इति तन्न; बृहदारण्यके द्वितीयाध्याये प्रथमब्राह्मणव्याख्यानप्रस्तावे इत्थं पूर्वोत्तरपक्षावुपन्यस्तौ। 'सर्वोपनिषदां परमात्मैकत्वविज्ञापनपरत्वेऽथ किमर्थं तत्प्रतिकूलो विज्ञानात्मभेदः परिकल्प्यत इति। कर्मकाण्डप्रामाण्यविरोधपरिहारायेत्येके। कर्मप्रतिपादकानि हि वाक्यान्यनेकक्रियाकारकफलभोक्तृकर्त्राश्रयाणि विज्ञानात्मभेदाभावे ह्यसंसारिण एव परमात्मन एकत्वे कथमिष्टफलासु क्रियासु प्रवर्तयेयुः, अनिष्टफलाभ्यो वा क्रियाभ्यो निवर्तयेयुः? कस्य वा बद्धस्य मोक्षायोपनिषदारभ्येत? अपि च परमात्मैकत्ववादिपक्षे कथं परमात्मैकत्वोपदेशः, कथं वा तदुपदेशग्रहणफलम्? बद्धस्य हि बन्धनाशायोपदेशः, तदभावे उपनिषच्छास्त्रं निर्विषयमेव। एवं तर्हि उपनिषद्वादिपक्षस्य कर्मकाण्डवादिपक्षेण

PDF Compressor Free Version

चोद्यपरिहारयोः समानः पन्थाः, येन भेदाभावे कर्मकाण्डं निरालम्बनमात्मानं न लभते प्रामाण्यं प्रति तथोपनिषदपि। एवं तर्हि यस्य प्रामाण्ये स्वार्थविघातो नास्ति तस्यैव कर्मकाण्डस्यास्तु प्रामाण्यम्। उपनिषदां तु प्रामाण्यकल्पनायां स्वार्थविघातो भवेदिति मा भूत् प्रामाण्यम्। न हि कर्मकाण्डं प्रमाणं सदप्रमाणं भवितुमर्हति। न हि प्रदीपः प्रकाश्यं प्रकाशयति न प्रकाशयति चेति। प्रत्यक्षादिप्रमाणविप्रतिषेधाच्च। न केवलमुपनिषदो ब्रह्मात्मैकत्वं प्रतिपादन्त्यः स्वार्थविघातं कर्मकाण्डविघातं च कुर्वन्ति। प्रत्यक्षादिभिर्निश्चितभेदप्रतिपत्त्यर्थप्रमाणैश्च विरुध्यन्ते। तस्मादप्रामाण्यमेवोपनिषदाम्, अन्यार्थता वास्तु न त्वेव ब्रह्मैकत्वप्रतिपत्त्यर्थता' इति पूर्वपक्षः॥

अथोत्तरपक्षः—न, उक्तोत्तरत्वात्। प्रमाणस्य हि प्रमाणत्वम् अप्रमाणत्वं वा प्रमोत्पादनानुत्पादननिमित्तम्। अन्यथा चेत् स्तम्भादीनां प्रामाण्यप्रसंगात् शब्दादौ प्रमेये। किञ्चातः? यदि तावत् उपनिषदो ब्रह्मैकत्वप्रतिपत्तिं प्रमां कुर्वन्ति कथमप्रमाणं भवेयुः? न कुर्वन्त्येवेति चेत्, यथाग्निः शीतमिति। स भवानेवं वदन् वक्तव्यः—उपनिषत्प्रामाण्यप्रतिषेधार्थं भवतो वाक्यमुपनिषत्प्रामाण्यप्रतिषेधं किं न करोत्येव अग्निर्वा रूपप्रकाशम्, अथ करोति; यदि करोति, भवतु तदा प्रतिषेधार्थं प्रमाणं भवद्वाक्यम्, अग्निश्च रूपप्रकाशको भवेत्। प्रतिषेधवाक्यप्रामाण्ये भवत्येवोपनिषदां प्रामाण्यम्। अत्र भवन्तो ब्रुवन्तु, कः परिहारः? नन्वत्र प्रत्यक्षा मद्वाक्य उपनिषत्प्रामाण्यप्रतिषेधार्थप्रतिपत्तिः, अग्नौ च रूपप्रकाशनप्रतिपत्तिः प्रमा। कस्तर्हि भवतः प्रद्वेषो ब्रह्मैकत्वप्रत्ययं प्रमां प्रत्यक्षं कुर्वतीषूपनिषत्सु उपलभ्यमानासु। प्रतिषेधानुपपत्तेः। शोकमोहादिनिवृत्तिश्च प्रत्यक्षं फलं ब्रह्मैकत्वप्रतिपत्तिपारम्पर्यजनितमित्यवोचाम। तस्मादुक्तोत्तरत्वात् उपनिषदं प्रति

PDF Compressor Free Version

अप्रामाण्यशङ्का तावन्नास्ति । यच्चोक्तम्—स्वार्थविघातकरत्वादप्रामाण्यमिति, तदपि न, तदर्थप्रतिपत्तेर्बाधकाभावात् । न हि उपनिषद्भ्यो ब्रह्मैकमेवाद्वितीयम्, नैव चेति प्रतिपत्तिरस्ति, यथाग्निरुष्णः शीतश्च इत्यस्माद्वाक्याद्विरुद्धार्थद्वयप्रतिपत्तिः । अभ्युपगम्य चैतदवोचाम, न तु वाक्यस्य प्रामाण्यसमये एष न्यायो यदुतैकस्य वाक्यस्यानेकार्थत्वम्, सति चानेकार्थत्वे स्वार्थश्च स्यात् तद्विघातकृच्च विरुद्धोऽन्योऽर्थः । न त्वेतद्वाक्यप्रमाणकानां विरुद्धमविरुद्धं चैकं वाक्यमनेकमर्थं प्रतिपादयतीत्येष समयः । अर्थैकत्वाद्ध्येकवाक्यता । न च कानिचिदुपनिषद्वाक्यानि ब्रह्मैकत्वप्रतिषेधं कुर्वन्ति। यत्तु लौकिकं वाक्यम्—अग्निरुष्णः शीतश्चेति न तत्रैकवाक्यता, तदेकदेशस्य प्रमाणान्तरविषयानुवादित्वात् । 'अग्निः शीतः' इत्येतदेकं वाक्यम्, 'अग्निरुष्णः' इति तु प्रमाणान्तरानुभवस्मारकम्, न तु स्वयमर्थावबोधकम्; अतो न 'अग्निः शीतः' इत्यनेनैकवाक्यता प्रमाणान्तरानुभवस्मारणेनैवोपक्षीणत्वात् । यत्तु विरुद्धार्थप्रतिपादकमिदं वाक्यमिति मन्यते, तच्छीतोष्णपदाभ्यामग्निपदसामानाधिकरण्यप्रयोगनिमित्ता भ्रान्तिः, न त्वेवैकस्य वाक्यस्यानेकार्थत्वं लौकिकस्य वैदिकस्य वा । यच्चोक्तम्—कर्मकाण्डप्रामाण्यविघातकृदुपनिषद्वाक्यमिति, तन्न; अन्यार्थत्वात्, ब्रह्मैकत्वप्रतिपादनपरा ह्युपनिषदो नेष्टार्थप्राप्तौ साधनोपदेशं तस्मिन् वा पुरुषनियोगं वारयन्ति अनेकार्थत्वानुपपत्तेरेव । न च कर्मकाण्डवाक्यानां स्वार्थे प्रमा नोत्पद्यते । असाधारणे चेत् स्वार्थे प्रमामुत्पादयति वाक्यम्, कुतोऽन्येन विरोधः स्यात् । ब्रह्मैकत्वे निर्विषयत्वात् प्रमा नोत्पद्यत एवेति चेत्, न; प्रत्यक्षत्वात् प्रमायाः । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'ब्राह्मणो न हन्तव्यः' इत्येवमादिवाक्येभ्यः प्रत्यक्षप्रमा जायमाना सा नैव भविष्यति

PDF Compressor Free Version

यद्युपनिषदो ब्रह्मैकत्वं बोधयिष्यन्ति इत्यनुमानम् । न चानुमानं प्रत्यक्षविरोधे प्रामाण्यं लभते । तस्मादसदेवैतद्गीयते प्रमैव नोत्पद्यत इति । अपि च यथाप्राप्तस्यैवाविद्याप्रत्युपस्थापितस्य क्रियाकारकफलस्याश्रयेण इष्टानिष्टप्राप्तिपरिहारोपायसामान्ये प्रवृत्तस्य तद्विशेषमजानतः तदाचक्षाणा श्रुतिः क्रियाकारकफलभेदस्य लोकप्रसिद्धस्य सत्यतामसत्यतां वा नाचष्टे, न च वारयति, इष्टानिष्टफलप्राप्तिपरिहारोपायविधिपरत्वात् । यथा काम्येषु प्रवृत्ता श्रुतिः कामानां मिथ्याज्ञानप्रभवत्वे सत्यपि यथाप्राप्तानेव कामानुपादाय तत्साधनान्येव विधत्ते, न तु कामानां मिथ्याज्ञानप्रभवत्वात् अनर्थरूपत्वाच्चेति न विदधाति—इत्यादि विशेषतस्तत्रैव कणेहत्यालोचनीयम् ॥

यदपि "नापि 'अहं ब्रह्मास्मि' इति वाक्यं जीवब्रह्मणोरभेदप्रतिपादकम्, इदं च वाक्यं बृहदारण्यकस्य प्रथमेऽध्याये चतुर्थब्राह्मणस्य दशमे मन्त्रे श्रूयते—'तदाहुर्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते। किमु तद्ब्रह्मावेत् यस्मात्तत्सर्वमभवदिति । ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेत् । अहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् तद्यो यो देवानां प्रत्यबुध्यत। स एव तदभवत्। तथर्षीणां तथा मनुष्याणाम्' (बृ.१।४।१०) अस्यार्थः—ब्रह्मज्ञानेन पूर्णतामाप्नुम इति मन्वाना मनुष्या विचारयन्ति ब्रह्म च पूर्णं श्रूयते तद्ब्रह्म यदि किञ्चिद्विज्ञाय पूर्णमभवत् तथान्येषामपि पूर्णतास्तु, किं ब्रह्मविज्ञानेन इत्यभिप्रायेण किमु तद्ब्रह्मावेत्, यस्मात् तत्सर्वमभवत् इति पृष्टे ब्रह्मैव जगत्सृष्टेः पूर्वमासीत् तद्ब्रह्म आत्मानमेव स्वात्मानमेव अहं ब्रह्मास्मीति व्यजानात् । तस्मात् ब्रह्मविज्ञानादेव तत् पूर्णं ब्रह्म अभवत् इत्युत्तरमुक्त्वा देवानां मध्ये यः कश्चन देवः परं ब्रह्म व्यजानात् सोऽपि तत्पूर्णमभवत् तथा मनुष्याणां मध्ये यः कश्चन

PDF Compressor Free Version

ब्रह्म जानाति स्म सोऽपि पूर्णोऽभवत् । ततश्चैतदन्तर्गतं तदात्मानमेवावेत् 'अहं ब्रह्मास्मि' इति वाक्यं तद्ब्रह्म आत्मानं ब्रह्मेति व्यजानादिति । कथमनेन वाक्येन जीवस्य ब्रह्मता सिद्ध्येत् ? प्रत्युत ब्रह्मणो देवानामृषीणां मनुष्याणामिति बहुवचनैस्तेषु च परस्परभेद एवोक्तः" इति । अत्र ब्रूमः—ब्रह्मज्ञानेन पूर्णतां मन्वाना मनुष्या भवन्मते भ्रान्ता अभ्रान्ता वा ? नाद्यः पक्षः क्षोदक्षमः, सोऽपि सर्वमभवत्, सोऽपि पूर्णोऽभवत् इति स्ववचनव्याघातात् निष्प्रमाणकत्वात्, 'ब्रह्म वेद ब्रह्मैव भवति' 'पूर्णमेवावशिष्यते' 'यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' 'तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति' इत्यादिस्तुतिशतविरोधाच्च । अन्त्येऽपि तेषां पूर्णता कीदृशी चतुर्विधव्यतिरेकाप्रतियोगित्वरूपा आकाशादीनामिवात्यन्ताभावाप्रतियोगित्वरूपा वा अचिन्त्यानन्तनिखिलगुणगणास्पदत्वरूपा वा ? नाद्यः, जीवेशभेदप्रतिपत्तिरूपस्वसिद्धान्तव्याकोपात् अस्मदिष्टापत्तेश्च । एवं द्वितीयोऽपि पक्षो न विचारसहः, अनभ्युपगमात् नैयायिकानां संसारदशायामपि देशकृतपरिच्छेदशून्यत्वस्यानपायेऽपि जीवानां कृतार्थत्वानभ्युपगमात् । नापि तृतीयः पक्षः, जीवेष्वपि अचिन्त्यानन्तकल्याणगुणगणास्पदत्वाभ्युपगमे जीवेशयोरवैशेष्यापातात् । एवं ब्रह्मणः पूर्णता जीवपूर्णतया भिन्ना अभिन्ना वा ? नाद्यः प्रमाणाभावात् । नापि द्वितीयः, स्वसिद्धान्तव्याकोपात् । वस्तुतस्तु भवन्मते ब्रह्मणोऽपि पूर्णता न सम्भाव्या अन्योन्याभावप्रतियोगित्वेन वस्तुकृतपरिच्छेदस्यानपायात् । निरतिशयं च पूर्णत्वं देशकालवस्तुकृतपरिच्छेदत्रयशून्य एव पर्यवस्यति । तदुक्तम्—स्वमतपोषकत्वेनाभिमतैः श्रीमच्छङ्करभगवत्पादैः—'न च निरवयवस्य परमात्मनोऽसंसारिणः संसार्येकदेशकल्पना न्याय्या, स्वतोऽदेशत्वात् परमात्मनः, अदेशस्य

PDF Compressor Free Version

परस्य एकदेशसंसारित्वकल्पनायां पर एव संसारीति कल्पितं भवेत् (निष्कलत्वश्रुतिश्च व्याकुप्येत) । अथ परोपाधिकृत एकदेशः परस्य घटकरकाद्याकाशवत् न तत्र तदा विवेकिनां परमात्मैकदेशः पृथक् संव्यवहारभक् इति बुद्धिरुत्पद्यते । अविवेकिनां विवेकिनां चोपचारिता बुद्धिर्दृष्टा इति चेत्, न; अविवेकिनां मिथ्याबुद्धित्वा-द्विवेकिनां च संव्यवहारमात्रालम्बनार्थत्वात् यथा रक्तः कृष्ण आकाश इति विवेकिनामपि कदाचित् कृष्णता च आकाशस्य संव्यवहारमात्रालम्बनार्थत्वं प्रतिपद्यत इति न परमार्थतः कृष्णो रक्तो वा आकाशो भवितुमर्हति । अतो न पण्डितैर्ब्रह्मस्वरूपप्रतिपत्तिविषये ब्रह्मणोंऽशांश्येकदेशैकदेशिविकारविकारित्वकल्पना कार्या सर्वकल्प-नापनयनार्थसारपरत्वात् सर्वोपनिषदाम् अतो हित्वा सर्वकल्प-नामाकाशस्येव निर्विशेषता प्रतिपत्तव्या.....नात्मानं ब्रह्मविलक्षणं कल्पयेत् उष्णात्मक इवाग्नौ शीतैकदेशम्, प्रकाशात्मके वा सवितरि तमएकदेशम्'—इत्यादिना ॥

किञ्च जीवानां वस्तुतो ब्रह्मविपरीतस्वभावत्वे ब्रह्मज्ञानेन ब्रह्मणः पूर्णतायां जातायामपि कथं जीवानां तज्ज्ञानेनास्वभावभूता पूर्णता स्यात्! न हि स्तम्बस्याकाशविज्ञानेनाकाशत्वं दृष्टचरं संभवि वा । अथात्र ज्ञानपदेनोपासनं विवक्ष्यते, न; परमात्मन्यपि तत्प्रसक्तेः; उपासनेनाप्यन्यस्यान्यात्मतानुपपत्तेश्च 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति श्रीमुखवचनविरोधाच्च । तथैव परमात्मनोऽपि पूर्णताया ज्ञानजन्यत्वे क्रियाजन्यत्वेन पूर्णताया अनित्यत्वापत्तेश्च विज्ञस्यैव ज्ञानेन पूर्णत्वोक्तिर्निरालम्बना परसम-वेतक्रियाफलशालित्वाभावेन स्वस्मिन्नेव कर्तृत्वकर्मत्वानुपपत्त्या उपास्योपासकभावासंभवात् । किञ्च जीवस्यात्र ब्रह्मत्मज्ञानित्व-

PDF Compressor Free Version

विवक्षणे भवदभिमतविचारपूर्वकप्रश्नप्रतिवचने च किंफलके ? तदिदमपि 'एतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति तस्य न देवाश्चनाभूत्या ईशते आत्मा ह्येषां स भवति अथ योऽन्यां देवतामुपास्ते न स वेद यथा पशुरेवं स देवानाम्' इत्यादीनि वचनानि च किमालम्बनानि इति सुधियः स्वयमेव विभावयन्तु, किं परकीयरन्ध्रान्वेषणेन। परं चित्रीयते चेतश्चास्मिन् विषये यत् पूर्वपक्षत्वानुवादकत्वाभ्यां सुस्पष्टतया प्रतीयमानानि श्रुतितद्भाष्यगतानि वचनानि भवदीये चेतसि चमत्कृतिमादधति यादृशीं न तादृशीं सिद्धान्ततया तत्परतया चोपन्यस्तश्रुतितद्भाष्यवचनानि॥

यदप्यत्रैव स्वमतपोषणाय भाष्यकारादिवचनोल्लेखः, तदपि गुञ्जापुञ्जे दहनविभ्रमायितम्, तत्त्वेन न स्वसमीहितसाधनम्। तथा हि तत्रत्यं भाष्यम्—"सूत्रिता ब्रह्मविद्या 'आत्मेत्येवोपसीत' इति, यदर्थोपनिषत् कृत्स्नापि; तस्यैतस्य सूत्रस्य व्याचिख्यासुः प्रयोजनाभिधित्सयोपोज्जिघांसति—तदिति वक्ष्यमाणमनन्तरवाक्येऽवद्योत्यं वस्तु आहुः ब्राह्मणा ब्रह्मविविदिषवो जन्मजरामरणप्रबन्धचक्रभ्रमणकृतायासदुःखोदकापारमहोदधिप्लवभूतं गुरुमासाद्य तत्तीरमुत्तितीर्षवो धर्माधर्मसाधनतत्फललक्षणात् साध्यसाधनरूपान्निर्विण्णाः तद्विलक्षणनित्यनिरतिशयश्रेयःप्रतिपित्सवः। किमाहुरित्याह यत् ब्रह्मविद्यया-ब्रह्म परमात्मा तत् यया वेद्यते सा ब्रह्मविद्या, तया ब्रह्मविद्यया सर्वं निरवशेषं भविष्यन्तो भविष्याम इत्येवं मनुष्या यन्मन्यन्ते; मनुष्यग्रहणं विशेषतोऽधिकारज्ञापनार्थम्; मनुष्या एव हि विशेषतोऽभ्युदयनिःश्रेयससाधनेऽधिकृता इत्यभिप्रायः। यथा कर्मविषये फलप्राप्तिं ध्रुवां कर्मभ्यो मन्यन्ते तथा ब्रह्मविद्यायाः सर्वात्मभावफलप्राप्तिं ध्रुवामेव मन्यन्ते वेदप्रामाण्यस्योभयत्राविशेषात्।

PDF Compressor Free Version

तत्र विप्रतिषिद्धं वस्तु लक्ष्यते ; अतः पृच्छामः—किमु तद्ब्रह्म, यस्य विज्ञानात् सर्वं भविष्यन्तो मनुष्या मन्यन्ते । तत् किमवेत् यस्मात् विज्ञानात् तत् ब्रह्म सर्वमभवत् ? ब्रह्म च सर्वमिति श्रूयते, तद्यदि अविज्ञाय किञ्चित् सर्वमभवत् तथान्येषामप्यस्तु ; किं ब्रह्मविद्यया ? अथ विज्ञाय सर्वमभवत् विज्ञानसाध्यत्वात् कर्मफलेन तुल्यमेवेत्यनित्यत्वप्रसङ्गः, सर्वभावस्य ब्रह्मविद्याफलस्य । अनवस्थादोषश्च—तदप्यन्यद्वाविज्ञाय सर्वमभवत् ततः पूर्वमप्यन्यत् विज्ञाय —इति । न तावदविज्ञाय सर्वमभवत्, शास्त्रार्थवैरूप्यदोषात् । फलानित्यत्वदोषस्तर्हि ? नैकोऽपि दोषः, अर्थविशेषोपपत्तेः । यदि किमपि विज्ञायैव तद्ब्रह्म सर्वमभवत्, पृच्छामः—किमु तत् ब्रह्मावेत् यस्मात् तत् सर्वमभवत्—इति । एवं चोदिते सर्वदोषानागन्धितं प्रतिवचनमाह—ब्रह्म वा इत्यादिना । ब्रह्मापरं सर्वभावस्य साध्यत्वोपपत्तेः, न हि परस्य ब्रह्मणः सर्वभावापत्तिः विज्ञानसाध्या । विज्ञानसाध्यां च सर्वभावापत्तिमाह—'तस्मात् सर्वमभवत्' इति । तस्मात् 'ब्रह्म वा इदमग्र आसीत्' इत्यपरं ब्रह्मेह भवितुमर्हति । मनुष्याधिकाराद्वा तद्भावी ब्राह्मणः स्यात्, 'सर्वं भविष्यन्तो मनुष्या मन्यन्ते' इति हि मनुष्याः प्रकृताः ; तेषां च अभ्युदयनिःश्रेयससाधने विशेषतोऽधिकार इत्युक्तम् । न परस्य ब्रह्मणो नाप्यपरस्य प्रजापतेः । अतो द्वैतैकत्वापरब्रह्मविद्यया कर्मसहितया अपरब्रह्मभावमुपसम्पन्नो भोज्यादपावृत्तः सर्वप्राप्त्योच्छिन्नकामकर्मबन्धनः परब्रह्मभावी ब्रह्मविद्याहेतोर्ब्रह्मेत्यभिधीयते । दृष्टश्च लोके भाविनीं वृत्तिमाश्रित्य शब्दप्रयोगः । यथा—'ओदनं पचति' इति । शास्त्रे च 'परिव्राजकः सर्वभूताभयदक्षिणाम्' इत्यादि, तथा इहेति केचित् ब्रह्म ब्रह्मभावी पुरुषो ब्राह्मण इति व्याचक्षते । तन्न ; सर्वभावोपपत्तेरनित्यत्वदोषात् । न हि सोऽस्ति लोके परमार्थतः,

PDF Compressor Free Version

यो निमित्तवशाद्भावान्तरमापद्यते नित्यश्चेति । तथा ब्रह्मविज्ञाननैमित्तकता चेत्, सर्वभावापत्तिः, नित्या चेति विरुद्धम् । अनित्यत्वे च कर्मफलतुल्यतेत्युक्तो दोषः । अविद्याकृतासर्वत्वनिवृत्तिं चेत् सर्वभावापत्तिं ब्रह्मविद्याफलं मन्यसे, ब्रह्मभाविपुरुषकल्पना व्यर्था स्यात् । प्राक् ब्रह्मविज्ञानादपि सर्वो जन्तुर्ब्रह्मत्वान्नित्यमेव सर्वभावापन्नः परमार्थतः । अविद्यया त्वब्रह्मत्वमसर्वत्वं चाध्यारोपितम्—यथा शुक्तिकायां रजतम्, व्योम्नि तलमलवत्त्वादि ; तथेह ब्रह्मण्यध्यारोपितमविद्यया अब्रह्मत्वमसर्वत्वं च ब्रह्मविद्यया निवर्त्यत इति मन्यसे यदि, तदा युक्तम्—यत् परमार्थत आसीत् परं ब्रह्म ब्रह्मशब्दस्य मुख्यार्थभूतम् 'ब्रह्म वा इदमग्र आसीत्' इत्यस्मिन् वाक्ये उच्यत इति वक्तुम्, यथाभूतार्थवादित्वाद्वेदस्य । न त्वियं कल्पना युक्ता ; ब्रह्मशब्दार्थविपरीतो ब्रह्मभावी पुरुषो ब्रह्मेत्युच्यत इति, श्रुतहान्यश्रुतकल्पनाया अन्याय्यत्वात् महत्तरे प्रयोजनान्तरेऽसति । अविद्याकृतव्यतिरेकेण अब्रह्मत्वमसर्वत्वं च विद्यत एवेति चेत्, न ; तस्य ब्रह्मविद्यया अपोहानुपपत्तेः । न हि क्वचित् साक्षात् वस्तुधर्मस्यापोढ्री दृष्टा कर्त्री वा ब्रह्मविद्या । अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते । तथेहापि अब्रह्मत्वमसर्वत्वं चाविद्याकृतमेव निवर्त्यतां ब्रह्मविद्यया ; न तु पारमार्थिकं वस्तु कर्तुं निवर्तयितुं वार्हति ब्रह्मविद्या । तस्माद्व्यर्थैव श्रुतहान्यश्रुतकल्पना ॥

ब्रह्मण्यविद्यानुपपत्तिरिति चेत्, न ; ब्रह्मणि विद्याविधानात् । न हि शुक्तिकायां रजताध्यारोपणेऽसति शुक्तिकात्वं ज्ञाप्यते चक्षुर्गोचरापन्नायाम् इयं शुक्तिका न रजतम् इति । तथा 'सदेवेदं सर्वम्' 'ब्रह्मैवेदं सर्वम्' 'आत्मैवेदं सर्वम्' 'नेदं द्वैतमस्त्यब्रह्म'

PDF Compressor Free Version

इति ब्रह्मण्येकत्वविज्ञानं न विधातव्यम्, ब्रह्मण्यविद्याध्यारोपणायामसत्याम्। न ब्रूमः—शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपणा नास्तीति; किं तर्हि? न ब्रह्म स्वात्मनि अतद्धर्माध्यारोपनिमित्तम् अविद्याकर्तृ चेति। भवत्वेवं नाविद्याकर्तृ भ्रान्तं च ब्रह्म। किन्तु नैवाब्रह्म अविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते। 'नान्योऽतोऽस्ति विज्ञाता' 'नान्यदतोऽस्ति विज्ञातृ' 'तत्त्वमसि' 'आत्मानमेवावेत् अहं ब्रह्मास्मि' 'अन्योऽसावन्योऽहमस्मीति न स वेद' इत्यादिश्रुतिभ्यः। स्मृतिभ्यश्च—'समं सर्वेषु भूतेषु' 'अहमात्मा गुडाकेश' 'शुनि चैव श्वपाके च' इति 'यत्र सर्वाणि भूतानि' 'यस्तु सर्वाणि भूतानि' इति च मन्त्रवर्णात्। नन्वेवं शास्त्रोपदेशानर्थक्यमिति, बाढम्, एवमवगतेऽस्त्वेवानर्थक्यम्। अवगमानर्थक्यमपीति चेत्, न; अनवगमनिवृत्तेर्दृष्टत्वात्। तन्निवृत्तेरप्यनुपपत्तिरेकत्व इति चेत्, न; दृष्टविरोधात्; दृश्यते ह्येकत्वविज्ञानादेवानवगमानिवृत्तिः; दृश्यमानमप्यनुपपन्नमिति ब्रुवतो दृष्टविरोधः स्यात्। न च दृष्टविरोधः केनचिदप्यभ्युपगम्यते। न च दृष्टेऽनुपपन्नं नाम, दृष्टत्वादेव। दर्शनानुपपत्तिरिति चेत्, तत्राप्येषैव युक्तिः॥

'पुण्यो वै पुण्येन कर्मणा भवति' 'तं विद्याकर्मणी समन्वारभेते' 'मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इत्येवमादिश्रुतिस्मृतिन्यायेभ्यः परस्माद्विलक्षणोऽन्यः संसार्यवगम्यते; तद्विलक्षणश्च परः 'स एष नेति नेति' 'अशनायाद्यत्येति' 'य आत्मापहतपाप्मा विजरो विमृत्युः' 'एतस्य वा अक्षरस्य प्रशासने' इत्यादिश्रुतिभ्यः; कणादाक्षपादादितर्कशास्त्रेषु च संसारिविलक्षण ईश्वर उपपत्तितः साध्यते, संसारिसंसारदुःखापनयार्थिप्रवृत्तिदर्शनात् स्फुटमन्यत्वमीश्वरात् संसारिणोऽवगम्यते; 'अवाक्यनादरः' 'न मे पार्थास्ति' इति श्रुति-

PDF Compressor Free Version

स्मृतिभ्यः ; 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' 'तं विदित्वा न लिप्यते' 'ब्रह्मविदाप्नोति परम्' 'एकधैवानुद्रष्टव्यमेतत्' 'यो वा एतदक्षरं गार्गि विदित्वा' 'तमेव धीरो विज्ञाय' 'प्रणवो धनुः, शरो ह्यात्मा, ब्रह्म तल्लक्ष्यमुच्यते' इत्यादिकर्मकर्तृनिर्देशाच्च । मुमुक्षोश्च गतिमार्गविशेषदेशोपदेशात् । असति भेदे कस्य कुतो गतिः स्यात् ? तदभावे च दक्षिणोत्तरमार्गविशेषानुपपत्तिः गन्तव्यदेशानुपपत्तिश्चेति ; भिन्नस्य तु परस्मादात्मनः सर्वमेतदुपपन्नम् । कर्मज्ञानसाधनोपदेशाच्च—भिन्नश्चेत् ब्रह्मणः संसारी स्यात्, युक्तस्तं प्रत्यभ्युदयनिःश्रेयससाधनयोः कर्मज्ञानयोरुपदेशः, नेश्वरस्य आप्तकामत्वात् । तस्मात् युक्तं ब्रह्मेति ब्रह्मभावी पुरुष उच्यत इति चेत्, न ; ब्रह्मोपदेशानर्थक्यप्रसङ्गात् । संसारी चेत् ब्रह्मभावी अब्रह्म सन्, विदित्वा आत्मानमेव 'अहं ब्रह्मास्मि' इति सर्वमभवत् ; तस्य संसार्यात्मविज्ञानादेव सर्वात्मभावस्य फलस्य सिद्धत्वात् परब्रह्मोपदेशस्य ध्रुवमानर्थक्यं प्राप्तम् । तद्विज्ञानस्य कचित् पुरुषार्थसाधनेऽविनियोगात् । संसारिण एव 'अहं ब्रह्मास्मि' इति ब्रह्मत्वसम्पादनार्थ उपदेश इति चेत्, अनिर्ज्ञाते हि ब्रह्मस्वरूपे किं सम्पादयेत्—अहं ब्रह्मास्मि इति ? निर्ज्ञातलक्षणे हि ब्रह्मणि शक्या सम्पत् कर्तुम् । न, 'अयमात्मा ब्रह्म' 'यत्साक्षादपरोक्षाद्ब्रह्म' 'य आत्मा' 'तत् सत्यं स आत्मा' 'ब्रह्मविदाप्नोति परम्' इति प्रकृत्य 'तस्माद्वा एतस्मादात्मनः' इति च सहस्रशो ब्रह्मात्मशब्दयोः सामानाधिकरण्यात् एकार्थत्वमेवेत्यवगम्यते ; अन्यस्य हि अन्यत्वे सम्पत् क्रियते, नैकत्वे ; 'इदं सर्वं यदयमात्मा' इति च प्रकृतस्यैव द्रष्टव्यस्यात्मन एकत्वं दर्शयति । तस्मान्नात्मनो ब्रह्मत्वसम्पदुपपत्तिः । न चाप्यन्यत् प्रयोजनं ब्रह्मोपदेशस्य गम्यते ; 'ब्रह्म वेद ब्रह्मैव भवति' 'अभयं वै जनक प्राप्तोऽसि' 'अभयं हि वै ब्रह्म भवति' इति च तदापत्तिश्रवणात् ।

PDF Compressor Free Version

सम्पत्तिश्चेत्, तदापत्तिर्न स्यात् । न हि अन्यस्य अन्यभाव उपपद्यते। वचनात् सम्पत्तेरपि तद्भावापत्तिः स्यादिति चेत्, न; सम्पत्तेः प्रत्ययमात्रत्वात् । विज्ञानस्य च मिथ्याज्ञाननिवर्तकत्वव्यतिरेकेणाकारकत्वमित्यवोचाम । न च वचनं वस्तुनः सामर्थ्यजनकम् । ज्ञापकं हि शास्त्रं न कारकमिति स्थितिः । 'स एष इह प्रविष्टः' इत्यादिवाक्येषु च परस्यैव प्रवेश इति स्थितम् । तस्मात् ब्रह्मेति न ब्रह्मभाविपुरुषकल्पना साध्वी । इष्टार्थबाधनाच्च । सैन्धवघनवदनन्तरमबाह्यमेकरसं ब्रह्म इति सर्वस्यामुपनिषदि प्रतिपिपादयिषितोऽर्थः काण्डद्वयेऽप्यन्तेऽवधारणादवगम्यते 'इत्यनुशासनम्' 'एतावदरे खल्वमृतत्वम्' इति ॥

यदपि भामतीकृतामुल्लेखः समुद्धृतः—न तावत् संसार्यतिरिक्तस्य तस्याभावः, तत्प्रतिपादका हि शतशः आगमाः 'ईक्षतेर्नाशब्दम्' 'गतिसामान्यात्' इत्यादिभिः सूत्रसन्दर्भैरुपपादिताः । न चात्रापि संसार्यतिरिक्तः परमात्मसंकीर्तनाभावः, सुषुप्त्युत्क्रान्त्योस्तत्संकीर्तनात् । न च प्राज्ञस्य परमात्मनो जीवाद्भेदेन संकीर्तनं सति संभवे 'राहोः शिरः' इतिवदौपचारिकं युक्तम् । न च प्राज्ञशब्दः प्रज्ञाप्रकर्षशालिनि निरूढवृत्तिः कथञ्चिदज्ञविषयो व्याख्यातुमुचितः । न च प्रज्ञाप्रकर्षोऽसंकुचद्वृत्तिः विदितसमस्तवेदितव्यात् सर्वविदोऽन्यत्र संभवति । न चेत्थंभूतो जीवात्मा । तस्मात् सुषुप्त्युत्क्रान्त्योर्भेदेन जीवात् प्राज्ञस्य परमात्मनो व्यपदेशात्—इति, तदपि अव्यवहितोत्तरग्रन्थस्वारस्यान्न स्वसमीहितसाधनम् । तथा हि—व्यपदेशादित्यनन्तरं 'योऽयं विज्ञानमयः' इत्यादिना जीवात्मानं लोकसिद्धमनूद्य तस्य परमात्मभावोऽनधिगतः प्रतिपाद्यत इत्यपि तत्रत्यः पाठः समूहनीयः, दयानन्दीयसिद्धान्तसमनुसरणस्य भवादृशाननुरूपात्वात् । अपि च तत्रैव भामतीकृद्भिर्व्यवस्थापितं चैतत्—न च जीवात्मानुवादमात्र-

PDF Compressor Free Version

पराणि एतानि वचांसि । अनधिगतार्थानवबोधपरं हि शास्त्रं प्रमाणम्, न त्वनुवादमात्रनिष्ठं भवितुमर्हति । अत एव च संसारिणः परमात्मभावविधानाय आदिमध्यावसानेषु अनुवाद्यतया अवमर्शं उपपद्यते—इत्यादि । एवम् अप्पय्यदीक्षितादीनां वचनोपन्यासेनापि द्वैतसाधनं परवञ्चनमेवेति सुधीभिः स्वयमेवोहनीयम् ; स्थालीपुलाकन्यायेन कतिपयांशे दृष्टत्वादेव ॥

अपि चानुक्तोपालम्भनमेतत् । न ह्यद्वैतवादिभिर्व्यावहारिको जीवेशादिभेदो नाभ्युपेयते, प्रत्युत जीवेशादिवैलक्षण्यासिद्धौ शोकमोहाद्यनेकानर्थोपप्लुतस्य जीवस्य ब्रह्मत्वविधानानर्थक्यप्रसंगः स्यात् । स्वस्थस्य प्रतिबुद्धस्य निरुपद्रुतस्य तस्यैव निद्राद्युपप्लुतत्वेन विपर्यस्तप्रकृतिकापेक्षया अवैलक्षण्ये निद्राणस्य प्रबोधानुकूलव्यापारानुपपत्तेः । सत्यानृतयोः संभिन्नयोर्लौकिकयोरपि नायं सर्पः किन्तु रज्जुरियमिति विवेकेनैव प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगितया सर्पस्य बाध्यत्वोपपत्तिः, सर्पापेक्षया रज्जुखण्डस्य वैलक्षण्यानवगमे रज्जुरियमिति तत्स्वरूपोपदेशेऽपि सर्पाबाधात् भयकम्पाद्यनुवृत्तिश्च स्यात् । अत एव च सूत्रकृतां भाष्यकृतां च तत्र भेदोपवर्णनं न नः प्रतिकूलम्, रज्ज्वां सर्पमिवात्मानं जीवं ज्ञात्वा सभयो भवेत् नाहं जीवः चिदात्मेति ज्ञातं चेत्, निर्भयो भवेत् इत्यद्वैतसिद्धान्तडिण्डिमस्य केनाप्यश्रुतत्वाभावात् । एतेन 'अथातो ब्रह्मजिज्ञासा' 'भेदव्यपदेशाच्च' 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' इत्यादिसमुद्धरणैरपि केवलं पत्रमेव कलुषितम्, उक्तोत्तरत्वेन निस्सारत्वात् । 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति अभेदबोधकसूत्रादीनामुक्तत्वात्, वक्ष्यमाणत्वाच्च । यच्च—

PDF Compressor Free Version

'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥'
'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।'
'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥'

इत्यादिवचनानि भेदसाधकत्वेनोदाहृतानि तान्यपि व्यावहारिकभेद-परत्वेन सावकाशत्वात् पारमार्थिकभेदपरत्वाभावादकिंचित्कराणि । 'द्वाविमौ पुरुषौ लोके' इत्यस्यार्थस्तु—क्षरतीति क्षरः नश्वरो महदादिस्थूलान्तः संसारलक्षणः कार्यवर्गः सर्वोऽपि, एकः पुरुषः स्वकाले एव क्षरणशालित्वात्, अक्षरः मूलप्रकृतिः संसारकारण-लक्षणः द्वितीयः पुरुषः परमात्मविज्ञानं विना अविनाशित्वात् 'अक्षरात् परतः परः' इत्यादिश्रुतौ स्वकार्यापेक्षया परस्य कारणस्य परतत्त्वापेक्षया अपरस्य चाक्षरत्वोक्तेः । पुरुषत्वं चोभयोः पुरुषोपाधित्वादेव, न तु स्वतः । भवन्मतेऽपि क्षरस्य मुख्यया वृत्त्या पुरुषत्वानुपपत्तेः । कौ तावित्याकाङ्क्षायां भगवान् स्वयमेवाह—भूतानि भवन्तीति भूतानि महदादीनि भूम्यन्तानि कार्याणि सर्वाणि 'क्षरः' इत्युच्यन्ते । महदादिपृथिव्यन्तव्यष्टिसमष्ट्यात्मकस्थूल-सूक्ष्मप्रपञ्चलक्षणः कार्यराशिः 'कूटः' इत्युच्यते । तत्र कूटे सर्वस्मि-न्नपि विकारमात्रे घटादिषु मृदिव बहिरन्तश्च सर्वतो व्याप्य तिष्ठति इति अव्यक्तं प्रकृतिशब्दवाच्यम् 'कूटस्थः' इत्युच्यते, स एवाक्षर इत्युच्यते, ताभ्यां कार्यकारणात्मकाभ्यां क्षराक्षराभ्यामन्यत्वमधिष्ठा-नत्वं तस्य प्रत्यगभिन्नपरमात्मनो युक्तमेव वक्ति भगवान्—'उत्तमः पुरुषस्त्वन्यः' इति । तदर्थश्चेत्थम्—उत्तमः सर्वोत्कृष्टतमः, 'दिवो

PDF Compressor Free Version

ज्यायानन्तरिक्षाज्ज्यायान्' इति श्रुतेः स्वकीयया सत्तया स्फूर्त्या च निरतिशयवैभवत्वादनन्तत्वात् अपास्तसमस्तविशेषत्वेन विशुद्धत्वाच्च अविद्यातत्कार्यात्मकतमसा अस्पृष्टत्वाच्च। स च ताभ्यामन्यो ज्ञातृत्वसूक्ष्मत्वासङ्गत्वादिभिर्विवेचितः परमात्मा परमश्चासौ आत्मा परमात्मा इत्युच्यते पूर्वमपि सन् 'विमुक्तश्च विमुच्यते' इतिवत्। 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' 'जन्माद्यस्य यतः' 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यादिश्रुतिसूत्रादिस्वारस्येन मृदादिदृष्टान्तैश्च एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्त्या च सर्वस्य चिदचिदात्मकप्रपञ्चस्य अभिन्ननिमित्तोपादानकतया परमात्मैकाश्रयता वाच्या। सा च 'अजायमानो बहुधा व्यजायत' इत्यादिश्रुतिशतसमर्थिताध्यासिकसम्बन्धं विना असङ्गस्य परस्य नाञ्जस्येनोपपद्यते। तस्मात् श्लिष्टमेतत् यत् ताभ्यामन्यत्वेन विविक्तः उत्तमपुरुषः परमात्मेत्युदाहृतः। आध्यासिकमेव भेदमाहृत्य नियम्यनियन्तृत्वाद्युपपत्त्या लौकिकवैदिकसमस्तव्यवहारोपपत्तिः। न चैवमद्वैतसिद्धान्ते क्षराक्षरयोरपि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यादिन्यायेन परमकारणानन्यत्वात् कथमुत्तमपुरुषस्य क्षराक्षराभ्यामन्यत्वम्? कथं वा क्षराक्षरयोरपि परस्परं भिन्नत्वम्? तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात् इति वाच्यम्; क्षराक्षरयोः परमकारणादनन्यत्वेऽपि परमकारणस्य ताभ्यामन्यत्वे बाधकाभावात्। अन्यूनसत्तायां न्यूनसत्ताया अन्तर्भावेऽपि न्यूनसत्तायामन्यूनसत्ताया अन्तर्भावस्य असामञ्जस्यात्। अतो व्यपदिश्यतेऽनुभूयते च घटशरावोदञ्चनाद्यमत्रजातं मृण्मात्रं मृद्व्यतिरिक्तं नास्त्येवेत्यर्थः; तद्व्यतिरेकेणानुपलम्भात्। न चैवं व्यपदिश्यतेऽनुभूयते वा शरावोदञ्चनाद्यमत्रमेव मृत्तिका न तद्व्यतिरिक्तं मृत्त्वमिति, तद्व्यतिरेकेणाप्युपलम्भात्।

PDF Compressor Free Version

अत एव विवेकेऽपि तन्तुषु पटाभावो विज्ञायते न पटे तन्त्वभावः। सत्त्वासत्त्वाभ्यां विप्रतिपत्तिश्च पटादौ कार्य एव। एवमुत्तमपुरुषस्य क्षराक्षराभ्यामन्यत्वेऽपि न विरोधः। न वा क्षराक्षरनिष्ठभेदनिरूपकत्वेनानन्त्यं व्याहन्यते स्वान्यूनसत्ताकपरिच्छेदशून्यत्वस्यैव तत्त्वात्। परस्परमपि क्षराक्षरयोर्भेदो निरुपप्लुतः। तदुक्तमाचार्यचरणैः 'भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्' इति सूत्रभाष्ये—'उपपद्यत एवायमस्मत्पक्षेऽपि विभागः, एवं लोके दृष्टत्वात्। तथा हि—समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनवीचीतरङ्गबुद्बुदादीनामितरेतरविभागः इतरेतरसंश्लेषलक्षणश्च व्यवहार उपलभ्यते। न च समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनतरङ्गादीनामितरेतरभावापत्तिर्भवति। न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति, एवमिहापि'—इति॥

यदपि—अनुमतं चैतत् 'स्मृतेश्च' इति सूत्रव्याख्याने, स्मृतिश्च शारीरपरमात्मनोर्भेदं दर्शयति—'ईश्वरः सर्वभूतानाम्' इति शङ्कराचार्येणेति—तन्न, उक्तविधयाभ्युपगतेऽपि भेदेऽनिष्टाभावात्॥

यत्तु—पदे पदे शङ्कराचार्यैर्जीवेशादिभेदस्य श्रौतस्मार्तलक्षणस्य वर्णाश्रमाद्युचितकर्मोपासनादेः पारमार्थिकत्वं नाभ्युपेयते, ततश्चावैदिकत्वम्—इत्युद्घुष्यते तत्रैवं भवान् प्रष्टव्यः—किं वस्तुनो यथाविद्यमानरूपान्वाख्यानेनावैदिकत्वम्, अहोस्वित् वेदविपरीतान्वाख्यानेनावैदिकत्वमिति। आद्ये भवद्भिरपि घटादीनां नित्यत्वं चेतनत्वमसङ्गत्वं पूर्णत्वं च नाभ्युपेयत इति कथं न भवतां नास्तिकत्वमवैदिकत्वं वा? अथ घटादीनां नित्यत्वादिविपरीतबोधकप्रमाणबलात् अनित्यत्वादिकमास्थीयते, तर्हि अत्रापि माध्यस्थ्यमवलम्ब्य किमिति न दीयते दृष्टिः। यतोऽत्रापि 'वाचारम्भणं विकारो नामधेयम्' 'अतोऽन्यदार्तम्' 'नेह नानास्ति किञ्चन' 'माया-

PDF Compressor Free Version

मात्रमिदं द्वैतमद्वैतं परमार्थतः’ इत्यादिश्रुतिस्मृतियुक्तिशतैरद्वैतस्यैव पारमार्थिकसत्त्वं तदितरस्य व्यावहारिकसत्यत्वमिति मानमितम्। वेदबोधितत्त्वादेवोक्तसिद्धान्तस्य द्वितीयोऽपि पक्षः पराहतः। किञ्च, वित्तपुत्रकलत्रादिषु हेयत्वेनाभिमतेष्वपि यादृशोऽनुरागो विदामपि श्रुतिस्मृतिलक्षणे कर्मोपासनादौ तादृशेनाप्यनुरागेण मुच्यन्त एव जन्तवः क्षुन्निवृत्त्याद्यनर्थापनयनानुकूलव्यापारे नियमेन विदुषामपि प्रवृत्तिदर्शनस्याभ्युपगतत्वाच्च। मिथ्यात्वावैशेष्येऽपि कस्यचित् हेयत्वम् उपादेयत्वं च नियमेन कस्यचित् प्रयोजनातिशयादुपपद्यते; यथा भवन्मते सत्यत्वाविशेषेऽपि आत्माकाशादीनां नित्यत्वम् अनित्यत्वं च घटादीनां परस्य चोपादेयत्वं तदितरस्य हेयत्वमिति तद्वत्। फलबलकल्प्यस्वभाववैलक्षण्यस्यैव त्वयापि शरणीकरणीयत्वात्। व्यावहारिकेऽपि भोजनादौ यथा कर्तव्यताबुद्धिः तद्वदपि कर्मोपासनादौ कर्तव्यताबुद्धौ जातायां नास्तिकत्वास्याप्रसङ्गात्। किञ्च, न हि जगतो मिथ्यात्वोक्त्या अवैदिकत्वं बौद्धत्वं वा, तथात्वे वैष्णवसिद्धान्तसर्वस्वभूतश्रीमद्भागवतादिसच्छास्त्रजातस्य अवैदिकत्वप्रसंगात्। तथा हि—

‘तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम्।
त्वय्येव नित्यसुखबोधतनावनन्ते
मायात उद्यदपि यत् सदिवावभाति॥’

‘ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम्।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा॥’

‘य आत्मनो दृश्यगुणेषु सन्निति
व्यवस्यते स्वव्यतिरेकतोऽबुधः।

PDF Compressor Free Version

विनानुवादं न च तन्मनीषितं
सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥ '

इत्यादिभिः सुस्पष्टमेव जगतो मिथ्यात्वं प्रतीयते । अपि च जगतो मिथ्यात्व एव ततो विरक्तस्य पारमार्थिकभगवत्तत्त्वप्रतिपित्सा संभवति । देहादिध्रौव्यवादिनां तु प्रपञ्च एव पारमार्थिकसत्यत्वाभिनिवेशेन तत्रत्यस्यैव उत्कर्षस्याभिलषितत्वेन ततो विरक्त्यसंभवेन भगवत्यनुरक्त्यसंभवात् । दृश्यन्ते च देहादिषु नश्वरेषु सत्यत्वाभिनिवेशवन्तः पामराः भोगादिना तत्पोषणाय सच्छास्त्रं तल्लक्षणं धर्मं चातिक्रामन्तः । द्वैतिनश्च यशोऽधिगन्तुं सुखलिप्सया वा मात्सर्यादिदोषग्रस्ततया च वैदिकसिद्धान्तस्यावैदिकत्वं स्थापयन्तः दुराग्रहमहाग्रहगृहीतत्वेन भस्मत्रिपुण्ड्रादिधारकानाचार्यान् श्रौतस्मार्तकर्मनिरतान् निन्दन्तो ब्रह्मद्वेषदावानलदग्धचेतस्त्वेन हितोक्तमपि कापथासक्ता मुमूर्षवः पथ्यमिव अनाद्रियमाणा देहादिध्रौव्याधिगतिफलं प्रत्यक्षं प्रदर्शयन्तः । भागवतास्तु तद्विपर्ययेण भगवत एव सत्यत्वममृतत्वं तदितरस्य देहादेरनृतत्वं मर्त्यत्वं च अनृतेनैव च तेन सतः प्राप्यत्वं परमात्मनः स्वस्वरूपत्वेन प्रत्यक्त्वात् सर्वान्तरतमत्वं परप्रेमास्पदत्वं चाभ्युपगच्छन्ति ॥

'एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् ।
यत्सत्यमनृतेनेह मर्त्येनाप्नोति यामृतम् ॥
अहं भवान् न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥ '

प्रेम्णश्च स्वाश्रयविषययोर्व्यवधानासहिष्णुत्वस्वाभाव्यस्य प्रियापरिष्वङ्गे रोमावल्युद्गतेर्व्यवधानात् सहृदयहृदयैकवेद्यवेदनया 'उत्तस्थुराराात् सहसासनाशयात्' इति शुकोक्त्या चानुमीय-

PDF Compressor Free Version

मानत्वात् । वस्तुतस्तु गुरुशास्त्रैकसमधिगम्ये तत्त्वे कथं वादिप्रतिवादिभावो युज्येत । तथा च रसात्मकस्य प्रेम्णो निखिलरसामृतमूर्तावेव, प्रतिबिम्बस्य रश्मिजालस्य वा सहस्ररश्मौ भगवति भास्कर इवाव्यभिचारितया प्रतिष्ठितत्वम् ; अन्यत्र तु औपाधिकत्वव्यभिचारित्वाभ्याम् । अत एव व्यवधानासहिष्णुभिर्देशकालादिभेदभिन्नं जगदपाकुर्वद्भिः भक्तशिरोमणिभिः प्रेमा प्रतिष्ठापितः परमभागवतैः सत्कुलकमलदिवाकरैः श्रीगोस्वामितुलसीदासमहोदयैरपि—

'यत्सत्त्वादमृषैव भाति सकलं रज्ज्वां यथाहेर्भ्रमः'॥
[जेहि जाने जग जाइ हिराई । जागे यथा स्वप्नभ्रम जाई]

अभ्युपगम्य चैतदवोचाम—प्राक् ब्रह्मात्मताविज्ञानात् मिथ्यात्वबुद्धेरेवानुदयात् जातायां च ब्रह्मात्मताप्रतिपत्तिप्रमायां कृतार्थस्य कर्मादावप्रवृत्तेरप्यनिष्टत्वाभावात् । न च शास्त्रानर्थक्यप्रसंगः, कृतार्थं प्रति शास्त्रानर्थक्यस्य सर्ववादिसंप्रतिपन्नत्वात् । न हि नावातितीर्णेन नदीं नौर्न त्यज्यते । स्वाभाविककामकर्मलक्षणस्य मृत्योरतितरणार्थमेव अविद्यापदवाच्यस्य कर्मणो विधानात् 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति श्रुतेः । द्वैतिनां तु चिदचिदात्मकस्य प्रपञ्चस्य वस्तुतो ब्रह्मभिन्नत्वे कथमेकविज्ञानेन सर्वविज्ञानम्, व्यापकस्यापि वियतोऽन्यस्य वा परिच्छिन्नस्य विज्ञानेऽसंनिकृष्टस्य तत्स्थस्य अविज्ञानात् । तथा सति कथं न वेदविरोधः प्रसज्येत । उष्णात्मक इव वह्नौ शीतैकदेशम्, प्रकाशात्मके वा सवितरि तमएकदेशं प्रत्यग्विपरीतं पराक्त्वमनात्मतां च कल्पयतां कथं न वा भगवदपराधः स्यात् । अद्वैतिनस्तु साहङ्काराद्युपप्लुतात्मकं नामरूपक्रियात्मकमखिलमपि प्रविलाप्य भगवन्तमेव प्रत्यक्त्वेन परमप्रेमास्पदतया अर्चयन्ति भेदाभेदाभ्याम्, स्वात्मसमर्पणेनापि भगवतः पूर्णतायै यतन्ते ।

PDF Compressor Free Version

भवद्भिर्भागवतैरपि घटादीनां सत्यत्वव्यवस्थापनया सातिशयत्वेन दृष्टेष्वपि तेषु यथा प्रेमा प्रदर्शितः, न तथा स्वोपास्यभूतस्य भगवतः पूर्णत्वसिद्ध्यर्थम् ; प्रत्युत न मनागपि विलोकितो भगवतः पूर्णत्वमपाकुर्वद्भिः स्वभागवतत्वे विरोधोऽपि । तदुक्तमभियुक्तैः—

'द्वैतं मोहाय बोधात् प्राग्जाते बोधे मनीषया ।
भक्त्यर्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम् ॥' इति ।

एतादृशतत्त्वविदामेव मुख्यं धर्मित्वमुपासकत्वं च, 'स युक्तः कृत्स्नकर्मकृत्' 'ज्ञानी त्वात्मैव मे मतम्' 'एकभक्तिर्विशिष्यते' 'ज्ञानेनासौ बिभर्ति माम्' इत्यादिवचनशतैरादृतं श्रीमुखेनैव । तेषामेव च कृतार्थत्वेन फलानुसन्धिलक्षणकैतवराहित्येन, अजितरुचिरलीलाकृष्टसारतया अचिन्त्यानवगाह्यमहामहिमशालिनि अपरिगणितकन्दर्पदर्पदलनपटीयसि अप्रतर्क्यसौन्दर्यमाधुर्यसुधासिन्धौ परममङ्गलमये महस्विनि निखिलरसामृतमूर्तौ भगवति सरसवाही प्रेमा निरूढः यत् सुभक्तैरनतिशयप्रीत्या कैतववर्जनात् स्वरसतो ज्ञात्वापि स्वाद्वयं पदं विभेदभावमाहृत्य सेव्यतेऽत्यन्ततत्परैः । तदेतदतिरोहितमेव समन्वयसाम्राज्यपथानुसारिणां शास्त्रीयतात्पर्यपरिशीलनसंस्कृतशेमुषीकाणाम् ॥

किञ्च, पारमार्थिकसत्त्वं च कीदृशमभिमतमायुष्मताम् ? न तावत् प्रमाविषयत्वं तद्योग्यत्वं भ्रमाविषयत्वं वा, चक्षुराद्ययोग्यभ्रमप्रमाघटितत्वेन चक्षुराद्यगम्यत्वात्, वक्ष्यमाणदूषणगणग्रासाच्च । तथा हि—न तावदाद्यः पक्षः क्षोदक्षमः, असति प्रमाणाप्रवृत्तेः प्रमाविषयत्वात् प्राक् सत्त्वस्य वक्तव्यत्वेन तस्य तदन्यत्वात् ; सत्त्वनिरूपणं विना सदर्थविषयत्वरूपप्रमात्वस्यानिरूपणेनान्योन्याश्रयात् ; मिथ्याभूतस्य शुक्तिरजतसंसर्गस्य व्यवसायद्वारा, साक्षाच्च निषेध्यत्वादिना

PDF Compressor Free Version

प्रमाविषयत्वाभ्युपगमाच्च । नापि द्वितीयः पक्षः, योग्यताया अनिरूपणात् । न तृतीयः, असिद्धेः—सर्वस्यैव क्षणिकत्वादिना प्रमाविषयत्वाभ्युपगमात् । अत एव नासत्त्वाप्रकारकप्रमाविषयत्वमपि, अन्योन्याश्रयाच्च । नापि सत्त्वप्रकारकप्रमाविषयत्वम्, आत्माश्रयात् । नापि सत्ताजातिः, अर्थक्रियाकारित्वम्, असद्विलक्षणत्वं वा ; एतेषां मिथ्यात्वाविरोधेन तत्प्रत्यक्षेणापि मिथ्यात्वानुमानादौ बाधाभावात् । नापि वेदान्त्यभिमतमिथ्यात्वाभावः, तुच्छेऽतिव्याप्तेः । नाप्यसद्विलक्षणत्वे सत्यनारोपितत्वम् । अनारोपितत्वं हि आरोपाविषयत्वम्, तच्चासंभवि, सर्वस्यापि क्षणिकत्वादिना आरोपविषयत्वात् । नाप्यस्तित्वप्रकारकप्रमां प्रति कदाचिद्विषयत्वम्, कालसम्बन्धित्वं वा, प्रमात्वस्य सत्त्वघटितत्वेन चक्षुराद्ययोग्यत्वेन च पूर्वोक्तदोषात् । शुक्तिरूप्यस्यापि प्रतिभासकालसंबन्धित्वाविशेषाच्च बाधेन तात्त्विकत्रैकालिकसम्बन्धनिषेधेऽपि अतात्त्विककालसम्बन्धानिषेधात् तात्त्विककालसम्बन्धित्वं सत्त्वमिति तु न वक्तव्यम्, तात्त्विकत्वस्याद्याप्यनिरूपणात् । यत्तु—

‘यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपि ।
तत्र स्यात्तदनिर्वाच्यं चेदिहापि तथास्तु नः ॥’ इति ।

तदत्र अद्वैतसिद्धिकृतामेवोक्तिर्विलसति—नूनं विवाहसमये कन्यायाः पित्रा निजगोत्रं पृष्टस्य यदेव भवतां गोत्रं तदेव ममापि गोत्रमिति वदतो वरस्य भ्राता भवान्, यतो जामातृश्वशुरयोरेकगोत्रत्वे विवाहानुपपत्तिवत् जगद्ब्रह्मणोरेकसत्त्वे जगतोऽसत्त्वमेव स्यात् । स्वप्रकाशाद्वितीयचैतन्यरूपत्वमेव ब्रह्मणः सत्त्वम् । तदेव चेज्जडस्यापि जगतस्तदा रजतत्वविरोधिशुक्तिसत्तया रजतस्येव जडत्वविरोधिस्वप्रकाशसत्तया जगतः स्वरूपतो

PDF Compressor Free Version

मिथ्यात्वोपपत्तेः—इत्यन्यत्र विस्तरः । यच्च—व्यावहारिकप्रामाण्यम् अप्रामाण्यं वेति न कश्चिद्विशेष इत्यप्रामाण्यमेव लौकिकवैदिकव्यवहारमूलभूतानां प्रमाणानाम्—तदन्यत्रापाकरिष्यते ॥

वक्तारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्विताभूत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥

यच्च 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादीनामखण्डार्थावबोधकत्वेनाभेदपरत्वाभावः; सखण्डार्थत्वेऽपि न मुख्यवृत्त्या त्वंपदबोध्यस्याल्पज्ञत्वादिविशिष्टजीवचैतन्यस्य तत्पदमुख्यार्थसर्वज्ञत्वादिविशिष्टचैतन्येन अभेदबोधकत्वं युज्यते, अल्पज्ञत्वसर्वज्ञत्वयोर्विरोधात् । न हि विरुद्धधर्मवतोः क्वाप्यभेदो दृष्टः, तथात्वे दहनतुहिनयोरप्यभेदप्रसंगादिति—तदेतदपि असमञ्जसम्, स्वस्याल्पज्ञत्वादिविशिष्टस्य सर्वज्ञत्वादिविशिष्टचैतन्यात्मकेन परेणाभेदानुपपत्तौ शङ्कितायाम् उपक्रमोपसंहारादिषड्विधलिङ्गेनाशेषविशेषप्रत्यनीके ब्रह्मणि तात्पर्यमवधृत्य प्रत्यक्षागमादिप्रमितयोस्तत्त्वंपदार्थनिष्ठसर्वज्ञत्वाद्यल्पज्ञत्वाद्योः व्यावहारिकसत्यत्वेन मिथ्यात्वं चावगत्य घटाकाशमहाकाशयोरिव परमार्थतः तत्त्वमस्यादिवाक्यानां जहदजहल्लक्षणयाविरुद्धचिदात्मना अभेदानतिरिक्तामखण्डार्थतां प्रत्येति इति कात्रानुपपत्तिः ? सखण्डार्थतापक्षदूषणं तु अनभ्युपगतात्वादेव पराहतं वेदितव्यम् । अत्रैव यत् स्वमतपोषकत्वेन आचार्यवचनोद्धरणं तदपि पूर्वपक्षतयोपात्तत्वेनाश्रद्धेयमेव, तदुत्तरमेवापाकृतत्वात् । एतेन श्रुतिसाक्षिप्रमितयोर्ब्रह्मजीवनिष्ठयोर्गुणपूर्त्यल्पगुणत्वयोर्मिथ्यात्वोक्त्या श्रुतिसाक्षिणोरप्रामाण्यापत्तिरित्यपास्तम्, उक्तोत्तरत्वात् ।

PDF Compressor Free Version

उक्तं हि उपासनाविधिशेषतया सगुणवाक्यानामतत्परत्वेन अनन्यनिष्ठत्वेन स्वार्थपर्यवसितानाम् 'निर्गुणं निष्क्रियम्' इत्यादीनां निर्गुणप्रतिपादकानां वाक्यानामनुरोधेन व्यावहारिक-सत्यगुणादौ तात्पर्यम् । न च निर्गुणवाक्यानामेव सगुणवाक्यानु-रोधेन प्राकृतगुणराहित्यावद्योतन एव तात्पर्यमिति वाच्यम्, स्वार्थपर्यवसायित्वेन तस्य संकोचे मानाभावात् । न च सगुण-वाक्यानामपि स्वार्थपर्यवसायित्वम्, उपासनाविधिशेषत्वस्य त्वयापि स्वीकार्यत्वात् उभयपरत्वे वाक्यभेदस्यापरिहार्यता स्यात् । अर्थापत्ति-रपि पराकृतैव । साक्षिणस्तु स्वप्नजागरणसाधारण्येन प्रामाण्योप-घातो दूरापेतः प्रामाण्यस्यैवासंप्रतिपत्तेः । मुख्यार्थबाधेन लक्षणया स्वीक्रियमाणेऽन्यार्थे इतरप्रमाणाविरोधस्य तदानुकूल्यस्य चानुक्ति-बाधिकेति चेत्, न; उभयोरपि समर्थितत्वात् । विपक्षे तु स्वरसतया भेदपर्यवसन्नवाक्यानां गौणार्थकत्वोक्तिः सुस्पष्टं धृष्टतां सूचयति । यत्तूक्तम्—घटं घटत्वेन पटं पटत्वेनेव चितं चित्त्वेन सर्वे जानन्त्ये-वेति चित् चित् असि इति बोधाङ्गीकारेऽधिगतार्थबोधकत्वेना-प्रामाण्यापत्तिः अपूर्वत्वाभावापत्तिश्च, तदेतदस्थाने विभ्रमः । यथा सोऽयं देवदत्त इत्यस्य वाक्यस्य, व्यक्तिमात्रस्य प्रत्यक्षत्वेनासंशयि-तत्वेऽपि 'अयं स न वा' 'अयं नैव सः' इत्येवं तत्तेदन्तयो-रेककालानवस्थाननियमेन तद्विशिष्टयोः परस्परविरुद्धत्वात् विशिष्टैक्यस्य बाधेऽप्युपलक्षितैक्यस्यैव संशयविपर्ययविषयत्वेन तस्यैव बुभुत्सितत्वात्, तत्रैव तात्पर्यम्, तत्तेदन्तोपस्थितिद्वारका-भेदबोधस्यैव भेदभ्रमविरोधितया नान्यतरपदवैयर्थ्यम्, प्रत्यभिज्ञा-प्रत्यक्षस्येव अभिज्ञाद्वयोपस्थितस्वरूपातिरिक्ताविषयत्वेऽपि नाधिगत-गन्तृत्वेनाप्रामाण्यापत्त्यादिः । अत एव तत्तोपलक्षितप्रतियोगिक-भेदरहित इदन्तोपलक्षितदेवदत्तस्वरूपे तात्पर्यात् । यथाज्ञानमुप-

PDF Compressor Free Version

देशोऽप्युपपद्यते । भेदविरहश्च न कश्चिद्धर्मः, किन्तु स्वरूपमेव ; तदेव चैक्यमित्युच्यत इत्यादि सुस्पष्टमद्वैतसिद्धौ । तथैव तत्त्वमस्यादिवाक्यस्यापि प्रमाण्यं निरपायम् । अपाकृतं चैतत् सम्यक् अद्वैतसिद्धिकारैः "ननु चिन्मात्रस्य चिन्मात्रेण सहाभेदबोधने इष्टापत्तिः अप्रसक्तप्रतिषेधश्च । अभेदश्चेत् स्वरूपमेव तस्य स्वप्रकाशतया नित्यसिद्धत्वेन उपदेशवैयर्थ्यम् । तदस्फुरणे च तद्बुभुत्साद्यनुपपत्तिः तत्त्वम्पदार्थशोधकेनावान्तरवाक्येनैवोपपत्त्या महावाक्यवैफल्यं च, एकपदेनैवोपपत्तेः पदान्तरवैयर्थ्यं च इति चेत्, न ; चैतन्यस्य नित्यसिद्धत्वेऽपि सार्वज्ञ्याद्युपलक्षितस्वरूपज्ञानस्याज्ञानादिनिवर्तकस्य साध्यत्वात् । न चैवं सप्रकारता तत्तादिवत् सार्वज्ञ्यादीनामन्वयबोधाप्रकारत्वात् उपायान्तरेण एतादृशज्ञानासंभवाच्च नोपदेशवैयर्थ्यादयोदोषाः" । 'सोऽयमिति प्रत्यभिज्ञावाक्येऽपि अभेदो न प्रकारः, स्वरूपतया प्राधान्यात् । तत्तेदन्तयोरपि न प्रकारता, भासमानाभेदरूपवैशिष्ट्यप्रतियोगित्वाभावात्' इति विशेषतस्तत एवावगन्तव्यम् इति विस्तरभिया नेह प्रतन्यते । स्वरूपेण शक्यसम्बन्धित्वेन च ज्ञात एव लक्षणायाः सम्भवेन पूर्वं केनापि प्रमाणेनाज्ञाते चिन्मात्रे लक्षणाया असंभव इत्यपि निरालम्बनम्, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' इत्यादिश्रुतिशतबोधितस्वप्रकाशात्मके आध्यासिकसम्बन्धेन सम्बन्धिनि लक्षणानुपपत्तेरभावात् सर्वज्ञत्वादिविशिष्टचैतन्यादेः तत्त्वम्पदशक्यार्थस्य आध्यासिकसम्बधेन संबन्धिनि परमार्थतः संगशून्ये लक्षणाया निष्प्रत्यूहत्वात् । दृग्दृश्ययोः सम्बन्धान्तरानुपपत्त्या आध्यासिकसम्बन्धस्य साधितत्वात् शुक्तिरूप्ययोरिवान्यत्र । निर्धर्मितावच्छेदकशाब्दबोधस्य केनाप्यनङ्गीकृतत्वोक्तिस्तु शक्तिवादस्थाकाशादिपदीयवृत्तान्तानवबोधविजृम्भितभ्रान्तिमूलिकैव । उक्तं हि तत्र

PDF Compressor Free Version

"शब्दाश्रयत्वस्याकाशपदवाच्यत्वमनङ्गीकर्तृभिः प्राचीनैराकाशपदादाकाशांशे तदुपस्थाप्याप्रकारकशाब्दबुद्धेरेवोपगमात्। तदुक्तम् 'अस्तु वा पदादपि निर्विकल्पकमिति'। निर्विकल्पकत्वं च तदंशे तत्पदोपस्थाप्याप्रकारकत्वम्। न तु तदंशे सामान्यतो निष्प्रकारकत्वम्।... वस्तुतस्तु तत्र निर्विकल्पकपदं तत्पदोपस्थाप्यार्थाविशेषितधर्मिविषयकशाब्दानुभवजनकनिर्विकल्पकस्मरणपरम्। अत एव तत्र निर्विकल्पकरूपस्य स्मरणस्यानुपपत्तिः अनुभवस्य स्वसमानप्रकारकस्मृतिजनकत्वात्, इत्याशङ्क्य प्रकारान्तरेण तादृशस्मरणमुपपादितं मिश्रैः" इति ॥

॥ अथासाधारणतयाभिमतदूषणानामुद्धरणम् ॥

ननु 'स आत्मा तत्त्वमसि' इत्यस्य वाक्यस्य 'अतत्त्वमसि' इति पदच्छेदेन त्वम् अतत् तद्भिन्नः ब्रह्माभिन्नः असि इति जीवब्रह्मणोर्भेदबोधकताया अपि संभवात् सावकाशमिदं वाक्यं न जीवब्रह्मणोरभेदे प्रमाणं भवितुमर्हति इति। तदेतद्बालभाषितम्; तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदीयवचनविरोधात् भेदे तात्पर्यहानाच्च तादृशपदच्छेदस्य केनाप्यनङ्गीकृतत्वाच्च। मृदादिदृष्टान्तैः घटशरावादीनां मृन्मात्रत्वमिव प्रपञ्चस्य 'ऐतदात्म्यमिदं सर्वम्' इति पूर्वोक्तवचनेन सन्मात्रत्वमेवोक्तमिति कुतस्त्वंपदार्थस्य भिन्नत्वसंभवः। अपि च भवन्मतेऽभेदस्याप्रसक्तत्वात् कुतो भिन्नत्वोक्तेः सार्थक्यम्। यदपि एष चासौ आत्मा च एतदात्मा तस्येदमैतदात्म्यम् इति व्युत्पत्त्या एतदीयं वस्तु त्वमसि इत्येवार्थ इति तदसत्, तस्येदमित्यर्थे ष्यञोऽविधानात्। एतदात्मा यस्य तदैतदात्म्यम् इत्यस्मिन्नर्थे सौख्यमित्यादिवत् स्वार्थे प्रत्ययेनापि तदुपपत्तेः। यत्तु—वस्तुतः 'सन्मूलाः सोम्य सर्वाः प्रजाः सदायतनाः

PDF Compressor Free Version

सत्प्रतिष्ठाः' इति पूर्ववाक्ये प्रजाशब्दितानां जीवानां परब्रह्मजन्यत्व-तदाश्रयत्वादिकथनद्वारा भेदस्यैवोक्तत्वेन दृष्टान्तवाक्यानां नवानामपि भेदपरत्वेन दार्ष्टान्तिकतत्त्वमसीति वाक्ये श्वेतकेतुब्रह्मभेदबोधकताया एव न्याय्यत्वात् इति, तदप्यपास्तम् ; भेदपक्षे एकविज्ञानेन सर्व-विज्ञानप्रतिज्ञाया मृदादिदृष्टान्तस्य चानुपपत्तेः। सदाश्रयत्वसत्प्रतिष्ठि-तत्वाद्युक्तिस्तु 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' 'तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' 'अपागादग्नेरग्नित्वम्' इत्यादिवचनैः शरावादीनां मृदेकाश्रयत्व-मृत्प्रतिष्ठितत्वादिवत्सूपपन्ना प्रजानाम्। दृष्टान्तवाक्यानां भेदपरत्वस्य निरसिष्यमाणत्वाच्च । सन्मूला इति वाक्यमनुसृत्य 'सुपां सुलुक् पूर्वसवर्णात्' इति सूत्रोक्तदिशा सप्तविभक्त्यन्यतमविभक्तिमत्त्वेन 'त्वं तत् तस्मात् असि' 'तत् तस्मिन् असि' इत्याद्यर्थानां मुख्य-वृत्त्या संभवेन मुख्यवृत्तिं परित्यज्य लक्षणाश्रयणेन इतरप्रमाणबाधि-तार्थकथनस्यायोगोक्तिरपि पराहता ; तात्पर्यानुपपत्तेः प्रमाणान्तर-बाधाभावस्य निवेदयिष्यमाणत्वाच्च । जहदजहल्लक्षणया मुख्यपरत्वे संभवति न तदाश्रयत्वाद्यर्थकल्पनमुचितम्, सन्मूलाः प्रजा इत्यादि-नापि न जीवानां तदाश्रयत्वसिद्धिः, प्रजाशब्देन प्रजायमानानामेव ग्रहणेन नित्यानां जीवानां ग्रहणानुपपत्तेः 'अजो ह्येकः' 'नित्यो नित्यानाम्' इति तन्नित्यत्वस्य त्वयापि अभ्युपगन्तव्यत्वात्। अपि च अत्यल्पमिदमुच्यते—पदद्वयलक्षणापेक्षया एकपदलक्षणया 'सर्वस्य वशी सर्वस्येशानो भूताधिपतिर्भूतपालः यस्मिन् सर्वं प्रतिष्ठितम्' इत्यादिप्रमाणानुसारेण तत् तदधीनस्त्वमसि, तत् तज्जन्यः, तस्मिन् प्रतिष्ठितः इत्याद्यर्थपरत्वेनाभेदसाधकत्वाभावः तत्त्वमस्यादि-वाक्यानाम् ; 'वसन्तादिभ्यष्ठक्' इत्यत्र वसन्तसहचरितेऽप्य-ध्ययने वसन्तपदप्रयुक्तिवत् 'द्वा सुपर्णा सयुजा' इत्यादिश्रुतिस्वार-

PDF Compressor Free Version

स्यात् ब्रह्मसहचरिते जीवे ब्रह्मत्वोक्तिः ; समर्थपदाश्रितत्वेन पदविधौ समर्थपदप्रयोगस्य 'समर्थः पदविधिः' इत्यत्र महाभाष्यकृतोररीकृतत्वात् तदाश्रितत्वेन तत्पदार्थतोक्तिः 'ब्राह्मणोऽस्य मुखमासीत्' 'इग्यणः सम्प्रसारणम्' इत्यादौ मुखसम्प्रसारणाभ्यां जातयोर्वर्णब्राह्मणयोर्मुखत्वसम्प्रसारणत्ववत् तज्जे त्वम्पदार्थे तत्पदार्थत्वोक्तिः ; 'आदित्यो यूपः' इतिवत् सादृश्यात्, 'तद्गुणसारत्वात्तु तद्व्यपदेशः' इत्यत्र परमात्मगुणसारत्वाच्च परमात्मत्वव्यपदेश उपपद्यत इत्युक्तत्वाच्च तत्पदार्थत्वोक्तिः—इत्यादि । एषां प्रकाराणामप्युद्भाव्य अद्वैतसिद्धिकारादिभिर्निराकृतत्वात् किमिति तेषामेव मृतस्येवोज्जीवनमभिलष्यते, लक्षणैक्यानुरोधेन तात्पर्यबाधस्य कर्तुमशक्यत्वात् । तदुक्तं चिन्तामणिकारैः 'तात्पर्याद्धि वृत्तिः न तु वृत्तेस्तात्पर्यम्' इति । न हि जहदजहल्लक्षणया मुख्यपरत्वे संभवति तत्सहचरिताद्यर्थकल्पनमुचितम् । 'द्वा सुपर्णा' इत्यत्र न जीवब्रह्मणोः सहचरितत्वोक्तिः, पैङ्गिरहस्ये सत्त्वक्षेत्रज्ञाविति व्याख्यानात् । ननु तत्रापि क्षेत्रज्ञपदेन परमात्मा अभिधीयते, सत्त्वपदेन जीव इति चेत्, न ; सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणशारीरपरतया प्रसिद्धत्वात् । 'तदेतत् सत्त्वं येन स्वप्नं पश्यति' 'अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञः' इति श्रुत्यैव च व्याख्यातत्वात् । यदि शरीरे भवः शारीर इति व्युत्पत्त्या सर्वगतत्वेन शरीरान्तःपाती पर एव शारीर इति व्यपदिश्यते तदा व्यापकस्य वियतोऽपि शरीरस्थत्वेन शारीरत्वापत्तिः स्यात् । अतश्च असाधारणसम्बन्धेनैव शारीरत्वमिति वक्तव्यम् । तच्चाभिमानितयैव युज्यते, परस्मिंस्तु दुःखित्वादिप्रसक्त्या तदनुपपत्त्या जीव एव शारीरः । किञ्च सर्वज्ञस्य क्षेत्रज्ञत्वोक्त्या भोक्तुरज्ञेयत्वेनासर्वज्ञतैव स्यात् । न च सर्वगतस्य दहराकाशस्थत्ववत् उपासनार्थं तदुक्तिरिति वाच्यम्, फलविशेषानुपपत्तेः । भोग्यभोक्तृसकल-

PDF Compressor Free Version

विज्ञत्वेनोपासनस्य ततोऽपि महत्त्वमिति क्षेत्रज्ञत्वे विशेषो नोपपद्यते । दृष्टान्ते तु आन्तरत्वेनापरोक्षत्वाय तदुपदेश इति वैषम्यम् । एतेन—'क्षेत्रज्ञं चापि मा विद्धि सर्वक्षेत्रेषु भारत ।' इत्यत्रापि क्षेत्रज्ञः पर एवाभिप्रेतः । तथा च नात्र जीवेशयोरैक्यं विवक्षितम्, किन्तु 'रामं सीतापतिं विद्धि' इतिवत् परस्यैव स्वाभेदो बोध्यत इति न शाब्दबोधानुपपत्तिरपि—इत्यपि परास्तम् । क्षेत्रज्ञास्मदर्थयोरत्यन्ताभेदे शाब्दबोधानुपपत्तेः उद्देश्यविधेयभावस्य ज्ञातत्वाज्ञातत्वाभ्यां किञ्चिद्वैलक्षण्यनियतत्वात् । 'रामं सीतापतिं विद्धि' इत्यत्रापि रामप्रातिपदिकार्थापेक्षया सीतापतित्वस्य वैलक्षण्यमभ्याहृतम् । अप्रसिद्धार्थबोधकत्वे प्रसिद्धार्थकपदस्यैवोपयोगो भवति प्रसिद्धार्थस्याहमर्थस्य क्षेत्रज्ञत्वोक्तौ प्रयोजनाभावाच्च । सिद्धान्ते तु जीवस्य परत्वोक्त्या निखिलानर्थनिवृत्तिः । अत एव श्रीमच्चिन्नस्वामिशास्त्रिभिः भारतस्थः श्लोकः समुद्धृतः—

> आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः ।
> तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः ।
>
> (म. भा. शा. १२७-२९)

इत्येकस्यैव जीवत्वं परत्वं च सोपाधिनिरुपाधिकत्वाभ्यां बोधयति । अविभक्तं च भूतेषु विभक्तमिव च स्थितम् । एकमेव तत्त्वमविभिन्नमपि नानोपाधिभेदेन भिन्नमिवाभाति । त्वन्मते तु तत्स्थत्वेन परोक्षत्वात् विभक्तवत् प्रतीयमानत्वं तस्य न कथमप्युपपद्यते ॥

नित्यत्वेन तज्ज्ञत्वानुपपत्त्यापि तदनुपपत्तेरुक्तत्वात् । 'तद्गुणसारत्वात्' इत्यत्रापि न त्वदभिप्रेतोऽर्थः । आत्मना स्वसम्बन्धिन्या बुद्धेरेवोपस्थापितत्वात् तदा परामर्शः । न हि शुद्धबुद्धमुक्तस्वभावस्यात्मनस्तत्त्वं संसारिभिरनुभूयते । अपि तु योऽयं मिथ्याज्ञानद्वेषा-

PDF Compressor Free Version

प्रत्यात्ममनुभवगोचरः । न च ब्रह्मस्वभावस्य
ह्यनुषक्तः, स एव इच्छाद्वेषाद्यनुषङ्गसंभवः, बुद्धि-
जीवात्मनः कूटस्थनित्यस्य स्वत तद्धर्मत्वाध्यासः उदशरावाद्यध्यस्तस्यैव
गुणानां तेषां तदभेदाध्यासेन तद्धर्मत्वाध्यास इत्ययमर्थः स्पष्टो भामत्याम्।
प्रतिबिम्बस्य तोयकम्पे कम्पवत्त्वाध्यास इत्ययमर्थः स्पष्टो भामत्याम्।
तथा सति कुतस्त्वम्पदार्थस्य तद्गुणसारत्वात् तद्व्यपदेशभाक्त्वम्।
एवं शाखासदेशे चन्द्रे शाखेतिवद्वा, 'ब्राह्मणो वै सर्वा देवताः'
'यजमानः प्रस्तरः' इतिवद्वा जीवसदेशादौ त्वमिति व्यपदेश इत्यपि
निरस्तं वेदितव्यम् । यच्च 'शब्दोनित्यः' इत्यत्र घटदृष्टान्तानुरोधेन
अनित्य इति च्छेदवत् शकुनिसूत्रादिदृष्टान्तानुरोधेन अतत्त्वमसि
इति पदच्छेदोऽभिमत इति तदपि—आशामोदकायितम् । स यथा
'शकुनिः सूत्रेण प्रबद्धः' 'लवणमेतदुदकम्' 'पुरुषं सोम्य गान्धारेभ्यः'
'अपहार्षीत् स्तेयमकार्षीत्' इत्यादिभिः शकुनिसूत्रादौ दृष्टान्ते
विद्यमानोऽपि भेदो नातदिति च्छेदेन जीवब्रह्मणोस्तात्त्विकभेद-
साधकः । नित्यत्वे घटदृष्टान्तानुपपत्तिवदनुपपत्तेरभावात् । उपपद्यते
च तात्त्विकभेदं विनाप्यन्यथा दृष्टान्तः । तथैव चोच्यतेऽद्वैतसिद्धिकारैः
—ज्वरादिरोगग्रस्तस्य तन्निर्मोके स्वास्थ्यविश्रान्तिवज्जाग्रत्स्वप्नयोः
करणव्यापारजनितश्रमापनुत्तये जीवस्य देवतात्मस्वरूपावस्थानम्
इत्यस्मिन्नर्थे शकुनिसूत्रदृष्टान्त इत्यन्यथैवोपपत्तेरिति । अतः 'स्वमपीतो
भवति' इत्यत्रत्यं स्वमिति पदमप्याञ्जस्येनोपपद्यते । स्वरूपे मुख्यस्य
स्वशब्दस्य आत्मीयत्वाद्यर्थपरत्वकल्पनमप्यनुचितम्, गौणिलक्षणयो-
रन्यतरापत्तेः । अपीतेरपि लब्धस्वरूपप्राप्तिरित्यर्थस्यैवोपसर्गाद्यर्थ-
स्वारस्येनोचितत्वान्नान्यार्थपरत्वसंभवः । अपि च 'एकमेवाद्वितीयम्'
इत्यादिसिद्धस्यापूर्वस्य सजातीयादिभेदत्रयविधुरस्य ब्रह्मणो विज्ञानेन
अभिन्ननिमित्तोपादानाभिन्नस्य प्रपञ्चस्य विज्ञानं संभवत्याञ्जस्येन, 'यथा
सोम्य एकेन मृत्पिण्डेन' इत्यादिदृष्टान्तस्वारस्यात् । न हि निमित्त-

PDF Compressor Free Version

त्वमात्रेण तत् संभवति। कुलालविज्ञानेऽपि घटादीनामविज्ञानात्। न च त्वन्मतेऽपि सर्वस्य मिथ्यात्वेन कथं ब्रह्मज्ञतया सर्वज्ञत्वमिति वाच्यम्, श्रुतिं प्रत्येव तादृशस्योपालम्भस्य वक्तव्यत्वात्। श्रुतिरेव हि मृत्पिण्डविज्ञानेन शरावादीनां तद्विकाराणां विज्ञानं वदति। विकाराणां च नाममात्रत्वोक्त्या प्रकृतीनामेव 'मृत्तिकेत्येव सत्यम्' इति सत्यत्वं सिध्यति। 'भावे चोपलब्धेः' इति सूत्राच्च कारणस्य भावे कार्यस्य भावात् कारणस्योपलब्धौ कार्यस्योपलब्धेः कारणातिरेकेण विकाराणां निरूपयितुमशक्यत्वात्। अयं घटः एतत्कपालनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वात्, इतरांशिवत्, इत्यनुमानाच्च। न च अयं घटः एतत्कपालनिष्ठात्यन्ताभावाप्रतियोगी, एतत्कपालसमवेतत्वात्, यन्नैवं तन्नैवम्, यथा पटान्तरमिति प्रत्यनुमानसंभवः, एतन्निष्ठप्रागभावप्रतियोगित्वस्योपाधित्वात्। न चैवं जलानयनाद्यर्थक्रियाकारित्वेन विकाराणां प्रकृतिवैलक्षण्येन कुतो मिथ्यात्वम् इति वाच्यम्, मिथ्यात्ववैलक्षण्ययोरविरोधात्। कूटकार्षापणादिनापि अर्थक्रियाकारित्वलक्षणव्यवहारो दृश्यते। अत एव सुवर्णं कुण्डलमिति सामानाधिकरण्यव्यपदेशात् अभेदप्रतीतेः सुवर्णे विज्ञातेऽपि कुण्डलविषयकजिज्ञासादर्शनेन भेदप्रतीतेश्च सत्ताभेदेन भेदाभेदयोः सामञ्जस्यं समर्थ्यते आचार्यैः। ततश्च प्रज्ञायास्तत्त्वपक्षपातित्वेन समञ्जसं प्रकृतिविज्ञानेन विकृतिवेदनम्, सर्वपदप्रोक्ते प्रपञ्चे सत्यत्वसौष्ठवादिबुद्धिसंजातसमौत्सुक्यतया तद्विजिज्ञासया प्रेप्सया च व्यग्रस्य तदीयदृष्टिसर्वोपप्लवरहितप्रज्ञानघनविज्ञाने समौत्सुक्यजननाय तद्विज्ञानवेद्यत्वोक्तिः। विज्ञाते च विजिज्ञासितव्यस्य सर्वस्य तस्मिन् नान्यदतः प्रज्ञानानन्दघनादविक्रियात् पूर्णात् किमप्यस्तीति जिज्ञासा स्वयमेव शाम्यति बाह्यविषयेत्येवंपरत्वेन श्रुतेर्न किमप्य-

PDF Compressor Free Version

समञ्जसम् । एवं सृष्टिप्रतिपादकवाक्यानामपि स्वार्थपर्यवसायित्वे प्रयोजनाभावात् सार्थस्यैव स्वाध्यायस्याध्ययनविधिगृहीतत्वेन 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायेन प्रयाजादिवाक्यानां दर्शपूर्णमासादिवाक्येनेव शोकमोहाद्युपलक्षितसंसारातितरणफलका-परिच्छिन्नसदात्मावबोधकेन एकवाक्यतापन्नानामद्वैतात्मबोधपरत्वे-नोपयोगो वक्तव्यः, 'यत्प्रयन्त्यभिसंविशन्ति' इत्याद्युक्तलयाधिकरण-त्वस्य कर्तृत्वसर्वभावत्वयोश्च तटस्थे निमित्तमात्रेऽनुपपत्त्या उक्त-विधया तादृग्बोध एव तात्पर्यात् । ततश्च कुतस्त्यम् 'उपसंहारभूतस्यैव भेदपरत्वेन अतत् इत्यादिच्छेदसम्भवः' इति । ननु 'एकमेवाद्वि-तीयम्' इत्यादिश्रुतेरुक्तार्थपरत्वमेवासिद्धम्, 'सदेव सोम्येदमग्र आसीदेकमेव' इत्यादौ—'अग्रे' इत्यादिपदैः कालेक्षणादीनाम् इदम्पदवाच्यस्य च पुरोवर्तिनः सदभेदेनोक्तत्वात् । तथा च कथमद्वितीयपदेन तन्निषेधे न व्याघातः । न च इदं नामरूप-क्रियात्मकं विश्वम् अग्रे सृष्टेः प्राक् सदेवासीत् सन्मात्रव्यतिरिक्तं नान्यत् किमप्यासीदित्यर्थ इति वाच्यम्, 'अजामेकाम्' 'अजो ह्येकः' 'नित्यो नित्यानाम्' 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभा-वपि' इत्यादिश्रुतिस्मृतिसिद्धाजत्वनित्यत्वबहुत्वानुरोधेन तदनुपपत्तेः कार्यत्वे नित्यत्वादिविरोधः, नित्यत्वेऽद्वितीयत्वविरोधः, तस्मादे-कमेवाद्वितीयमित्यत्र 'आसिद्वितीयोऽनुससार पाण्डवः' इति प्रयोगात् असिद्वितीयः, असिसहाय इति भाष्योक्तेः, अद्वितीयम् असहायम्, 'एके मुख्यान्यकेवलाः' इति कोशादेकमिति जीवादिभ्योऽन्यत् प्रधानं वा इत्याद्यर्थ एव युज्यते, 'न तत्समश्चा-भ्यधिकः कुतोऽन्यः' इति श्रुतेश्चेति । अत्र ब्रूमः । कालेक्षणादीना-मपारमार्थिकत्वेन अजत्वनित्यत्वबहुत्वादीनामपि तादृशत्वेन पार-मार्थिकसजातीयादिभेदशून्यमित्यर्थे विरोधाभावात्; समसत्ताक-

PDF Compressor Free Version

योरेव विरोधस्य समर्थितत्वाच्च । घटादिसिसृक्षुणा कुलालेन पूर्वाह्णे प्रसारितं मृत्पिण्डमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावादिकं कार्यमुपलभ्य मृदेवेदं घटशरावादिकं केवलं पूर्वाह्णे आसीदिति मन्यते यथा एवं श्लिष्यते 'सदेवेदमग्र आसीत्' इति । एकमेवेति स्वकार्यपतितमन्यन्नास्तीत्यर्थः । अद्वितीयमिति नास्य द्वितीयं वस्त्वन्तरं सहकारिभूतं विद्यत इत्यद्वितीयम् । एतेन न द्वितीयमद्वितीयमिति तत्पुरुषाभ्युपगमे प्रथमं तृतीयं वा इत्येवार्थोऽस्तु इति निरस्तम्, तयोरपि किञ्चिदपेक्ष्य द्वितीयत्वात् । न चाद्वितीयमिति पदेनैव भेदत्रयनिषेधसंभवे एकावधारणपदयोर्वैयर्थ्यापत्तिरिति वाच्यम्, विजातीयं किञ्चिदपेक्ष्य द्वितीयत्वावच्छिन्ननिषेधस्याद्वितीयपदार्थत्वात्; गोपदे बलीवर्दसान्निधानात् संकोचस्येव सजातीयस्वगतभेदनिषेधकावधारणशब्दसान्निधानात् अद्वितीयपदेऽपि संकोचस्य युक्तत्वात् । तथा च नानात्वरूपो जीवेश्वरभेदः स्वगतभेदः द्रव्यत्वादिना सजातीयेभ्यो भेदः सजातीयभेदः विजातीयभेदो गुणादिभेदः । अथवा जडभेदो विजातीयभेदः चैतन्यभेदः सजातीयभेदः ज्ञानानन्दादिभेदः स्वगतभेदः । यदि तु गोर्द्वितीयोऽन्वेष्टव्यः इत्युक्ते गौरेव द्वितीयोऽन्विष्यते नाश्वो न वा गर्दभ इति महाभाष्यानुसारात् समानजातीयद्वितीयपरत्वं द्वितीयशब्दस्य, तदा द्वितीयशब्दस्य सजातीयद्वितीयनिषेधपरत्वम् । अथवा द्वितीयपदेनैव भेदत्रयनिषेधः एकावधारणपदे तु संकोचशङ्कापरिहाराय; अपूर्वत्वं च एवमत्रोपपद्यत इत्युक्तमेव । तदुक्तं भामतीकृतापि—'अभ्यासे हि भूयस्त्वमर्थस्य भवति अहो रमणीया अहो रमणीया इति न न्यूनत्वं प्रागेवोपचरितत्वम्' इति; एवम् 'समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमेवाद्वितीयमात्मतत्त्वं श्रुतिस्मृतिपुराणेषु

PDF Compressor Free Version

गीयते । न चैतानि उपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणे-हगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्' इति । यत्तु अद्वैतविमर्शमालायास्तृतीये पुष्पे—जीवब्रह्मैक्यं प्रमाणावेद्यम्, अतो न वैदिकम्, त्वन्मते महावाक्यस्यापि चिदित्येव बोधजनकत्वेन नैक्यबोधकत्वम्, ऐक्यस्य तात्पर्यविषयत्वेऽपि न मुख्यतात्पर्यविषयत्वम्, तादृशतात्पर्यविषयत्वेऽपि न वेदबोध्यत्वम्, वाच्ययोर्विरुद्धत्वाच्च नैक्यसिद्धिः । वेदान्तपरिभाषाभिमतया अभिधावृत्त्यापि नैक्यबोधः, आचार्याणां लक्षणाभ्युपगमविरोधात् 'ब्रह्मण्यवाच्ये यो विद्वान् वाच्यतामधिगच्छति । स निस्त्रपः' इत्याद्यनुसृत्य सत्यादीनामपि वाचकत्वमनभ्युपगच्छताम् । प्रौढिवादोक्तिस्तु दूरनिरस्ता । शक्तिग्रहाभावाच्च न वाक्यबोध्यत्वम् इत्यादि प्रश्नप्रतिवचनरूपेण बहु जल्पितम्; तदेतद्धौतविचारायितत्वेनोपहासास्पदम् । यथोक्तं न्यायाचार्यैः—केनचिद्धौतेन राजद्वारे द्विरदमालोक्य विकल्पितम् 'किमयमन्धकारो मूलकमत्ति, आहोस्वित् जलवाहो बलाकान् वर्षति गर्जति च, यद्वा बान्धवोऽयम् 'राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः' इति परमाचार्यवचनात् । अथवा योऽयं भूमौ दृश्यते तस्य च्छाया—इति । दूषितं च तत्रैव 'नाद्यः, तस्य शूर्पयुगलप्रस्फोटनाभावात् । न द्वितीयः, तस्य स्तम्भचतुष्टयाभावात् । न तृतीयः, तस्य लगुडभ्रामणाभावात् । न चतुर्थः, तस्य नरशिरःशतोद्गिरणाभावात्' इति । ततो न किञ्चिदेतत् । किमेतावता द्विरदरूपं निवर्तताम् इति । प्रमाणावेद्यत्वमपि वेदबोधितत्वेनाचोद्यम् 'यन्मनसा न मनुते येनाहुर्मनो मतम्' 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' 'अव्यक्तोऽयमचिन्त्योऽयम्' 'अप्रमेयम्' 'नैतन्मनो विशति' इत्यादिश्रुतिस्मृतिभ्यः । मनोव्यापारागोचरत्वेन तदधीनव्यापारनिखिलप्रमाणागोचरत्वस्य सुतरां सूपपन्नत्वाच्च ।

PDF Compressor Free Version

उपपद्यते चैवमेव मनआदिकरणानां भौतिकत्वेन घटादिवत् स्वपरान्यतरप्रकाशकत्वानुपपत्तौ अनुष्णस्पर्शगुणकस्यायःपिण्डस्य उष्णस्पर्शोदिमदग्नितादात्म्यापत्त्या दग्धृत्ववत् चिदात्मज्योतिषा संसृष्टानामेव तन्महिम्ना स्वविषयावभासकत्वमिति मन्तव्यम् । ततश्च यथा वह्नितादात्म्यापत्त्या लब्धदग्धृत्वगुणेनायःपिण्डेन दाह्यमेव काष्ठादि दह्यते, न तु स्वसामर्थ्यनिमित्तभूतो वह्निरपि ; तत्कस्य हेतोः ? स्वप्रत्यक्त्वेनाविषयत्वात् । एवं नित्यनिरतिशयचैतन्यात्मकज्योतिषा लब्धानित्यसातिशयावभासकत्वगुणैः करणैः स्वभास्यमेवावभास्यते, न तु स्वभासकमपि ; तत्कस्य हेतोः ? स्वप्रत्यगात्मत्वात् अभास्यत्वात् । न च तर्हि 'दृश्यते त्वग्र्यया बुद्ध्या' 'मनसैवोपलब्धव्यम्' इति कथं बुद्धिबोध्यत्वोक्तिः ? स्वप्रकाशत्वेन फलव्याप्तेरभावेऽपि वृत्तिव्याप्यत्वस्य वक्ष्यमाणविधया सूपपन्नत्वात् । एवम् 'तं त्वौपनिषदं पुरुषं पृच्छामि' 'वेदैश्च सर्वैरहमेव वेद्यः' 'नावेदविन्मनुते' इत्यादिवाक्यानामपि अनिर्वाच्यगुणाद्याश्रयतया लोकाध्यारोपापोहार्थत्वेन च तत्तदाकारवृत्तिजननेनैव प्रामाण्यम्, न त्वज्ञातज्ञापकत्वेन ; उक्तवचनेन ताल्वाद्यष्टस्थानानुषक्तस्य आग्नेयस्य शब्दाभिव्यञ्जकस्य वागिन्द्रियस्य तदभिव्यङ्ग्यस्फोटात्मकस्य शब्दस्य वा सर्वान्तरतमे प्रत्यगात्मन्यविषये साक्षात् प्रवृत्तेरभाव इति सोपपत्तिकार्थेन 'यद्वाचानभ्युदितं येन वागभ्युद्यते' इति श्रुतिवचनेन च विरोधात् । प्रदीपस्य प्रदीपान्तरानपेक्षत्ववत् चिदात्मनः चिदन्तरानपेक्षत्वेन वृत्त्यादिव्यवधानराहित्येन स्वतो नित्यनिरस्तानवबोधादिस्वरूपतया च स्वप्रकाशत्वम् । स्वव्यतिरिक्तप्रमेयप्रमित्यर्थमेव प्रमातृप्रवृत्तिदर्शनेन कर्तृत्वकर्मत्वानुपपत्त्या च न स्वस्मिन्नेव स्वस्य प्रमातृत्वम् । तथा प्रमात्रन्तराभ्युपगमेऽचिकित्स्यात्रिदोषदुष्टा अनवस्था । तथा

PDF Compressor Free Version

च प्रामातुरेव प्रमातृप्रमाणाद्यनपेक्षत्वे किमु वक्तव्यं प्रमात्राद्यवभासकस्य चिदात्मज्योतिषः स्वप्रकाशत्वे इत्याद्यभिप्रायकाणाम् 'यत्साक्षादपरोक्षाद्ब्रह्म' 'अन्यदेव तद्विदितादथो अविदितादधि' 'यस्यामतं तस्य मतम्' इत्यादिश्रुतिस्मृतिवचनशतविरोधाच्च। अवाच्यपदेन वाच्यत्वे वाच्यत्वापत्तिः, लक्ष्यत्वे मुख्यार्थाभावेन लक्षणानापत्तिः, लक्षणावृत्तिव्याप्त्योरप्युक्तवचनैर्निषेध्यत्वापत्तिः, अद्भुतत्वोक्त्यापि श्रुतिवचनोपपत्तेः, एवं लक्ष्यपदेन लक्ष्यत्वेन तीरस्यागङ्गात्ववत् ब्रह्मणोऽलक्ष्यत्वापत्तिः इत्याद्यपि नोहनीयम्, वाच्यार्थाभावेऽपि नञ्समभिव्याहृतवाच्यपदेन वाच्यत्वात्यन्ताभावबोधनेन स्वरूपे पर्यवसानात्; संभवति मुख्यार्थत्वेऽद्भुतत्वाद्यर्थकल्पनानुपपत्तेश्च। लक्ष्यत्वव्यवहारस्य वाच्यत्वाभावनिबन्धनतया सर्वथा निर्धर्मकेऽलक्ष्यत्वस्येष्टत्वात्। न च सत्यादिपदानां लक्षकत्वे सिद्धे निमित्ताभावः, तस्मिंश्च लक्षकत्वमित्यन्योन्याश्रय इति वाच्यम्, 'नेति नेति' इति निमित्ताभावस्य सिद्धत्वात्। श्रुतिबोध्यशाब्दत्वमानसत्वोपपत्तये शक्तिफलव्याप्त्योरेव निराकरणम्; न तु लक्षणावृत्तिव्याप्त्योर्निराकरणम्। न च वाच्यसंबन्धित्वेन ज्ञातस्यैव लक्ष्यत्वादवाच्ये लक्षणानुपपत्तिरिति वाच्यम्, स्वप्रकाशतयोपस्थित एव तथा संभवेन तत्सम्बन्धित्वस्यातन्त्रत्वात्। न च शब्दवैयर्थ्यम्, आवरणाभिभावकवृत्तावुपयोगात्। 'विषं भुङ्क्ष्व' इत्यादिना पदवाक्यसम्बन्धशून्येऽपि शत्रुगृहभोजनवारणे तात्पर्यादेव बोधसंभवो दृश्यते, जातिगुणक्रियासम्बन्धानामन्यतमहेतोरभावात् परे वाच्यत्वाभावे न काप्युपपत्तिः; एतेन प्रमाणागम्यत्वेन पदार्थबोधानुपपत्तिरपि परास्ता। स्वप्रकाशे स्फूर्त्यर्थं प्रमाणानपेक्षत्वेन प्रमाणागम्यत्वस्येष्टत्वात् अज्ञाननिवृत्त्यर्थम् उपनिषदां विशिष्टे शक्तिवृत्त्या शुद्धे लक्षणावृत्त्या विधिमुखेन, अशेष-

PDF Compressor Free Version

विशेषापोहार्थत्वेन निषेधमुखेन च प्रामाण्यस्याभ्युपगमात् । न च संसर्गागोचरत्वे प्रमाणवाक्यत्वानुपपत्तिः, असंदिग्धाविपर्यस्त-बोधकतया निर्विकल्पकत्वेऽपि प्रामाण्यस्याकाङ्क्षादिमत्तया वाक्य-त्वस्य चोपपत्तेः । वृत्तिमन्तरेणापि वेदान्तवाक्यानां सुप्तोत्थापक-वाक्यस्येव वार्त्तिककारैः—

'अगृहीत्वैव संबन्धमभिधानाभिधेययोः ।
हित्वा निद्रां प्रबुध्यन्ते सुषुप्तौ बोधिताः परैः ॥'

इत्यादिना ग्रन्थेन निर्विशेषे प्रामाण्यमुपपादितम् । लक्षणा-पक्षेऽपि तात्पर्यविषय एव लक्षणा, न तु शक्यसम्बन्धिमात्रे, शक्यसम्बन्धस्यानेकत्र संभवात् । एतेन 'गङ्गायां काशी' इत्यादिनिदर्शनप्रणयनेन यदुक्तं गङ्गायाः पूर्वतटे पश्चिमतटे वा इत्यत्र विनिगमनाभावात् पूर्वस्मिन्नेव तटे काशीति न सिध्यति । तद्वदभेदोऽपि न सिध्यतीति तदपि निदर्शनाभासत्वेनापहस्तितं वेदितव्यम् । तथा हि—एकतरपक्षे तात्पर्यनिर्णये तत्रैव लक्षणा, तदनिर्णये दृष्टान्तानुपपत्तिः, तात्पर्यविषये लक्षणा इति तु सिद्धान्तः । अन्यथा लक्षणाया दत्तजलाञ्जलिता प्रसज्येत । अभेद तात्पर्य-निर्णायकानि वचनशतानि भेदबाधकानि च वचनानि भेद-तात्पर्यविघटकानि सन्त्येव । दृष्टान्ते तु तद्विपरीतमिति महद्वैषम्यम् । एवं भेदपक्षे श्रुतिसाक्षित्वप्रदर्शनमपि श्रुत्यर्था-नवबोधनिबन्धनम्, साक्षाद्भेदप्रतिपादकश्रुतेरभावात् । 'द्वा सुपर्णा' 'नित्यो नित्यानाम्' इत्यादीनां भेदो न प्रमेयः, अपदार्थत्वादवाक्यार्थत्वाच्च । द्वित्वस्य भेदनान्तरीयकत्वेन द्वित्व-श्रुत्यर्थापत्त्या भेदव्यपदेशाच्च भेदस्यापि श्रौतत्वमिति चेत्, न; 'द्वौ चन्द्रमसौ' इत्यत्रेव कल्पितभेदमादायान्यथाप्युपपत्तेरुक्तत्वात् । 'द्वा सुपर्णा' इत्यत्रत्यपैङ्गिरहस्यव्याख्यानमपि न विस्मर्तव्यम् । यदपि

PDF Compressor Free Version

वेदैकदेशस्य कर्मकाण्डस्य प्रामाण्याय द्वैतमास्थीयते, तन्न; यथाप्राप्तोपदेशार्थत्वात्। जातमात्रप्राणिबुद्धिगम्यत्वेन नोपदेशार्हं द्वैतम्। न हि द्वैतमद्वैतं वा जातमात्रमेव ज्ञापयित्वा पश्चात् कर्म वा ब्रह्मविद्यां वोपदिशति शास्त्रम्। न च द्वैतस्यानृतत्वबुद्धिः कस्यचित् प्रथममेव स्यात् येन द्वैतस्य सत्यत्वमुपदिश्य पश्चादात्मनः प्रामाण्यं प्रतिपादयेच्छास्त्रम् इत्यादि प्रपञ्चितं शास्त्रकारैः। इहाप्युक्तमभिधास्यते च। घटं घटत्वेनेव चितं चित्त्वेन बोधयच्छास्त्रं कथं प्रमाणं स्यात्? अज्ञातज्ञापकत्वाभावात्; इत्यप्यनादेयमेव, दत्तोत्तरत्वात्। चितश्चिदात्मना स्वप्रकाशत्वेऽपि ईशित्रादिप्रभेदप्रतिहतिमूलकत्वोपपत्तये तद्दौस्स्थ्यापनुत्तये च शास्त्रतद्विचारयोश्च सावकाशत्वात्। न च प्रमेयत्वाप्रमेयत्वयोरेकत्र कथं सामञ्जस्यमिति वाच्यम्, शक्तिफलव्याप्त्योरकर्मत्वेऽपि लक्षणादिना वाक्यप्रसूतनिजस्वाकारमात्रग्राहिकया अनिर्वाच्याज्ञानदाहिकया प्रमया प्रमेयत्वेऽपि बाधकाभावात्। तदुक्तं संक्षेपशारीरके—

> 'नैतद्वस्तुनि कल्पितस्य जगतो वाक्यप्रसूतप्रमा-
> बुद्धिर्मूलधगिष्यते तव निजस्वाकारमात्रग्रहात्।
> कर्मत्वं न करोति वाक्यजनिता बुद्धिः स्वरूपे तव
> स्वाकारग्रहणेन केवलमियं संसारमूलं दहेत्॥'

तत एव च तदाकारज्ञानजननद्वारा स्वप्रकाशत्वपूर्णत्वादिसंशयादेरपनुत्त्या तिरोधायकमृत्पाषाणादिसमुत्सारणेन असाध्यस्वरूपस्यापि कूपगगनादेः साध्यत्वमिव अप्रमेयस्यापि प्रमाणैरज्ञानतत्कार्यविलोपात् प्रमेयत्वव्यवहारोऽपि न नोपपद्यते, अवच्छिन्ननभोव्यतिरेकेण कूपस्य निरूपयितुमशक्यत्वेन तत्र च न कथमपि साध्यत्वं सम्भाव्यते, मूर्तद्रव्योत्सारण एव साध्यत्वं पर्यवस्यति, घटस्य स्वभावसिद्धवियत्पूर्णताया एव रजोजलादिसमुत्सारणेन

PDF Compressor Free Version

अभिव्यक्तिरित्येवमुपादानत्वेन परमात्मपूर्णतया स्वभावत एव मनसो भगवदाकारस्य विषयसंसर्गितया अतदाकारता भाति ; शास्त्राचार्योपदिष्टमहावाक्यार्थानुसन्धानजन्यसंस्कारप्रचयनिवर्तिताविद्यातत्कार्यसंसर्गस्य च स्वाभाविकी तदाकारता अभिव्यज्यत इत्येतदेव मनसो निजस्वाकारमात्रविषयत्वमपि । नन्वीशित्रादिप्रभेदराहित्यपूर्णत्वनिर्मृष्टनिखिलकषायत्वादीनां चितो भिन्नत्वे सप्रकारता ; अभिन्नत्वे कथं स्वाभिन्नचितः स्वप्रकाशत्वेऽपि संशयादिविषयत्वम् ? इत्यत्र ब्रूमः—अज्ञानाश्रयत्वावभासकत्वाभ्यां चितः स्वप्रकाशत्वेऽपि तदनतिरिक्तपूर्णत्वादीनामावरणविषयत्वेन संशयादिविषयत्वस्य प्रत्यक्षेऽपि दूरस्थे वनस्पतिद्वये तदभिन्नभेदस्येव उपपत्तेः । एवं मितेऽपि घटादौ स्वानतिरिक्तवपुषः स्थेम्नः सप्रत्यभिज्ञनयनोत्थधीनिवर्त्यसंशयादिविषयत्ववत् अपरप्रकाशायाश्चितोऽभिन्नानामपि पूर्णत्वादीनां संशयादिविषयत्वे कानुपपत्तिः । ननु भेदाभेदयोः कथं वस्तुस्वरूपत्वमिति चेत्, न ; अन्यथानुपपत्तेः । तथा हि—भेदादेर्धर्म्यादिभिन्नत्वे भेदेऽपि धर्म्यादिभ्यो भेदान्तरमभ्युपगन्तव्यम् एवं तत्रापि इत्यनवस्था । भेदान्तरस्य भेदादिस्वरूपत्वे प्रथममेव तथा किं न स्यात् । न चान्योन्याभाव एव भेदः, स च वस्तुनः सविशेषाभिन्नः, ततश्चाभिन्नत्वान्नानवस्थादिरपि 'भेदप्रतिनिधेर्विशेषस्य विद्यमानत्वात् न पर्यायत्वादिकमपि, विशेषश्च भेदहीनेऽपि एकतरपरिशेषाभावादिनिर्वाहक इति वाच्यम्, अपर्यायत्वादिप्रमाजनकस्य स्वरूपातिरिक्तविशेषस्याङ्गीकारे तस्यैव भेदत्वेन भेदस्य धर्मिभेदोक्त्ययोगात् । विशेषस्यापि भेदः सविशेषाभिन्न एव वाच्यः । तथा चानवस्थादिदोषस्य तादवस्थ्यम् । न च वैशेषिकाभिमतविशेषवत् तस्य स्वपरनिर्वाहकत्वम्, तादृशविशेषे मानाभावात् इत्यादि विशेषतः प्रपञ्चितमद्वैतसिद्धिकारैः । अत एव भिन्नो घट इति अभिन्नो

PDF Compressor Free Version

घट इत्यादौ घटादिपदेन सहोच्चरितयोर्भिन्नाभिन्नशब्दयोर्घटादिपद-विषये एव प्रवृत्तिरिति लक्षणां विनाऽप्यखण्डार्थत्वं वाक्यस्येत्युक्तं संक्षेपशारीरके—

'भिन्नाभिन्नरवौ घटादिवचसा साकं समुच्चारिता-
वन्यूनानधिके घटादिविषये तावत् प्रवृत्तौ तव' इति।

एतेन वेदान्तपरिभाषाकृताम् अभिधावृत्त्यापि अखण्डार्थत्वोक्तिरपि संगच्छते। सर्वज्ञत्वादिविशेषणसंसर्गासंगिसम्यग्ज्ञानस्यास्मिन्नपि पक्षेऽनपायात्, भाष्यकृदनुक्तेर्विरोधावहत्वाभावात् लक्षणाभ्यु-पगमस्याखण्डार्थशेषत्वेनान्यथासिद्धत्वापि प्रौढिवादेन तत्संभवात्। ब्रह्मात्मादिपदानां च बृहत्पदार्थानुगमेन सर्वानुवृत्तसत्तास्फुरणात्मनि आपनादादानादत्तृत्वाच्च प्रत्यगात्मनि व्युत्पत्तेराचार्यैरङ्गीकृतत्वाच्च॥

यत्तु विमर्शमालायामेव दहनतुहिनयोरिव श्रुतिसिद्धसर्वज्ञ-त्वादिविरुद्धधर्मवतोरभेदानुपपत्तिरित्याशङ्कितम्, तदतीव मन्दम्; विरुद्धधर्माणां तदवच्छेदकोपाधिनिष्ठतया चिदात्मके केवले तद्वत्त्वस्यैवासिद्धेः

'इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः।
एतत् क्षेत्रम् . . . .॥'

इत्यादिपरमेश्वरवचनेन सुखादीनां क्षेत्रधर्मत्वेन स्वीकारात्। शिरसि मे सुखं पादयोर्व्यथा इत्यवच्छेदकभेदेन निर्दुःखत्वदुःखवत्त्वयोरविरो-धेनानौपाधिकधर्मिभेदासाधकत्वात् भेदमात्रसाधने सिद्धसाधनात्। उभयसंप्रतिपन्नतात्त्विकभेदस्याप्रसिद्धत्वात् तादृशदृष्टान्तस्यैव कथायां वक्तव्यत्वात्। 'सत्यं ज्ञानम्' इत्यादीनामपि निर्विशेषावद्योत-नार्थमेव लक्षणाङ्गीक्रियते, न तु विशिष्टस्यावबोधनार्थमपि। अपि च सर्वेष्वपि ज्ञानेषु ब्रह्मैव भासते। इदं रूप्यमित्यत्र इदमिव सन् घटः

PDF Compressor Free Version

अप्सरसः सन्ति इत्यादौ सदात्मकस्याधिष्ठानस्य प्रथनात् । न च नीलो घट इत्यादाविव नाधिष्ठानानुवेधः, सन्नित्यस्य घट इत्यनेन मुख्यसामानाधिकरण्यानुपपत्त्या तथात्वस्यैव वक्तुमुचितत्वात् । न च सत्ताजातिस्फुरणस्वरूपसत्त्वकालत्रयाबाध्यत्वान्यतमनिबन्धनतया सामानाधिकरण्योपपत्तिरिति वाच्यम्, अनुपपत्तेः । तथा हि— द्रव्यादित्रय एव सत्ताजातिरभ्युपेयत इति नाभावादिसाधारण-सत्प्रतीतौ तत्स्फुरणमुपपद्यते, सम्बन्धान्तरेणाभ्युपगतौ समानाकारा प्रतीतिरनुपपन्ना स्यात्, अननुगतेनानुगतप्रतीतौ जातिमात्रो-च्छेदात् स्वरूपसत्त्वेनापि तत्प्रतीतिर्नोपपद्यते । एवं स्वरूपसत्त्वेनैव सर्वत्र सद्व्यवहारोपपादनमपि नोपपद्यते । एकेनैव सर्वानुगतेन सर्वत्र सत्प्रतीत्युपपत्तौ बहूनां तद्धेतुत्वकल्पने मानाभावात् । त्रिकाला-बाध्यत्वस्य ग्रहणे तु विद्यमानमात्रग्राहकस्य साक्षिणः चक्षुरादीनां च योग्यताविरहात् 'सदिदं रजतम्' इत्यादिभ्रमेऽभावाच्च । तस्मादेकं सर्वाधिष्ठानमेव सदिति सर्वत्रानुभूयते । न चैवं प्रमेयत्वापत्तिः, उपहितस्य तत्त्वेऽदोषात् । स्वरूपेण तु वस्तुनः स्वप्रकाशत्वादेव सर्वत्र प्रमाणानपेक्षमेव तद्भानमुपपद्यते । न चैवं प्रमाणवैयर्थ्यम्, अध्यारोपापोहार्थत्वेनासकृत् तत्सार्थक्यस्योक्तत्वात् । न चाध्या-रोपापोहमात्रेण कथं स्वरूपप्रतिपत्तिरिति वाच्यम्, मुग्धस्यामनुष्य-त्वप्रतिषेधेनेवापोहेन तदुपपत्तेः । तदुक्तमाचार्यैः—कश्चित् किल मनुष्यो मुग्धः कैश्चिदुक्तः कस्मिंश्चिदपराधे सति 'धिक् त्वां नासि मनुष्यः' इति । स मुग्धतया आत्मनो मनुष्यत्वं प्रत्याय-यितुमुपेत्य कञ्चिदाह—ब्रवीतु भवान् कोऽहमस्मि । स तस्य मुग्धतां ज्ञात्वा आह क्रमेण त्वां बोधयिष्यामि । स्थावराद्या-त्मभावमपोह्य न त्वममनुष्यः—इत्युक्त्वा उपरराम । स मुग्धस्तं प्रत्याह—भवान् बोधयितुं प्रवृत्तस्तूष्णीं बभूव किं न बोधयति ।

PDF Compressor Free Version

तादृगेव तद्भवतो वचनं नास्यमनुष्य इत्युक्तेऽपि मनुष्यत्वमात्मनो न प्रत्येति स कथं मनुष्योऽसीति बोधितोऽपि मनुष्यत्वमात्मनः प्रतिपद्येत इति ॥

देवानामित्यादि लोकदृष्ट्यपेक्षया न ब्रह्मत्वबुद्ध्या उच्यते। 'पुरः पुरुष आविशत्' इति सर्वत्र ब्रह्मैवानुप्रविष्टमित्यवोचाम। अतः शरीराद्युपाधिजनितलोकदृष्ट्यपेक्षया देवानामित्युच्यते। परमार्थतस्तु तत्र तत्र ब्रह्मैवाग्र आसीदिति (भा०) आविद्यकं भेदमनूद्य तत्तदात्मना स्थितब्रह्मचैतन्यस्यैव विद्याविद्याभ्यां बन्धमोक्षोक्तेर्न पूर्वापरविरोधोऽस्तीति फलितमाह—अत इति। अविद्यादृष्टिमनूद्य तत्त्वदृष्टिमन्वाचष्टे (आ०) इत्यादिभाष्यतद्व्याख्योद्धरणमपि भवदनिष्टकरमेव, परमार्थतस्तत्र तत्र ब्रह्मैवासीदिति परमार्थतः अभेदस्यैव प्रतिपादितत्वात्। यत्तु भेदस्याविद्यकत्वे 'पुरः पुरुष आविशत्' इति हेतूक्तिरयुक्तेति, तन्न; परमार्थतोऽविकृतस्यैव तत्तदुपाधिप्रवेशेनौपाधिकजीवभावोक्त्या उपाधिसंसर्गापोहेन जीवः स्वतः पर एवेत्यत्र तात्पर्यात्। यत्तु नात्र जीवब्रह्मणोरैक्यमुच्यते किन्तु देहे प्रवेशमात्रं स चाद्वैतमतरीत्या असिद्ध एव। प्रवेशाङ्गीकारेऽपि यथा 'यः पृथिव्यां तिष्ठन्' 'य आत्मनि तिष्ठन्' इत्यादिवाक्यैः पृथिव्यादौ जीवे च परमात्मनः स्थितिकथनेऽपि पृथिव्याद्यन्तर्गतजीवस्य परमात्मनो भेद एव न त्वैक्यमिति, तथा 'पुरः पुरुष आविशत्' इति वाक्यमपि न जीवब्रह्मैक्यबोधकमिति; तदप्यतीव तुच्छम्। 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति परस्यैव जीवात्मना प्रवेशात् तद्व्यतिरिक्तस्य जीवस्य वस्तुनोऽभावात्। व्यापकस्यात्मनः प्रवेशासंभवात् जलसूर्यादिप्रतिबिम्बवदात्मप्रवेशश्च प्रतिबिम्बवत् व्याकृते उपलभ्यमानत्व प्रागुत्पत्तेरनुपलब्ध आत्मा पश्चात् कार्ये च सृष्टे व्याकृते बुद्धेरन्तरुपलभ्यमानः सूर्यादिप्रतिबिम्बवत् जलादौ कार्य

PDF Compressor Free Version

सृष्ट्वा प्रविष्ट इव लक्ष्यमाणो निर्दिश्यते, न तु निरवयवस्य सर्वगतस्य दिग्देशकालान्तरापक्रमणप्राप्तिलक्षणः प्रवेशः संभवति ; परमार्थतस्ततोऽन्यस्याभावात्। 'स एष इह प्रविष्टः' 'पुरः पुरुष आविशत्' इत्यादीनामात्मैकत्वदर्शनार्थपरत्वोपपत्त्या कार्यस्थस्योपलभ्यत्वमेव प्रवेश इति न काचिदनुपपत्तिः। प्रविष्टस्यैव च मलिनोपाधिकत्वेन जीवत्वम्। नित्यनिरतिशयज्ञानादिशक्त्युपाधित्वेन चान्तर्यामित्वमिति वक्ष्यते ॥

यच्चोक्तम्—'अयमात्मा ब्रह्म' इति वाक्यमपि न जीवब्रह्मैक्यबोधकम्, अयं प्रमाणसिद्धः आत्मा 'यच्चाप्नोति यदादत्ते' इति प्रमाणोक्तरीत्या जगज्जन्मादिकर्ता देवः ब्रह्म पूर्णमिति जगज्जन्मादिकर्तुः पूर्णत्वमुच्यते न तु जीवस्य परब्रह्मत्वम्—परब्रह्माभेदः, आत्मशब्दस्य मुख्यतः परमात्मबोधकत्वात्। अयमात्मा इत्यत्रात्मशब्दो यदि जीवपरः स्यात् तदा कथञ्चित् 'अयमात्मा' अयं जीवः ब्रह्म इत्यभेदशङ्का स्यात्। न ह्यात्मशब्दो जीवपरः किन्तु ब्रह्मपर एव, एतदात्मशब्दस्य जीवपरत्वे 'सोऽयमात्मा चतुष्पात्' इति वाक्ये आत्मनो वक्ष्यमाणविश्वतैजसप्राज्ञतुरीयरूपत्वानुपपत्तेः। 'यच्चाप्नोति यदादत्ते' इत्यादिना आत्मशब्दस्य जगत्कर्तृत्वादिना निमित्तेन परब्रह्मपरत्वोक्तेश्च। उक्तं च शङ्कराचार्यैः—आत्मशब्दश्च परमात्मपरिग्रहे सम्यगवकल्पते नार्थान्तरपरिग्रहे—इति। व्याख्यातं च भामतीकृता—द्युभ्वाद्यायतनं परं ब्रह्मैव, न प्रधानाव्याकृतवायुशारीरहिरण्यगर्भाः, कुतः स्वशब्दात्। जीवादावपि तदुपपत्तिमाशङ्कयोक्तम् आत्मशब्दश्चेति। पक्षान्तरे मुख्यमाप्त्याद्ययुक्तमित्यर्थः—इति। आनन्दगिरिणा 'नन्वात्मशब्दो जीवे संभवति इत्यत आह—आत्मशब्दश्चेति' रत्नप्रभाकृता 'यद्यप्यात्मशब्दो रूढ्या जीवसाधारणोऽपि भवति, तथापि योगेन ब्रह्मासाधारण एव। तथा च व्यापकत्वरूप-

PDF Compressor Free Version

योगेन रूढ्या च परमेश्वरे स्वारस्येन रूढिमात्राश्रयणेन जीवसाधारण्यं कल्पयितुं युक्तम्' इति, ब्रह्मविद्याभरणकृता च 'तथा च आत्मशब्दस्य मुख्यतया व्यापकत्वादिगुणवत्परमेश्वरपरत्वात् अयमिति शब्दस्य प्रसिद्धवस्तुपरामर्शित्वेन अयं प्रमाणसिद्ध आत्मा जगज्जन्मादिकर्ता व्यापको वा देवः परब्रह्म' इत्यर्थस्यैवोक्तत्वेन नेदमपि वाक्यं जीवब्रह्मणोरभेदबोधकम्—इति । तदेतदातिस्थवीयः । तथा हि—'सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म' इत्यत्र ब्रह्मणः सर्वात्मत्वं प्रकृतम् । तस्य च परोक्षत्वे शङ्किते प्रत्यक्षतो विशेषेण निर्दिशति—अयमात्मा ब्रह्म—इति । तदुक्तं भाष्यकृद्भिः 'अयमिति चतुष्पात्त्वेन प्रविभज्यमानं प्रत्यगात्मतया अभिनयेन दर्शयति' । अभिनयो नाम विवक्षितार्थप्रतिपत्त्यर्थमसाधारणः शारीरो व्यापारः, तेन हस्ताग्रं हृदयदेशमानीय कथयति इत्यानन्दगिरिणा च । यदपि परमात्मपक्ष एवैतदुपपद्यत इति नैष दोषः, सर्वस्य साधिदैविकस्य प्रपञ्चस्य प्रत्यगात्मना चतुष्पात्त्वस्य विवक्षित्वात् । एवं सति प्राज्ञतैजसवैश्वानराणां व्यष्टिसमष्टिक्रमविशेषमनादृत्य व्यपदेशोऽप्याञ्जस्येनोपपद्यते । आत्मशब्दस्य च प्रत्यगात्मन्येव प्रसिद्धिरिति शतधा भाष्यकृद्भिः प्रदर्शितम् । 'न वक्तुरात्मोपदेशात्' आत्मा नाम स्वरूपम्, स म आत्मेति विद्यात् इत्युपसंहारः प्रत्यगात्मपरिग्रहे साधुः, न पराचीनपरिग्रहे, 'अयमात्मा सर्वानुभूः' इति च श्रुत्यन्तरम् । प्रतीच्येवात्मशब्दो रूढो लोके नान्यत्र । व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्तत इति । 'पराञ्चि' 'यच्चाप्ति विषयानिहेति पिप्पलं स्वाद्वत्ति' इत्यनुरोधात् जीव एव पर्यवस्यति, न परस्मिन्' 'अनश्नन्नन्योऽपि' इति विरोधात् । 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यत्र 'एष त आत्मा' इत्यादिश्रुतिशतानुरोधेन सुस्पष्टमेव प्रत्यगात्मविषयत्वमात्मशब्दस्य । कथं पुनरात्मशब्दे प्रत्यगात्म-

PDF Compressor Free Version

विषये श्रूयमाणे संशयः ? उच्यते—अयमात्मशब्दो मुख्यः शक्यतेऽभ्युपगन्तुं सति जीवेशयोरभेदसंभवे। इतरथा तु गौणोऽयमभ्युपगन्तव्य आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः। तथा हि—परमेश्वरप्रक्रियायां जीवात्मा आत्मत्वेनैवैतमुपगच्छन्ति 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि भगवो देवते' इति हि तत्रत्यं भाष्यम्। अत एव 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति वाक्यस्थोऽप्यात्मशब्दो वाक्यान्वयादिति हेतुविशेषात् परमात्मनि नीयते; तस्यैव च 'अवस्थितेरिति काशकृत्स्नः' 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिभिर्विज्ञानात्मभावेनावस्थितस्य भूतेन्द्रियलक्षणाभिरविद्याकृताभिः संसर्गासंसर्गाभ्यां संसारित्वासंसारित्वे च प्रदर्शिते। परमात्मन्यपि प्रत्यगभेदाभिप्रायेणैवात्मशब्दः प्रयुज्यते। टीकाकृतामुक्तयोऽपि—यद्यपि प्राणभृतो विज्ञानात्मनो हि आत्मत्वं चेतनत्वं च संभवति, तथाप्युपाधिपरिच्छिन्नस्य सर्वज्ञत्वाद्यसंभवे सत्यस्मादेव शब्दात् प्राणभृदपि न इत्यादिभाष्यानुरोधेनोपाधिपरिच्छिन्ने सार्वज्ञ्याद्यसंभवाभिप्रायेणैव ज्ञातव्याः। प्रमाणसिद्धत्वाविशेषेऽपि कुत्रचिदेवेदमः प्रयोगो दृश्यत इति साधारण्येनेदमा प्रमाणसिद्धत्वोक्तिः; प्रत्यक्षसिद्धत्वोक्त्या तु परस्य परोक्षत्वव्यावृत्तिप्रसिद्धिश्चानुगृह्यते। भवत्पक्षे तु जगदुत्पत्तिस्थितिलयलीलस्य ब्रह्मत्वोक्तौ निष्प्रयोजनत्वमपि दुर्वारमेव। 'यच्चाप्नोति' इत्यत्र कारिकायां जगत्कर्तृत्वावद्योतकस्य पदस्याभावादपि तन्न युज्यते॥

एतेन—'प्रज्ञानं ब्रह्म' इति वाक्यम् 'एष शास्त्रप्रसिद्धः ब्रह्मा चतुर्मुख इन्द्रः प्रजापतिः एते सर्वे देवाः पञ्च महाभूतानि' इत्यादि यत्किञ्चिद्वर्तते तत्सर्वं प्रज्ञानेत्रं प्रज्ञा परब्रह्म नेत्रं प्रवर्तकं नियामकं यस्येति व्युत्पत्त्या प्रज्ञानामकपरब्रह्मनियम्यं प्रज्ञाने

PDF Compressor Free Version

परब्रह्मणि प्रतिष्ठितं स्थितम् । प्रज्ञानं परमात्मा ब्रह्म पूर्णमिति चतुर्मुखादिसर्वजीवानां तथा पञ्चमहाभूतादिसमस्तजडानां परब्रह्म-नियम्यत्वेन परब्रह्माश्रयत्वेन भेदमभिधाय परमात्मनः पूर्णत्वं वक्ति इति नेदं वाक्यं जीवब्रह्मणोरभेदबोधकम्, किन्तु भेदबोधकमेव—इत्यपास्तम् । 'आत्मा वा इदमग्र आसीत्' इत्यादिना पुरोवर्तिनो नामरूपक्रियात्मकस्य प्रपञ्चस्य आत्ममात्रत्वमुक्त्वा 'नान्यत् किञ्चन मिषत्' इति तद्व्यतिरिक्तस्य स्वतन्त्रसत्ताकस्याभावमुक्त्वा सृष्ट्यादिव्याजेनापि सर्वात्मत्वं परिपोष्य 'एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि' इत्यादिना सर्वस्य प्रज्ञाप्रतिष्ठितत्वमुक्त्वा 'प्रज्ञानं ब्रह्म' इत्यनेनापि शोधितत्वम्पदार्थस्य तत्पदार्थत्वोक्तिरेव युज्यते । तदुक्तं भाष्यकृतापि—तदेतत् प्रत्यस्त-मितसर्वोपाधिविशेषं सन्निरञ्जनं निर्मलं निष्क्रियं शान्तमेकमद्वयम् 'नेति नेति' इति सर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरं तत् अत्यन्तविशुद्धप्रज्ञोपाधिसम्बन्धेन सर्वज्ञमीश्वरं सर्वसाधारणाव्याकृत-जगद्बीजप्रवर्तकं नियन्तृत्वादन्तर्यामिसंज्ञं भवति—इति ॥

एवम् 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽह-मस्मीति न स वेद यथा पशुः' इत्यपि वाक्यं भेदनिन्दन-द्वारा अभेदमेव बोधयति । 'अथ यः कश्चिदब्रह्मविदन्यामात्मनो व्यतिरिक्तां यां काञ्चिद्देवतामुपास्ते स्तुतिनमस्कारयागबल्युपहार-प्रणिधानध्यानादिना उपास्ते अन्योऽसौ अनात्मा मत्तः पृथक् अन्योऽहमस्मि अधिकृतः, मयास्मै ऋणिवत् प्रतिकर्तव्यमित्येवंप्रत्ययः सन्नुपास्ते न स इत्थंप्रत्ययो वेद विजानाति तत्त्वम्' इति भाष्येण चेत्त्वदीयमिष्टं साध्यते तदा अपार्थकं भवद्भाष्यकृतां भाष्यनिर्माण-प्रक्रमणम्, साम्प्रदायिककलहबीजारोपणं च, यतोऽद्वैतसिद्धान्त-व्यवस्थापनपरेण भाष्येणाभीष्टं साधयितुं शक्यत एव श्लाघनीय-

PDF Compressor Free Version

प्रज्ञैः। यत्तु—यदि जीवब्रह्मणोरभेदः श्रुत्यभिप्रेतः स्यात्तर्हि 'अन्यां देवताम्' इति नोच्येत। अनन्यामित्येवोच्येत, नोक्तं तथा, तस्मान्नास्याः श्रुतेर्जीवब्रह्मणोरभेदे तात्पर्यम्, किन्तु भेद एव—इत्यादि तदप्यतीव तुच्छम्, निन्दार्थवादस्यैव भवन्मते दत्तजलाञ्जलिता स्यात्। विधिनिषेधमुखैर्वचनैरेव निर्वोढुं शक्यत्वात्। यद्यपि श्रुतेर्निरपेक्षत्वेन स्वनियोज्यनियोगाय नान्यापेक्षा, तथापि विधेयनिषेध्ययोः स्तुतिनिन्दे विना पुरुषप्रवृत्तिर्न सम्भवत्येवेति। तदुक्तं मीमांसावृत्तान्तरहस्यज्ञैः—'बर्हिषि रजतं न देयम्' इत्ययमपि निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते, न ह्यन्यथा ततश्चेतनः शक्यो निवर्तयितुम्—इति। परमात्मनश्च प्रत्यग्विभिन्नत्वे पराक्रमन्यत्वं स्वशेषत्वं च दुर्वारमेव। प्रतीचोऽपि प्रत्यक्त्वमिति चेत्, न; सर्वान्तरतमस्यैव प्रत्यक्त्वाभ्युपगमेन तदनुपपत्तेः। अपि च 'उपास्ते' इति श्रुतेः प्रणिधानध्यानादिभिरिति भाष्याच्च भेदोपासननिन्दनं सुस्पष्टं प्रतीयते। उपासनातिरिक्तज्ञानस्य त्वन्मतेऽकिञ्चित्करत्वाच्च न तत्स्तुतिः त्वन्मते सम्भाव्या। अस्मन्मते तु 'आत्मेत्येवोपासीत' इत्यादिविधिच्छायैर्वचनैरभेदज्ञानं प्रतिपाद्यत एवेति तत्पोषणाय भेदनिन्दनं श्लिष्यतेतराम्। अत एव अन्यत्रापि 'उदरमन्तरं कुरुते' 'अथ तस्य भयं भवति' 'द्वितीयाद्वै भयं भवति'

'अहं भवान् न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि॥'

'भयं द्वितीयाभिनिवेशतः स्यात्' इति वचनशतैर्भेदनिन्दनमभेदमण्डनं च श्रूयते स्मर्यते च। यत्तु—नापि 'परमं ब्रह्म वेद ब्रह्मैव भवति' इति वाक्यं जीवब्रह्मैक्यबोधकं किन्तु भेदबोधक-

PDF Compressor Free Version

मेवेति । तथा हि यः अधिकारी परमं ब्रह्म जानाति स ब्रह्म भवत्येव प्राप्नोत्येवेति परब्रह्मज्ञानिनः परब्रह्मप्राप्त्युक्त्या प्राप्य-प्राप्तृभावेन जीवब्रह्मणोर्भेदः सिध्यति—इति तदप्युपहासास्पदम्, 'ब्रह्मैव भवति' इति यथाश्रुतमन्वयं परित्यज्य भवत्येवेति ब्रह्मपरायाः श्रुतेरन्यथानयनं बलात्कारित्वमेव सूचयति । सत्तार्थकस्य भवतेः प्राप्त्यर्थवर्णनमप्यसङ्गतमेव । अमनुष्यत्वभ्रमापोहेन मनुष्यत्ववत् अराजत्वभ्रमापोहेन राजत्ववच्च सर्वात्मकस्य पूर्णप्रज्ञानानन्दघनस्य परमात्मनस्तत्त्वान्यत्वाभ्यामनिर्वाच्यया अविद्यया असर्वत्वम् अब्रह्मत्वं चाध्यारोपितम्, विद्यया अपगतायामविद्यायां तन्निमित्तासर्वत्वाब्रह्मत्वाद्यपोहेन सर्वब्रह्मात्मभवनं सुखेन संगच्छते । ब्रह्मणश्चतुर्विधक्रियाफलविरहितस्य प्राप्यत्वं कथमपि न संभवि, आत्मत्वे सति नित्याप्तत्वात् । अपि च वियदिव व्यापकः परः स्वभिन्नत्वेऽपि न प्राप्यर्हः अप्राप्तत्वाभावेन, काप्यदृष्टचरत्वात् । उत्क्रमणगमनादिसाध्यब्रह्मलोकावाप्तिवदुपाध्यवच्छिन्नस्य जीवस्य देशान्तरावस्थितब्रह्मप्राप्तिरपि न क्षोदक्षमा, कर्मफलवदेवानित्यत्वापत्तेः । अत एव 'विद्वान् नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्' इत्यत्रापि स्वाभाविकब्रह्मभवनमेव ब्रह्मप्राप्तिरित्येव विवक्षितम् । आत्मनो ह्यलाभोऽज्ञानमेव, ज्ञानमेवात्मनो लाभः, नानात्मलाभवत् अप्राप्तप्राप्तिलक्षण आत्मलाभो लब्धृलब्धव्ययोर्भेदाभावात् । यत्र ह्यात्मनोऽनात्मा लब्धव्यो भवति तत्रात्मा लब्धा भवति, लब्धव्योऽनात्मा । स चाप्राप्त उत्पत्त्यादिक्रियाव्यवहितः कारकविशेषेण क्रियाविशेषमुत्पाद्य लब्धव्यः । स च मिथ्याज्ञानजनितकामकर्मप्रभवत्वात् स्वप्ने पुत्रलाभवदनित्य एव स्यात् । अत्र तु गृह्यमाणाया एव रजताभासाया विपर्ययेण शुक्तिकाया विपरीत-

PDF Compressor Free Version

ज्ञानव्यवधानमात्रम् । अग्रहणं यथा ज्ञानमात्रमेव च ग्रहणम् , तथैव विपरीतज्ञानव्यवधानापोहार्थत्वाज्ज्ञानस्य अविद्यामात्रव्यवधानापोहेन ज्ञानमेव लाभः । प्राप्तिरपि भामतीकृता अत्रान्यथैवोपपादिता 'द्विविधं हीप्सितं पुरुषस्य किञ्चिदप्राप्तं ग्रामादि, किञ्चित्पुनः प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतम् , यथा स्वग्रीवावनद्धं ग्रैवेयकम्' 'तरति शोकमात्मवित्' इति ज्ञाननिवर्त्यत्वान्यथानुपपत्त्यापि ज्ञानमात्रमेव लाभः । ननु कथं तर्हि लब्धृलब्धव्यभाव एकस्मिन्निति चेत् , न ; विद्याविद्यादशाभेदेन तस्मिन्नेवोपपत्तेः । तदुक्तम्—

'अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥' इति ।

यत्तु 'परमं ब्रह्म वेद ब्रह्मैव भवति' इति वाक्ये ज्ञेयस्य ब्रह्मणः परममिति परमत्वोक्त्या 'ब्रह्मैव भवति' इत्यत्र परममिति विशेषणादानात् परब्रह्मज्ञानी ब्रह्मैव भवति जीव एव भवति न तु परमं ब्रह्म भवति इति प्राहुः । अत्यल्पमिदमुच्यते—ब्रह्मशब्दस्य जातिजीवकमलासनाद्यनेकार्थत्वात् 'द्वे ब्रह्मणी वा वेदितव्ये' इत्यादौ जीवे ब्रह्मशब्दप्रयोगसंभवाच्च न परब्रह्मपरत्वमित्यपि चोद्यं संभवति, तदप्यस्तु इति चेत् , न ; जीवे ब्रह्मपदप्रयोगसंभवेऽपि प्रकृते परब्रह्मोपादानमेवोचितम् , जीवभावस्याब्रह्मभावस्य प्रागेव सिद्धतया ब्रह्मज्ञानसाध्यत्वाभावात् । एवं चार्थात् द्वितीयब्रह्मभवनमपि परमत्वविशेषितमेव मन्तव्यम् । यच्च ब्रह्म भवतीत्यस्य बृंहितत्वरूपब्रह्मत्वाक्रान्तो भवति । 'सम्पूज्य ब्राह्मणं भक्त्या शूद्रो भवति ब्राह्मणः' इति, तन्न ; पूर्वोक्तयुक्त्या प्रकृते व्यक्त्यभेदस्यैव संभवेन ब्रह्मान्यदृष्टान्तवैषम्यात् । 'नान्यदतोऽस्ति द्रष्टृ' इति वाक्यमपि जीवनिषेधद्वारा ऐक्यबोधकमेव । 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यनेन तु न तात्त्विक-

PDF Compressor Free Version

भेदो बोध्यते व्यावहारिकभेदमादायापि नियम्यनियन्तृत्वादिभावोपपत्तेः, तात्त्विकभेदबोधकताभावाच्च अप्रसिद्धत्वाच्च तादृशभेदस्य ॥

जगद्व्यवस्था प्रशास्तृपूर्विका, व्यवस्थात्वात्, राज्यव्यवस्थावत्। विमतौ सूर्याचन्द्रमसौ विशिष्टज्ञानवता निर्मितौ, प्रकाशकत्वात्, प्रदीपवत्। विमतौ नियन्तृपूर्वकौ, विशिष्टचेष्टावत्त्वात्, भृत्यादिवत्। विमते द्यावापृथिव्यौ प्रयत्नवता विधृते सावयवत्वेऽपि अस्फुटितत्वात्, गुरुत्वेऽपि अपातित्वात्, संयुक्तत्वे सति वियुक्तत्वात् इत्यादीन्यनुमानानि न तात्त्विकभेदसाधकानि, तस्य क्वाप्यप्रसिद्धत्वात्। दृष्टान्ते साध्यविकलत्वाच्च व्यावहारिकभेदसाधने च सिद्धसाधनतया इष्टापत्तेश्च ॥

जीवाः परमात्मनस्तत्त्वतो न भिद्यन्ते, आत्मत्वात्, परमात्मवत्। ननु आत्मत्वं जातिरत्र हेतुः। तथा चाभेदे हेतूच्छित्तिरेवानुकूलतर्क इति चेत्, न; तत्त्वतोऽभेदेऽपि व्यावहारिकभेदेनैव व्यावहारिकजातेरनुच्छेदोपपत्तेः। ज्ञातृत्वाबाध्यत्वे अपि हेतू संभवतः, जीवे उपधेयेऽन्तःकरणोपहितवृत्तेस्तस्यासिद्धेरभावात्। न च द्वितीयहेतोर्जडे व्यभिचारः, तस्य बाध्यत्वेन हेतोरभावात्। तात्त्विकभेदस्य सर्वत्रासत्त्वेन व्यभिचारानवकाशाच्च। विमता जीवा वस्तुतो न ब्रह्मणो भिद्यन्ते, वस्तुत्वात्, ब्रह्मवत्। यच्च व्यवहारतोऽपि न भिद्यन्ते इत्येव साध्यतामित्याभाससमानमिति वाच्यम्, तत्र प्रत्यक्षविरोधस्यैव बाधकत्वात् श्रुत्यनुग्रहाद्याभाससमानापादनस्याप्रयोजकत्वाच्च। एवम्—आत्मा द्रव्यत्वापरजात्या नाना न, विभुत्वात्, आकाशवत्। न च प्रतिकल्पमाकाशस्य भेदेन साध्यवैकल्यम्, परिच्छिन्नत्वेन साधनवैकल्यम्, आत्मत्वस्य परमाणुत्वादिवदजातित्वेऽपि आत्मभेदसिद्ध्या चार्थान्तरमिति वाच्यम्, आत्मत्वाधिकरणं द्रव्यत्वापरजात्यैककाले

PDF Compressor Free Version

नाना न, समानकालीनमूर्तमात्रसंयुक्तत्वात्, गगनवत् इत्यत्र तात्पर्यात्। पक्षविशेषणमहिम्ना नार्थान्तरम्। विमतो भेदो मिथ्या, एकस्यां दृशि कल्पितो वा भेदत्वात् दृश्यत्वाद्वा चन्द्रभेदवत्, एकस्यां दृशि क्षणिकवादिकल्पितभेदवद्वा। न च कल्पितभेदत्वासिद्धिः, भेदेऽकल्पितत्वस्यैवासिद्धेः; एतेन 'एतस्य वा अक्षरस्य प्रशासने गार्गि' 'निमेषा मुहूर्ता अहोरात्रा अर्धमासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति' निमेषादयः नियन्तृपूर्वकाः, कलयितृत्वात्, सम्प्रतिपन्नवत्। 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां दिशम्' गङ्गाद्या नियन्तृपूर्वकाः, नियन्तृप्रवृत्तिमत्त्वात् भृत्यादिप्रवृत्तिवत् इत्याद्यनुमानानि सूचयित्वा शास्यशासकभावधार्यधारकभावजन्यजनकभावादिना चन्द्रसूर्यनद्याद्यभिमानिजीवानामक्षरनामकपरब्रह्मणा भेदबोधकान्येवेति पूर्वोत्तरवाक्यविरुद्धत्वात्तदुत्तरम् 'नान्यदतोऽस्ति द्रष्टृ' इति वाक्यं न भेदनिषेधकम्। ननु तर्हि एतद्वाक्यस्य कोऽसावर्थ इति चेत्, शृणु; सूर्यप्रशास्तृत्वादिना अक्षरं ब्रह्माङ्गीकरणीयमिति यदुक्तं तन्न युक्तम्; अग्नेर्दाहकप्रकाशकत्ववत् प्रकृत्यादेरचेतनस्यैव प्रशास्तृत्वसंभवेन न प्रशास्तृत्वेन प्रधानाद्यतिरिक्तं ब्रह्माङ्गीकर्तुं शक्यमिति सांख्येनाक्षेपे कृते तत्परिहारार्थम् 'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति वाक्यं प्रवृत्तम्। हे गार्गि! शासकत्वादिना सिद्धयदक्षरमदृष्टं द्रष्टृ—दर्शनविषयत्वयोग्यत्वाभाववत् स्वयं च द्रष्टृ, एवं श्रवणाविषयः स्वयं श्रोतृ ज्ञानाविषयः स्वयं विज्ञातृ। एतस्मात् शासकात् अन्यत् प्रधानं वा अव्याकृताकाशादि

PDF Compressor Free Version

पृथिव्यन्तं वा न द्रष्टृ न श्रोतृ न मन्तृ न विज्ञातृ इति शासकतया सिद्धयद्वस्तुनि विद्यमानद्रष्टृत्वश्रोतृत्वमन्तृत्वादीनां जडेषु प्रधानादिष्वसंभवेन न शासकं प्रधानादि जडं भवितुमर्हति । किं तु अक्षरं ब्रह्मैवेति 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च—आश्रयतया सम्बद्ध इति प्रधानवादिमतनिराकरणार्थं प्रवृत्तम् न त्वक्षरात् ब्रह्मणोऽन्यत् द्रष्टृ श्रोतृ मन्तृ विज्ञातृ वस्त्वेव नास्ति इति कथनद्वारा ब्रह्मान्यजीवनिषेधार्थमित्यप्यपास्तम्, श्रुतितात्पर्यानवबोधात् । तथा हि—अगम्यत्वेन दुर्वाच्यस्य सूत्रात्मन आश्रयत्वेनातितरां दुर्वाच्यस्याव्याकृतात्मन आकाशस्य 'यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्याः' इत्यादिनोक्तत्वात् याज्ञवल्क्येन 'नमस्तेऽस्तु याज्ञल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्व' इत्युक्ते गार्ग्या 'पृच्छ गार्गि' इत्यनुज्ञाता आकाशमेव तावत् कालत्रयातीतत्वात् दुर्वाच्यं ततोऽपि कष्टतरमक्षरं यस्मिन्नाकाशमोतं च प्रोतं च अतोऽवाच्यमिति कृत्वा यदि न प्रतिपद्यते अप्रतिपत्तिर्नाम निग्रहस्थानं तार्किकसमये; अथावाच्यमपि वक्ष्यति तथापि विप्रतिपत्तिर्नाम निग्रहस्थानम्; विरुद्धा प्रतिपत्तिर्हि सा यदवाच्यस्य वदनम् इत्यभिप्रेत्य 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' इति पप्रच्छ गार्गी । याज्ञवल्क्यस्तु यन्न क्षरति न क्षीयते वा इत्यक्षरं हे गार्गि ब्राह्मणा ब्रह्मविदोऽभिवदन्ति ब्राह्मणाभिवदनकथनेन नाहमवाच्यं वक्ष्यामि न च न प्रतिपद्येय इत्येवं दोषद्वयपरिहारमभिप्रेत्य 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलम् अनणु अह्रस्वमदीर्घमलोहितमस्नेहमच्छायम् अतमोऽवाय्वनाकाशमसंगमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन' इति अतद्व्यावृत्तिमुखेनाधिष्ठानभूतमशेषविशेषप्रत्यनीकमाकाशाश्रयत्वेनोक्तवान् । यद्यपि च अशेषविशेषापोहमुखेनैव 'नेति

PDF Compressor Free Version

नेति' 'न सत्तन्नासदुच्यते' 'अन्यदेव तद्विदितादथो अविदितादधि' इत्यादिनात्मतत्त्वं बोध्यते सर्वविशेषनिषेधावधिभूतम् । तथापि निर्विशेषत्वादविषयत्वाच्चात्मनोऽसत्त्वाशङ्का भवति । ननु कुतस्त-न्नास्तित्वशङ्का इति चेदत्रोच्यते—व्यवहारातीतत्वाद्ब्रह्मणः—व्यवहारविषये हि वाचारम्भणमात्रेऽस्तित्वभाविता बुद्धिः, तद्विपरीते व्यव-हारातीते नास्तित्वबुद्धिर्भवति । यथा घटादिर्व्यवहारविषयतयोपपन्नः सन् तद्विपरीतोऽसन्निति प्रसिद्धम् । एवमिहापि नास्तित्वाशङ्का । अयमभिसन्धिः—यदस्ति तद्विशेषतो गृह्यते यथा घटादि, यन्नास्ति तन्नोपलभ्यते यथा शशविषाणादि तथा नोपलभ्यते; तस्मात् विशेषतोऽग्रहणान्नास्ति ब्रह्म । तदुक्तं वाचस्पतिमिश्रैरपि 'प्रकृतै-तावत्त्वं हि' इति सूत्रे—'न च तत्तद्विशेषनिषेधे सामान्यमव-स्थातुमर्हति निर्विशेषस्य सामान्यस्यायोगात् । यथाहुः—'निर्विशेषं न सामान्यं भवेच्छशविषाणवत्' इति । तस्मात्तत्तद्विशेष-निषेधेऽपि तत्सामान्यस्य ब्रह्मणोऽनवस्थानात् सर्वस्यैवायं निषेधः । अत एव 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति निषेधात् परं नास्तीति सर्वनिषेधमेव तत्त्वमाह । 'अस्तीत्येवोपलब्धव्यः' इति चोपासनाविधानवन्नेयम्, न त्वस्तित्वमेवास्य तत्त्वम् । तत्प्रशंसार्थं चासद्भावज्ञाननिन्दा । यच्चान्यत्र ब्रह्मस्वरूपप्रतिपादनम्, तदपि मूर्तामूर्तरूपप्रतिपादनवन्निषेधार्थम् । असंनिहितोऽपि च तत्र निषेधो योग्यत्वात् संभन्त्स्यते । यथाहुः 'येन यस्याभिसम्बन्धो दूरस्थस्यापि तेन सः' इति । तस्मात् सर्वस्यैवाविशेषेण निषेधः—इति । अत एव चाधुनिकानामपि निर्विशेषवादे शून्यवादत्वाशङ्का । महच्चेदं व्यामोहास्पदं वादिनाम् । तदुक्तम्—

'यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥'

PDF Compressor Free Version

'देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः' 'तं दुर्दर्शं गूढम्' 'आसीनो दूरं व्रजति' 'कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति' इत्यादिना श्रूयते चास्य दुरवगाह्यत्वम्। मातापितृशतादपि हितैषिणी भगवती श्रुतिः—

'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।'

इत्यादिना तद्दर्शनार्थमविद्याप्रसुप्तान् प्रबोध्य जीवान् यत्नातिशयकर्तव्यतां सूचयति। 'असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्।' इत्यादिना च योऽसत् अविद्यमानं ब्रह्मेति वेद असन्नेव स भवति इत्यसद्वादिपक्षमासुरं निन्दितत्वेनापोह्य सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमपि अस्ति इति वेद यस्तस्य प्राशस्त्यं बोधयति। अस्तित्वावद्योतनायैव च 'एतस्य वा अक्षरस्य प्रशासने' इत्यादिना अनुमानं प्रमाणमुपन्यस्यति। प्रतिपादनप्रक्रिया चैषा—'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते'। इदमत्र तत्त्वम् —सर्वासु ह्युपनिषत्सु तत्त्वं सर्वविशेषप्रतिषेधेनैव निर्दिश्यते नेदं तदिति। यद्धि इन्द्रियगम्यं वस्तु तदेवास्तिबुद्ध्यनुगतप्रत्ययविषयम्, नास्तिबुद्ध्यनुगतप्रत्ययविषयं वा भवेत्; परमतत्त्वं तु अतीन्द्रियत्वादुभयप्रत्ययाविषयम्। न चायमस्ति नियमो यत्स्याज्ज्ञेयं वस्तु तदस्तिशब्देनोच्येतैव; अथास्तिशब्देन नोच्यते तदा नास्ति ज्ञेयमिति शब्दवाच्यत्वानुपपत्तेः। सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिर्जातिगुणक्रियासम्बन्धद्वारेण सङ्केतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथा, अदृष्टत्वात्। गौरश्वः जातितः, पचति क्रियातः, शुक्लः कृष्णः गुणतः, धनी गोमान् सम्बन्धतः। ब्रह्म च 'निर्गुणं निष्क्रियम्' इत्याद्यनुरोधात् एक-

PDF Compressor Free Version

त्वाद्वयत्वाविषयत्वात्मत्वेभ्योऽसंगत्वाच्च न केनचिच्छब्देनोच्यते, 'यतो वाचो निवर्तन्ते' इति श्रुतेः, 'न सत्तन्नासदुच्यते' इति स्मृतेश्च । न चैतावता सर्वप्रतिषेधः, शून्यवादप्रसङ्गात् । किञ्चिद्धि परमार्थमवलम्ब्य अपरमार्थः प्रतिषिद्ध्यते यथा रज्ज्वादिषु सर्पादयः । तच्च न ह्यपरिशिष्यमाणे कस्मिंश्चिद्भावेऽवकल्पते, प्रतिषेद्धुः स्वस्य प्रतिपेद्धुमशक्यत्वात् पारमार्थिकत्वेन प्रतिषेधानुपपत्तेः । वाङ्मनसातीतत्वमपि परस्य नाभावाभिप्रायेण ; 'ब्रह्म ते ब्रवाणि' 'ब्रह्मविदाप्नोति परम्' इत्यादिवेदान्तव्याकोपप्रसंगाच्च । न हि महता परिकरबन्धेन तदेव प्रतिपाद्य तदभावाभिलापो युज्यते, 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति हि न्यायः । प्रतिपादनप्रक्रिया त्वेषा इत्यवोचाम । कल्पितरूपप्रत्याख्यानेन वाङ्मनसातीतमविषयान्तःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति प्रतिपाद्यते न ह्युपाधिविगमे उपहितस्याभावोऽप्रतीतिर्वा युज्यते, दर्पणमणिकृपाणाद्युपाधिविगमेऽपि मुखाभावप्रतीत्याद्यापत्तेः । तस्मादुपाधिनिषेधेऽपि नोपहितस्य शशविषाणायमानता अप्रत्ययो वा । किञ्चिद्धि क्वचिन्निषिध्यते भावमनुपाश्रित्य प्रतिषेधानुपपत्तेः । नैसर्गिकाविद्याप्राप्तस्यैव निषेधोऽप्युपपद्यते अवाङ्मनसगोचरश्च बुद्ध्यनारूढः कथं निषेद्धुमपि शक्यते ॥

यद्यपि च 'नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा' तथापि सर्वविशेषरहितोऽपि जगतो मूलमित्यवगतत्वादस्त्येव कार्यप्रविलापनस्यास्तित्वनिष्ठत्वात् । कार्यं चेदं सूक्ष्मतारतम्यपारम्पर्येणानुगम्यमानं सद्बुद्धिनिष्ठामेव अवगमयति । विषयप्रविलापनेन प्रविलाप्यमाना बुद्धिरपि सत्प्रत्ययगर्भैव विलीयते । बुद्धिर्हि नः प्रमाणम्, सदसतोर्याथात्म्यावगमे । असदेव चेज्जगतो मूलं तदा असदन्वित-

PDF Compressor Free Version

मेव कार्यमुपलभ्येत । न चैवं दृश्यते, मृदादिकार्यं घटादि मृदन्वितमिव सत् सदित्येव तु गृह्यते । अतो न निरात्मकमिदं कार्यमिति ।

'अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥'

इत्याद्यनुसृत्य सत्कार्यबुद्ध्याद्युपाधिभिः पूर्वम् 'आत्मा अस्ति' इत्येवोपलब्धव्यः । यदा तु तद्रहितोऽविक्रिय आत्मा कार्यं च करणातिरेकेण नास्ति तदा सदसदादिप्रत्ययवर्जितस्यात्मनस्तत्त्वभावो भवति ; तेन स्वरूपेण आत्मा उपलब्धव्यः, उभयोः सोपाधिकनिरुपाधिकयोः पूर्वमस्तीत्येवोपलब्धस्य सत्कार्योपाधिकृतास्तित्वप्रत्ययेनोपलब्धस्य पश्चात् प्रत्यस्तमितसर्वोपाधिकस्य आत्मनस्तत्त्वभावो भवति मन्दबुद्ध्यधिरूढाय पुनः पुनः प्रशास्यप्रशासकधार्यधारकजन्यजनकाश्रयाश्रयिभावादिना असत्त्वाशङ्कापचिकीर्षया परस्यास्तित्वमवद्योत्यते । अग्नेर्दहनप्रकाशकत्ववदचेतनस्य प्रधानादेः प्रशास्तृत्वापनोदाय 'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ' इत्याद्युक्तिः । तदर्थस्तु—तद्वा अक्षरं गार्गि अदृष्टं न केनचित् दृष्टमविषयत्वात्, स्वयं तु द्रष्टृ दृशिस्वरूपत्वात्, तथा अश्रुतम् श्रोत्राविषयत्वात्, स्वयं श्रोतृ श्रुतिस्वरूपत्वात्, तथा अमतम् मनसोऽविषयत्वात्, स्वयं मन्तृ मतिस्वरूपत्वात्, तथा अविज्ञातम् बुद्धेरविषयत्वात्, स्वयं विज्ञातृ विज्ञानस्वरूपत्वात् । किञ्च नान्यदतोऽस्ति अस्मादक्षरात् किञ्चित् द्रष्टृ दर्शनक्रियाकर्तृ, एतदेवाक्षरं दर्शनक्रियाकर्तृ सर्वत्र नान्यदतोऽस्ति श्रोतृ तदेवाक्षरं सर्वत्र श्रोतृ नान्यदतोऽस्ति मन्तृ तदेवाक्षरं मन्तृ सर्वत्र मनोद्वारेण, तदेव चाक्षरम्—सर्वविज्ञानद्वारेण विज्ञानक्रियाकर्तृ नाचेतनं प्रधानमन्यद्वा 'एतस्मिन्नु खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च' इति 'यदेव साक्षादपरोक्षाद्ब्रह्म' 'य आत्मा सर्वान्तरोऽ-

PDF Compressor Free Version

शनायादिसंसारधर्मातीतः' अस्मिन्नाकाश ओतश्च प्रोतश्च एषा परा काष्ठा एषा परा गतिः एतत् परं ब्रह्म एतत् पृथिव्यादेराकाशान्तस्य सत्यमिति (भाष्यम्)। अयमभिप्रायः—उपाधिपरामर्शमन्तरेण अविभाव्यमानभेदत्वात् आकाशवदेकमेव ब्रह्मतत्त्वं तत्तदुपाधिभेदेन द्रष्टृ श्रोतृ मन्तृ विज्ञातृ भवति यथा च प्रदीपप्रकाशः नीलपीतहरितकाचाद्युपाधिसान्निध्यात् तत्तदाकाराकारितया पुरुधा विभाति एवमेव श्रवणजन्यश्रोतव्याकाराकारितमनःपरिणामः श्रुतिः, मनोजन्यमन्तव्याकाराकारितमनःपरिणामो मतिरित्युच्यते। तद्वासनावासितत्वेन तत्सान्निध्याच्च श्रोतृत्वादिकमुपपद्यते 'प्रज्ञया श्रोत्रं समारुह्य' 'सा द्रष्टुर्दृष्टिर्यया स्वप्नं पश्यति' इत्यादिश्रुतिभ्यः। एकस्यैवोपाधिभेदेन सर्वत्र द्रष्टृत्वश्रोतृत्वादिव्यावहारोपपत्तौ नानात्वकल्पने मानाभावात् गौरवाच्च सैन्धवघनवत् प्रज्ञानघनैकरसस्वाभाव्यात् परस्य। न च 'आत्मा वा अरे द्रष्टव्यः' इत्यादिश्रुतिभिर्जीवब्रह्मणोर्व्यावहारिकभेदेन व्यावहारिकं द्रष्टृत्वम् उच्यते, अस्मिन् वाक्ये जीवस्य वस्तुतः परब्रह्मरूपत्वेन पारमार्थिकभेदाभावेन तद्विवक्षया अतः अन्यत् पारमार्थिकद्रष्टृ नास्तीति निषिध्यत इति वाच्यम्, यथा नीलघटसद्भावकाले सामान्यतो घटो नास्तीति निषेधः कर्तुं न पार्यते, तथा त्वन्मतरीत्या व्यावहारिकद्रष्टुः सद्भावेन 'नान्यदतोऽस्ति द्रष्टृ' इति सामान्यतो द्रष्टुर्निषेधायोगात्। श्रुतौ परमार्थपदाभावात् परमार्थतोऽतोऽन्यद्द्रष्टृ नास्ति इत्यपि न वक्तुं युज्यते, अश्रुतपदस्याध्याहारे च स्वातन्त्र्येणेतिपदाध्याहारेण स्वातन्त्र्येण द्रष्टृ नास्ति इत्यपि वक्तुं शक्यत्वेन ब्रह्मान्यजीवस्य स्वातन्त्र्यनिषेधेऽपि ब्रह्मात्मजीवनिषेधासिद्धेः। अत्र परस्य ताटस्थ्ये 'प्रभवाप्ययौ हि भूतानाम्' 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'

PDF Compressor Free Version

'पत्युरसमञ्जसत्वात्' इति श्रुतिसूत्रविरोधध्रौव्यं च स्यात् । एकस्मिन्नेव च साधकत्वमपि संभवि, 'तदात्मानमेवावेत्' इति श्रुतेः । न चैषा कल्पना अपेशला, शास्त्रोपालम्भात्; 'एकधैवानुद्रष्टव्यम्' 'नेह नानास्ति किञ्चन' 'यत्र हि द्वैतमिव भवति' 'एकमेवाद्वितीयम्' इत्यादिना शास्त्रमेव सर्वो लोकव्यवहारो ब्रह्मण्येव कल्पितः न परमार्थ इति बोधयति । 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्' इत्यादिना पर्यायेण त्रिस्थानत्वादेकत्वप्रत्यभिज्ञानाच्च स्थानत्रयव्यतिरिक्तस्यासङ्गस्योपाधिप्राधान्यमवधूय चैतन्यप्राधान्येन तस्यैव 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्' इति परमेश्वरत्वं श्रूयते । न ह्यत्र ब्रह्मणापि जीवपरयोर्भेदः साधयितुं शक्यते । यद्यपि च नीलघटसद्भावे निषेधस्य यावद्विशेषावच्छिन्नप्रतियोगिताकत्वेन सामान्यावच्छिन्नप्रतियोगिताकत्वेन वा न घटो नास्ति इति प्रतीतिसंभवः, तथापि निषेधस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभ्युपगमे न कश्चिद्दोषः; तथैव व्यावहारिकद्रष्टृत्वान्तरसद्भावे यद्यपि 'नान्यदतोऽस्ति द्रष्टृ' इति सामान्येन निषेधो न संभवति, तथापि पारमार्थिकत्वावच्छिन्नप्रतियोगिताकस्य तस्य निषेधे न काचिदनुपपत्तिः, आकाशस्येव उपाधिपरामर्शमन्तरेण द्रष्टुरविभाव्यमानभेदत्वात् इति ह्युक्तम् । एतेन स्वातन्त्र्येण 'नान्यदतोऽस्ति' इति व्याख्यानमपि परास्तम् । स्वातन्त्र्यमित्यनेन स्वतः सत्तास्फूर्तिमत्त्वविवक्षणे नान्यदतः स्वतः सत्तास्फूर्तिमत् द्रष्टृ किन्त्वधिष्ठानभूतस्य परमतत्त्वस्य सत्तया स्फूर्त्या च तदधीनसत्तास्फूर्तिमदेवेत्यर्थस्याभ्युपगमे इष्टापत्तेः । तदन्यार्थस्य विवक्षणे तु श्रुतितात्पर्यविरोधः 'नान्यत् किञ्चन मिषत्' 'अतोऽन्यदार्तम्' इत्यादिश्रुतिभ्यः । अत एव 'आत्मा

PDF Compressor Free Version

वा अरे द्रष्टव्यः' 'येनाश्रुतं श्रुतं भवति' 'यो ह वै गार्गि एतदक्षरमविदित्वास्माल्लोकात् प्रैति' इति न पूर्वोत्तरविरोधोऽप्युक्तविधया सत्ताभेदेन सर्वस्य सुस्थत्वात्। अन्यच्च स्वव्याख्यानेन भाष्यकारीयव्याख्यानेन च यदीश्वरादिसाधनम्, तत्सर्वमप्यभ्युपेयत एव इति सिद्धसाधनम्। कामकर्मविशिष्टकार्यकारणोपाधिरात्मा अन्तर्यामीश्वर उच्यते। स एव निरुपाधिः केवलः शुद्धः स्वेन स्वभावेनाक्षरः परतः परश्च भवति। यदाकाशस्य भेदलिङ्गं पश्यति तदा आत्मनोऽपि भेदलिङ्गं लभेत कश्चित् येनानुमिनुयादपि॥

यदपि, 'किञ्च शून्यवादिपक्षस्तु सर्वप्रमाणविरुद्धः' इत्यारभ्य 'वञ्चकताप्राप्तेः' इत्यन्तेन भाष्यभामतीकल्पतरुकारादीनां वाक्यान्युद्धृत्य व्यावहारिकसत्यताया अपाकरणम्, तदपि तात्पर्यानवबोधविजृम्भितम्, सांवृतिकसत्त्वविलक्षणसत्त्वस्योपपत्तेः। तथा हि—"लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि। तैः खलु सत्सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्यते, असच्च असदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्यते, सदसतोश्च विचारासहत्वं व्यवस्थापयता सर्वप्रमाणविप्रतिषिद्धं व्यवस्थापितं भवति। तथा च सर्वप्रमाणविप्रतिषेधान्नेयं व्यवस्थोपपद्यते। यद्युच्येत तात्त्विकं प्रामाण्यं प्रमाणानामनेन विचारेण व्युदस्यते न सांव्यवहारिकम्। तथा च भिन्नविषयत्वान्न सर्वप्रमाणविप्रतिषेध इत्यत आह—न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम्। प्रमाणानि हि स्वगोचरे प्रवर्तमानानि तत्त्वमिदमित्येव प्रवर्तन्ते। अतात्त्विकत्वं तु तद्गोचरस्यान्यतो बाधकादवगन्तव्यम्, न पुनः सांव्यवहारिकं नः प्रामाण्यं न तु तात्त्विकमित्येव प्रवर्तन्ते। बाधकं चातात्त्विकत्वमेषां तद्गोचरविपरीततत्त्वोपदर्शनेन दर्शयेत्। यथा शुक्तिकेयं न रजतम्, मरीचयो

PDF Compressor Free Version

न तोयम्, एकश्चन्द्रो न चन्द्रद्वयमित्यादि, तद्वदिहापि समस्तप्रमाणगोचरविपरीततत्त्वान्तरव्यवस्थापनेनातात्त्विकत्वम् एषां प्रमाणानां बाधकेन दर्शनीयं न त्वव्यवस्थापिततत्त्वान्तरेण प्रमाणानि शक्यानि बाधितुम्। विचारासहत्वं वस्तूनां तत्त्वं व्यवस्थापयद्बाधकमतात्त्विकत्वं प्रमाणानां दर्शयतीति चेत्, किं पुनरिदं विचारासहत्वं वस्तु यत्तत्त्वमभिमतम्, किं तद्वस्तु परमार्थतः सदादीनामन्यतमं केवलं विचारं न सहते, अथ विचारासहत्वेन निस्तत्त्वमेव ? तत्र परमार्थः सदादीनामन्यतमं विचारं न सहत इति विप्रतिषिद्धम्। न सहते चेन्न सदादीनामन्यतमम्; अन्यतमं चेत् कथं न विचारं सहते ? अथ निस्तत्त्वं चेत् कथमन्यतमं तत्त्वमव्यवस्थाप्य शक्यमेवं वक्तुम्। न च निस्तत्त्वतैव तत्त्वं भावानाम्, तथा सति हि तत्त्वाभावः स्यात्, सोऽपि च विचारं न सहत इत्युक्तं भवद्भिः। अपि चारोपितं निषेधनीयम्, आरोपश्च तत्त्वाधिष्ठानो दृष्टो यथा शुक्तिकादिषु रजतादेः। न चेत् किञ्चिदस्ति तत्त्वं कस्य कस्मिन्नारोपः, तस्मात् निष्प्रपञ्चं परमार्थसद्ब्रह्म अनिर्वाच्यप्रपञ्चात्मनारोप्यते, तच्च तत्त्वं व्यवस्थाप्यातात्त्विकत्वेन सांव्यवहारिकत्वं प्रमाणानां बाधकेनोपपाद्यत इति युक्तमुत्पश्यामः" इत्यादिभामतीकृद्वचनैः न हि प्रमाणानां परमार्थवस्तुग्राहकत्वमुच्यते प्रमाणानि स्वगोचरे प्रवर्तमानानि तत्त्वमिदमित्येव प्रवर्तन्ते; अतात्त्विकत्वं तु तद्गोचरस्यान्यतो बाधकादवगन्तव्यमित्युक्तेः; किन्तु न ह्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुमित्यनेनाधिष्ठानभूततत्त्वस्यास्तित्वमेव साध्यते। अत एव यथा शुक्तिकेयं न रजतम्, मरीचयो न तोयमित्यादि, तद्वदिहापि समस्तप्रमाणगोचरविपरीततत्त्वान्तरव्यवस्थापनेन अतात्त्विकत्वम् एषां प्रमाणानां बाधकेन दर्शनीयं न तु अव्यवस्थापिततत्त्वान्तरेण

PDF Compressor Free Version

प्रमाणानि शक्यानि बाधितुमित्यादिनाधिष्ठानावशेषेण शून्यवाद-प्रतिक्षेप एव तात्पर्यं न तु जगतः पारमार्थिकत्वप्रतिपादने । अत एव न पुनः सांव्यवहारिकं नः प्रामाण्यम् न तु तात्त्विक-मिति बौद्धोक्तिकल्पनमुपहासास्पदं बौद्धाभिमतस्य सांव्यवहारिक-प्रामाण्यस्याधिष्ठानानभ्युपगमेऽनुपपत्तिरित्येव तु सुस्पष्टं प्रतीतेः ॥

बुद्धाभिमतसत्यद्वयं च इत्थम्—संवृतिरेकं सत्यमविपरीतं परमार्थश्चापरं सत्यमिति । तयोरतुल्यबलता चेत्थं विज्ञेया—संवृति-सत्यमवितथं रूपं लोकस्य, परमार्थसत्यं च सत्यमविसंवादकं तत्त्व-माचार्याणाम् । एतदुक्तं भवति—सर्व एवामी आध्यात्मिका बाह्याश्च भावाः स्वभावद्वयमाबिभ्रतः समुपजायन्ते, यदुत सांवृतं पारमार्थिकं च ; तत्रैकमविद्यातिमिरावृतबुद्धिलोचनानामभूतदर्शिनां पृथग्जनानां मृषादर्शनविषयतया समादर्शितात्मसत्ताकम्, अन्यत् प्रविचयाञ्जन-शलाकोद्घातिताविद्यापटलसम्यग्ज्ञाननयनानां तत्त्वविदामाचार्याणां सम्यग्दर्शनविषयतयोपस्थितस्वरूपम् । ननु तर्हि पारमार्थिको निष्प्रपञ्चः स्वभावः स एवास्तु, किमनया अपरया स्कन्धधात्वा-यतनार्थसत्यप्रतीत्यसमुत्पादादिदेशनया अपरमार्थया प्रयोजनम् ? अतत्त्वं हि परित्याज्यम् । यच्च हि त्याज्यम्, किं तेनोपदिष्टेन ? उच्यते, सत्यमेतदेवम् । किन्तु लौकिकं व्यवहारमनभ्युपगम्याभि-धानाभिधेयज्ञानज्ञेयादिलक्षणमशक्य एव परमार्थो देशयितुम्, अदेशितं च न शक्योऽधिगन्तुम्, अनधिगम्य च परमार्थं न शक्यं निर्वाणमधिगन्तुमिति । तदुक्तम्—

'व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥' इति ।

अत्यन्तासत एव तु प्रतीतिः तन्मते असत्ख्यात्यभ्युपगमात्,

PDF Compressor Free Version

अद्वैत्यभिमतव्यावहारिकसत्त्वं तु ततो महद्विलक्षणम् । तदुक्तं संक्षेपशारीरककृता—

'आकाशादौ सत्यता तावदेका प्रत्यङ्मात्रे सत्यता काचिदन्या ।
तत्संपर्कात् सत्यता तत्र चान्या व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र ॥'

न चैवं त्रिविधसत्त्वाङ्गीकारे ब्रह्मैव सदिति स्वमतविरोधः स्यादिति वाच्यम्, तस्य परमार्थसद्ब्रह्मैवेत्येतत्परत्वात् । ननु परमार्थसदेव सदितरद्द्वयं सद्विलक्षणमेव सत्त्वेन भाति बाधविलम्बाविलम्बाभ्यां तद्भेद इत्यभिप्रेतम् आहोस्वित् सत्त्वस्यैवावान्तरभेद इति । नाद्यः, त्वन्मते रूप्याभावे रूप्यधिय इव सत्त्वाभावे सत्त्वबुद्धेरयोगात्, कदाचिदपि सत्त्वाभावे तुच्छवदुत्पत्त्याद्ययोगात् व्यावहारिके प्रातिभासिकादर्थगतविशेषाभावेन तत्रार्थक्रियादेः श्रुतीनां तद्विषयत्वेन प्रामाण्यस्य चायुक्त्यापातात् । नान्त्यः, आरोपितानारोपितसाधारणसामान्यधर्माभावात् व्यावहारिकस्यानारोपितविशेषत्व इष्टापत्तेश्चेति चेत्, न; द्वितीयपक्षस्यैवाभ्युपगतत्वात् । अबाध्यत्वरूपं ह्यारोपितानारोपितयोः सामान्यम्, स्वकालाबाध्यत्वमात्रेण आरोपितेऽपि तत्संभवात् । इयांस्तु विशेषः—शुक्तिरूप्यादयो व्यवहारकाल एव बाध्यन्ते; आकाशादयस्तु यावद्व्यवहारमबाधिताः श्रौतस्मार्तलक्षणवर्णाश्रमधर्मानुष्ठानविशुद्धस्वान्तस्य प्रणिधानादिसमावर्जितपरमेशानुग्रहसमासादितश्रवणादिजन्यतत्त्वज्ञानस्य परब्रह्मज्ञानेनैव बाध्यन्ते, यथा प्रातिभासिकरजते ज्ञातैकसदेकं रजतत्वं लौकिकपरमार्थरजते च अज्ञातसदपरं रजतत्वं तदुभयानुगतं च आरोपितानारोपितसाधारणं रजतत्वं रजतशब्दालम्बनम् । एवमाकाशादावारोपितैका सत्यता चिदात्मनि चानारोपिता अपरा तदुभयसाधारणी चान्या व्यावहारिकी सत्यता सत्यशब्दालम्बनम् । न चैवमिष्टापत्तिरिति वाच्यम्, व्यावहारिकप्रपञ्चस्य सद्विशेष-

PDF Compressor Free Version

त्वेऽपि अनारोपितविशेषत्वाभावात् । ननु व्यावहारिकप्रातिभासिकयोर्बाध्यत्वाविशेषेऽपि किंनिबन्धनो भेदः ? न तावन्मायिकत्वाविद्यकत्वाभ्यां भेदः, मायाविद्ययोरभेदात् अर्थगतविशेषाभावे तदयोगाच्च । नाप्यर्थक्रियाकारित्वाकारित्वाभ्यां विशेषः, स्वाप्नघटादौ स्वाप्नजलाहरणाद्यर्थक्रियादर्शनात् । नाप्यर्थक्रियायां व्यावहारिकत्वं विशेषणम्, अन्योन्याश्रयात् स्वाप्नाङ्गनालिङ्गनादौ प्रातिभासिके व्यावहारिकसुखजनकेऽतिव्याप्तेश्च । नापि ब्रह्मप्रमातदन्यप्रमाबाध्यत्वाभ्यां विशेषः, त्वन्मते ब्रह्मज्ञानस्यैव प्रमात्वात् इति चेत्, न ; सप्रकारकज्ञानबाध्यत्वनिष्प्रकारकज्ञानबाध्यत्वाभ्याम्, शुद्धब्रह्मधीबाध्यत्वतदन्यधीबाध्यत्वाभ्याम्, स्वबाधकधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यां वा भेदसम्भवात् । मोक्षोपायज्ञानाविषयत्वमेव व्यावहारिकत्वं मुक्तेनावेद्यत्वं वा व्यावहारिकत्वम् । न चेष्टापत्तिः, तदानीं भेदस्य सत्त्वे वेदनापत्तेर्वज्रलेपायितत्वात् । वेदनाभावान्न जानातीति चेत्, न ; "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्" इत्यादिश्रुत्या वेदनसद्भावस्य सर्वदा प्रतिपादितत्वात्, तत्प्रामाण्यानभ्युपगमे तु बौद्धवदुपेक्षणीयोऽसि, तस्मात्तदानीं प्रपञ्चस्यासत्त्वादेवावेदनीयता । वस्तुतस्तु सति प्रमातरि बाध्यत्वम्, सविकल्पकज्ञानबाध्यत्वम्, मोक्षसाधनेतरज्ञानबाध्यत्वं वा प्रातीतिकत्वमविद्योपाधिकम्, प्रमात्रा सह बाध्यत्वम्, मोक्षहेतुज्ञानमात्रबाध्यत्वं वा मायोपाधिकं व्यावहारिकत्वम् । एकस्यैवाज्ञानस्य किंचिदवच्छिन्नचैतन्यविषयत्वेनानवच्छिन्नचैतन्यविषयत्वेन चाविद्या मायेति व्यपदेशः । अपि च यदा बुद्धमते शुक्तिरूप्यादीनामसत्त्वम् अद्वैतमते तु क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वमसत्त्वम्, त्रिकालाबाध्यत्वं सत्त्वम्, तदुभयाविलक्षणत्वमनिर्वचनीयत्वमिति तदा कैव कथा आकाशादीनाम् ? अत एव 'नाभाव

PDF Compressor Free Version

उपलब्धेः' 'वैधर्म्याच्च न स्वप्नादिवत्' 'न ह्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोऽन्यत् तत्त्वमनधिगम्य शक्यतेऽपह्नोतुमपवादाभाव उत्सर्गप्रसिद्धेः' इत्यादिसूत्रभाष्याभ्याम् असद्वादस्य प्रतिक्षेपो दृश्यते ; न हि ब्रह्मवादिनो नीलाद्याकारां संवित्तिमभ्युपगच्छन्ति, किं तु अनिर्वचनीयं नीलादीति भामतीकृतः ॥

यदपि—'न हि स्वप्नसुखाद्यर्थं धर्मे कश्चित् प्रवर्तते ।' इत्यादिना जगतो मिथ्यात्वे साध्यसाधकत्वानुपपत्तिरिति परमार्थसत एव साधकत्वात् साधकतायाः प्राक्सत्त्वघटितत्वात् । न च धीमात्रविषयत्वम्, अपरोक्षधीविषयत्वम्, सत्त्वेन तादृशधीविषयत्वं वा साधकताप्रयोजकं सम्भवतीति वाच्यम्, तुच्छातीन्द्रिययोरतिव्याप्त्यव्याप्तिभ्याम्, तत्त्वेन ज्ञानमपि न प्रयोजकम्, वह्नित्वेनाज्ञातेऽपि वह्नौ दाहकत्वदर्शनात् वह्नित्वेन ज्ञातेऽपि गुञ्जापुञ्जे तददर्शनात् ; नापि त्रिचतुरकक्ष्यास्वबाधिता प्रतीतिस्तन्त्रम्, आत्मनो गौरत्वेनानित्यत्वस्य नभसो नैल्येन स्पर्शवत्त्वस्य चापत्तेः 'गौरोऽहम्' 'नीलं नभः' इत्यादिप्रतीतावपि त्रिचतुरकक्ष्यास्वबाधात् यौक्तिकबाधस्य च प्रपञ्चेऽपि त्वन्मते सत्त्वात्—इति, तन्न ; यादृश्या बुद्ध्या तव नभोनैल्यादिव्यावृत्तया घटादौ सत्त्वसिद्धिः तादृग्बुद्धिविषयत्वस्यैव साधकत्वसंभवे पारमार्थिकसत्त्वानपेक्षणात्, लोकप्रसिद्धस्यैव सत्त्वस्य साधकत्वोपपत्तेश्च । त्रिचतुरकक्ष्यास्वबाधिता वादिप्रतिवादिप्राश्निकादीनां सत्त्वबुद्धिरपि तन्त्रमेव ॥

यत्तु—

सत्यं चेत् संवृतिः केयं मृषा चेत् सत्यता कथम् ।
सत्यत्वं न च सामान्यं मृषार्थपरमार्थयोः ॥
तुल्यार्थत्वेऽपि तेनैषां मिथ्यासंवृतिशब्दयोः ।
वञ्चनार्थमुपन्यासो लालावक्त्रासवादिवत् ॥

PDF Compressor Free Version

नास्तिक्यपरिहारार्थं संवृतिः कल्पनेति च ।
तस्माद्यन्नास्ति नास्त्येव यद्यस्ति परमार्थतः ॥
तत्सत्यमन्यन्मिथ्येति न सत्यद्वयकल्पना ।
न हि स्वप्नसुखाद्यर्थं धर्मे कश्चित् प्रवर्तते ॥

इति बौद्धमतनिराकरणपरैर्भट्टवाक्यैर्वेदान्त्यभिमतव्यावहारिकप्रामाण्यनिराकरणम्, तदपि वक्ष्यमाणप्रकारैरपाकृतं वेदितव्यम् । व्यवहारे भट्टनय इति भट्टमतानुयायित्वमपि 'अप्रतिषिद्धं परमतमनुमतं भवति' इति न्यायात् सिद्धान्ताविरुद्धांश एव ज्ञातव्यम्, न त्वद्वैतसिद्धान्तस्य सर्वशास्त्रतात्पर्यविषयभूतस्य विरोधिकर्तृत्वाद्यनर्थोपप्लुतात्मादावपि । वञ्चकत्वमपि ब्रह्मातिरिक्तं मायामात्रं पश्यतां तत्त्वदर्शिनां नोपपद्यते, निष्प्रयोजनत्वात् । अत एव—अद्वैतिभिर्वर्णाश्रमादिधर्मा देवतीर्थादिसमुपासनं च लोकवञ्चनार्थमेवानुष्ठीयन्ते, सिद्धान्ते सर्वेषां मिथ्यात्वात्—इत्यादिमुधाप्रलापोऽपाकृतो वेदितव्यः । देहादिषु सत्यत्वाभिनिवेशवतामेव विप्रलिप्सादिना वञ्चकत्वसम्भवात्; न हि निष्प्रयोजनं कौतूहलादेव अत्यायाससाध्यवैदिकस्मार्तकर्मोपासनादौ प्रवृत्तिसंभवः । वर्णाश्रमादिधर्मानुष्ठानादौ तात्पर्येण प्रवृत्तिर्द्वैतिनामद्वैतिनां वा इति तु प्राचीनार्वाचीनजनप्रवृत्तिदर्शनेनैव शिष्टैः सुस्पष्टमनुभूयते । मिथ्याभूतसंसारान्निर्विण्णचेतसां तु परमेश्वरप्रसादैकलभ्यपरमतत्त्वसाक्षात्कारायैव धर्मानुष्ठानादौ प्रयत्नातिशयः

'ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।'
'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।'
'वर्णाश्रमवता राजन् पुरुषेण परः पुमान् ।
हरिराराध्यते भक्त्या नान्यत्तत्तोषकारणम् ॥'

PDF Compressor Free Version

इति वचनशतात् । तत्त्वदर्शिनामपि

'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ।
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ॥
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ।'

इत्यादिभगवद्वचनात् लोकसंग्रहार्थमेव प्रवृत्तिः । वस्तुतस्तु अधिकारविशेषानवबोधनिबन्धन एव वादिनां विवादः । अद्वैतिसिद्धान्ते न हि सर्वेषां निर्विशेषतत्त्वसाक्षात्कारेऽधिकारः, किन्तु इह जन्मनि अन्यस्मिन् वा समनुष्ठितश्रौतस्मार्तवर्णाश्रमधर्मविशुद्धस्वान्तस्य समासादितपरमेशानुग्रहनिबन्धनशमदमाविवेकवैराग्यस्य पुरुषधौरेयस्यैवाधिकारो नान्यस्य 'शान्तो दान्त उपरतः.....समाहितो भूत्वा आत्मन्येवात्मानं पश्येत्' इति श्रुतेः ; तदितरेषां तु यथायोग्यं कर्मोपासनादौ ॥

यद्यपि 'ओमित्येवं ध्यायथ आत्मानम् अन्या वाचो विमुञ्चथ' 'त्यागेनैके अमृतत्वमानशुः' 'त्यज धर्ममधर्मं च' 'त्यक्तुः प्रत्यक् परं पदम्' 'धर्मान् संत्यज्य यः सर्वान् मां भजेत स सत्तमः' 'सर्वधर्मान् परित्यज्य' इत्यादिना सर्वकर्मत्याग एव श्रेयस्करत्वेन श्रूयते ; तथापि न सर्वेषां त्यागेऽधिकारः । 'कुर्वन्नेवेह कर्माणि' 'यः शास्त्रविधिमुत्सृज्य' इत्यादिवचनविरोधात्, किन्तु पूर्वं सम्यक् स्वधर्मानुष्ठाने ततः सर्वसंन्यासादौ । संस्कारादिपूर्वकस्वाध्यायाध्ययनाद्यधिकृतस्य बालस्य संन्यासाधिकारित्वे सर्वशास्त्रमुच्छिद्येत ॥

शून्यपदेन सर्वप्रपञ्चातीतं भावरूपं किंचित् तत्त्वं विवक्षितम्, उत अभावरूपम् ? नाद्यः, तथा सति वाचोयुक्त्यन्तरेण ब्रह्मवाद एवाश्रितः । यदि द्वितीयः पक्षः, तदा सर्वप्रमाणविरोधः । सर्वप्रमाणैः प्रपञ्च उपलभ्यमाने तदभाव

PDF Compressor Free Version

एव तत्त्वमिति निरूपयितुमशक्यमिति दूषणस्य स्फुटतया तन्निराकरणाय न सूत्रकृता सूत्राण्यारचितानि। ननु प्रत्यक्षादिप्रतीतिः भ्रमरूपा भविष्यति, युक्तिबाधितत्वादिति चेत्, न; प्रत्यक्षादिप्रमाणविरोधे युक्तीनामेवाभासत्वोपपत्तेः। अपि च यत् युक्तिबाधितम्, तदनृतमिति क्व दृष्टम्? शुक्तिरजतादौ दृष्टमिति चेत्, तर्हि यदनृतं शुक्तिरजतादिकं दृष्टं तत् साधिष्ठानमेव दृष्टम्, यश्चाभावो दृष्टः स सङ्ख्यां प्रतियोग्यधिकरणाभ्यां निरूप्यमाण एव दृष्ट इति प्रपञ्चस्यानृतत्वे तदधिष्ठानं परमार्थभूतं किञ्चिदुपेयम्। तदिदमाह—न ह्ययं सर्वप्रमाणसिद्ध इत्यादि। अन्यत्तत्त्वं परमार्थभूताधिष्ठानम्। न चाभाव एवाधिष्ठानम्, तस्यापि धर्मिप्रतियोगिसापेक्षत्वेन तन्मात्रपरिशेषानुपपत्तेः। अपि चापवादबलेन प्रतीतेर्भ्रमत्वं वक्तव्यम्। अपवादश्च 'इदमिह न' इति 'इदमिदं न' इति वा अधिष्ठानपरिशेषेणैव। न च शून्यवादिनस्तत् संभवति, अभावाधिकरणानुपगमात्। अतः उत्सर्गप्राप्तं प्रत्यक्षादिप्रामाण्यं कथमपबाधितुं शक्यम्? तदाह—अपवादाभावे....इति। तथा च प्रत्यक्षादिप्रमाणोपजीविनीनामेव युक्तीनामर्थसाधकत्वात् तद्विरोधिनीनामाभासत्वात्, प्रबलस्य च प्रत्यक्षादिप्रमाणबाधकस्य शून्यवादानुसारिणोऽसंभवान्न शून्यमेव तत्त्वमिति। यदि तु अयमपि सूत्रकृतैव निराकर्तव्यः तर्हि तन्निराकरणपरतया 'सर्वथानुपपत्तेश्च' इत्यन्तं सूत्रमावृत्त्या योजनीयम्। निर्विशेषपरमतत्त्वस्यावशेषत्वोक्त्या शून्यत्वमेव प्रतिक्षिप्यते। प्रपञ्चस्य मिथ्यात्वेऽपि पूर्वोक्तरीत्या बुद्धाभिमतसांवृतिकसद्विलक्षणत्वं सर्वव्यवहारोपपादकत्वं च संगच्छते। गुञ्जापुञ्जस्य वह्नित्वे आत्मनो गौरत्वे तमसो नीलत्वे च तादृग्बुद्धिविषयत्वस्य तवाप्यसंप्रतिपत्तेः, अन्यथा तेषामपि सत्त्वसिद्धिप्रसंगात्। अथ शब्दे निर्दुष्टया बुद्ध्या ब्रह्मणि सत्त्वासिद्धिवत्

PDF Compressor Free Version

प्रत्यक्षे निर्दुष्टया बुद्ध्या जगत्यपि पारमार्थिकसत्त्वसिद्धिरिति चेत्, न; ब्रह्मसत्त्वबुद्धिवत् जगत्सत्त्वबुद्धेरबाधितत्वाभावात्। यत्तु त्रिकालाबाध्यत्वलक्षणस्य सत्त्वस्यैव साधकत्वमिति तदपि बालभाषितम्, त्रिकालाबाध्यत्वस्यासर्वज्ञेन ज्ञातुमशक्यत्वात् । बुद्धिविषयत्वस्य तन्त्रत्वे वह्नित्वेनाज्ञातस्य वह्नेरदाहकत्वप्रसङ्गः, अमृतत्वेन ज्ञातस्य विषस्य संजीवकत्वापत्तिश्चेत्यपि नोहनीयम्, वह्नौ तादृशबुद्धिविषयत्वस्येश्वरादिसाधारणस्य सत्त्वात्, विषे संजीवकत्वप्रसङ्गस्य नभोनैल्यादितुल्यत्वात्। वस्तुतस्तु ब्रह्मज्ञानेतराबाध्यत्वं ज्ञाताज्ञातसाधारणं व्यावहारिकं सत्त्वमेव साधकत्वे तन्त्रम्। एतच्च अत्यन्ताबाध्ये ब्रह्मज्ञानबाध्ये च तुल्यत्वात् न मिथ्यात्वघटितम्, परमार्थसत्त्वस्य साधकतायामतन्त्रत्वेन तदभावेऽपि न साधकतानुपपत्तिः। एतेन अज्ञानसाधके साक्षिणि परमार्थसति तदभावात् व्यावहारिकत्वं साधकतायामतन्त्रम् इत्यप्यपास्तम्, ब्रह्मज्ञानेतराबाध्यत्वस्य तत्राप्यनपायात् पारमार्थिकव्यावृत्तव्यावहारिकत्वनिरुक्तावपि पारमार्थिकसाधारण्येन जनकताभ्युपगमेनादोषात्। वस्तुतोऽज्ञानस्य व्यावहारिकत्वेन तदुपहितस्य साक्षिणोऽपि व्यावहारिकस्यैव तत्साधकत्वम्, अनुपहितस्य पारमार्थिकस्य असाधकत्वात्। तथा च सर्वत्रैव व्यावहारिकसत्त्वस्यैव साधकतायां प्रयोजकत्वं परमार्थसति साधकत्वस्य काप्यसंप्रतिपत्तेः। न चानुमितिविषयसाध्यस्य परामर्शविषयहेतुना समानसत्ताकत्वनियमेन हेत्वादीनां व्यावहारिकत्वेन साध्यस्यापि व्यावहारिकसत्त्वमेवेति वाच्यम्, इष्टापत्तेः परमार्थसतश्च साध्यसाधनातीतत्वात्; धूलीपटले धूमभ्रमादपि वह्न्यनुमितिप्रमादर्शनात् नियमासिद्धेश्च। न चैवं मिथ्यात्वस्य मिथ्यात्वेन तत्त्वावेदकप्रमाणगम्यत्वविरोधः, मिथ्याभूतस्यापि प्रमाणगम्यत्वाविरोधात्, सतः सत्त्वेनेव मिथ्याभूतस्य

PDF Compressor Free Version

मिथ्यात्वेन प्रमाणवेद्यत्वोपपत्तेः, एकांशे तत्त्वावेदकत्वाभावेऽप्यपरस्मिन्नंशे तत्त्वावेदकत्वेनाप्युपपत्तेः । अत एव—व्यावहारिकं प्रामाण्यमप्रामाण्यं वेत्यविशेष एव, वर्णाश्रमाद्यभावश्चाद्वैतिमते—इत्युक्तिरपास्ता ; उक्तरीत्या सर्वविधिप्रतिषेधादिव्यवहारासांकर्यस्योपपत्तेः । लोकस्यापि व्यतिक्रमे विचारस्य यादृच्छिकबाधात् भ्रान्तत्वापत्तिरित्युदयनोक्तिरपि निरस्ता ; व्यावहारिकसत्त्वेन लोकमर्यादानतिक्रमात् । यदप्यत्र सत्त्वापेक्षया तुच्छविलक्षणत्वादेर्गुरुतरत्वेन साधकत्वे कथं प्रयोजकत्वमिति, तदप्यकिञ्चित्करम्, त्रिकालबाधविरहरूपस्य सत्त्वस्य लघुत्वाभावात्, जात्यादिरूपस्य सत्त्वस्य मिथ्यात्वाविरोधित्वात् । प्रतिबिम्बे बिम्बसाधकत्वं दृश्यत एव, प्रतिबिम्बस्य बिम्बात्मना सत्त्वेऽपि प्रतिबिम्बाकारेणासत्त्वात् ; परमार्थसत्त्वं न साधकत्वे प्रयोजकम्, व्यभिचारात् दर्शनमात्रस्यातिप्रसक्तत्वेन विषयापेक्षस्य स्वप्रदर्शनस्य भाविशुभाशुभसूचकत्वं दृश्यते । विषयश्च न तत्र तात्त्विकः । रेखातादात्म्येनारोपितानां वर्णानामर्थसाधकत्वमपि दृश्यते । यदपि रेखास्मारिता वर्णा एवार्थसाधका इति, तन्न ; आशैशवमयं ककारोऽयं गकार इत्यनुभवात्, अभेदेनैव स्मरणात् । विवेके सत्यपि दृढतरसंस्कारवशात् नारोपनिवृत्तिः । अत एव ककारं पठति लिखति चेति सार्वलौकिको व्यवहारः । वर्णारोपितदीर्घत्वह्रस्वत्वादीनां नगो नाग इत्यादावर्थविशेषप्रत्यायकत्वाच्च । न च वर्णेष्वनारोपितं ध्वनिसाहित्यं तदभिव्यक्तिरूपं वा दैर्घ्यादिकं प्रत्यायकम्, ध्वनीनामस्फुरणेऽपि दीर्घो वर्ण इति प्रत्ययात् । ननु आरोपितेन वर्णदैर्घ्यादिना कथं तात्त्विकार्थसिद्धिः ? न ह्यारोपितेन धूमेन तात्त्विकवह्निसिद्धिरिति चेत्, न ; साधकतावच्छेदकरूपवत्त्वमेव साधकतायाः प्रयोजकम्, न त्वारोपितत्वमनारोपितत्वं वा, धूमाभासस्य त्वसाधकत्वं साधकतावच्छेदकव्याप्त्यभावात् ।

PDF Compressor Free Version

यथा सत्यत्वाविशेषेऽपि चक्षुषा रूपमेव गृह्यते न रसः तथैवा-सत्त्वाविशेषेऽपि वर्णदैर्घ्यादिना सत्यं ज्ञाप्यते न धूमाभासादिना। स्वप्ने जागरे चोत्कृष्टकलधौतदर्शनात् उत्कृष्टं सुखम्, उत्कृष्ट-सर्पादिदर्शने चोत्कृष्टं भयादि दृश्यते। विषयस्याकारणत्वे तदुत्कर्षानुविधानं कार्ये न स्यात्; न ह्यकारणोत्कर्षः कार्यमनुविधत्त इति न्यायात्। न च ज्ञानप्रकर्षादेव तत्प्रकर्षः, ज्ञानेऽपि विषयप्रकर्षं विहायान्यस्य प्रकर्षस्याभावात्। न च ज्ञानगता जातिरेव तत्प्रकर्षः, चाक्षुषत्वादिना साङ्कर्यप्रसंगात्। विषयप्रकर्षेणैवोपपत्तौ चाक्षुषत्वादि व्याप्यनानाजात्यङ्गीकारे गौरवात् मानाभावाच्च। किं च, ज्ञानस्य भयादिजनकत्वे सर्पाद्यवच्छिन्नत्वमेवावच्छेदकमास्थेयम्, ज्ञानत्वेन जनकत्वेऽतिप्रसङ्गात्। तथा च मिथ्यावच्छिन्नत्वाकारेण ज्ञानस्य मिथ्यात्वात् भ्रमस्थले ज्ञानमात्रस्य जनकत्वेऽपि मिथ्याभूतस्य जनकत्वमागतमेव, जनकतावच्छेदकरूपेण च मिथ्यात्वे रूपान्तरेण सत्त्वमप्यसत्त्वान्नातिरिच्यते, अनुपयोगात्; स्वरूपे-णापि भ्रमज्ञानस्य मिथ्यात्वमेवेत्यन्यत्र विस्तरः। एतेन व्यव-हारस्याद्वैतिपरिभाषामात्रकल्पितत्वमित्यपि अपास्तम्, श्रुतिस्मृति-युक्तिसिद्धत्वात्। 'वाचारम्भणं विकारो नामधेयम्' 'अतोऽन्य-दार्तम्' 'एकमेवाद्वितीयम्' 'तस्मादिदं जगदशेषमसत्स्वरूपम्' इत्यादिवाक्येभ्यः द्वैताद्वैतयोः समानसत्तया एकत्रासंभवेन परमार्थतोऽद्वैतम्, व्यवहारतो द्वैतमिति सत्ताभेदेन सामञ्जस्यस्य वक्तुं युक्तत्वाच्च। न च विपरीतमेव किं न स्यादिति वाच्यम्, अद्वैते व्यवहारासंभवेन द्वैत एव तदुपपत्त्योक्तप्रकारस्यैव सुवच-त्वात्। किं च, श्रुतिरेव स्वभावतोऽद्वैतस्य कादाचित्कबहु-भवनमाह—'एकोऽहं बहु स्याम्' इति। 'अजायमानो बहुधा व्यजायत' इतीयमपि कार्यकारणयोर्द्वैताद्वैतयोः समानसत्ताक-

PDF Compressor Free Version

त्वेऽनुपपन्ना स्यात् । न हि जायमानत्वाजायमानत्वयोः एकत्र परमार्थतः सम्भवोऽस्ति । किं च परमार्थसत्यस्य परमात्मनो जीवजगदादिवैलक्षण्यानभ्युपगमे सर्वनियन्तृत्वं व्यापकत्वं निखिलकल्याणगुणगणास्पदत्वमपि न स्यात्, कस्मिंश्चिदंशे वैलक्षण्याभ्युपगतौ सत्यत्वांशेऽपि तदनभ्युपगमे कारणाभावात् । यथा वह्नितादात्म्यापन्नस्यायःपिण्डस्य अनित्यसातिशयदाहकत्वप्रकाशकत्वादयः वह्नौ तु नित्यनिरतिशयदाहकत्वादयः ; एवं परमतत्त्वेऽध्यस्तत्वेन मिथ्यातादात्म्यापन्नप्राणादिप्रपञ्चस्य अनित्यसातिशयसत्तास्फूर्तिमत्त्वेन सत्यत्वादिकम्, परमात्मनि तु नित्यनिरतिशयतद्वत्त्वं तद्रूपत्वं वा । अत एव यथा दग्धुरप्ययःपिण्डस्य दग्धा अग्निरित्युच्यते तथैव नित्यस्यापि प्रपञ्चस्य नित्यः परमात्मा, सत्यस्यापि प्रपञ्चस्य सत्यं परमात्मा, 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'प्राणा वै सत्यं तेषामेष सत्यम्' 'सत्यस्य सत्यम्' इत्यादिश्रुतिभ्यः ॥

यदपि—'यः पृथिव्यां तिष्ठन्' 'यः पृथिवीमन्तरो यमयति' 'यं पृथिवी न वेद' इत्युपक्रम्य पृथिव्याद्यभिमानिनो देवा महानुभावाः कथं स्वान्तर्गतं स्वनियामकं भगवन्तं न पश्यन्ति इति शङ्कायाम् 'एष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टाश्रुतः श्रोतामतो मन्ताविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाता' इति वाक्येन अन्तर्यामी दर्शनायोग्यः श्रवणमननविज्ञानाद्ययोग्य इति कथयित्वा अतो दर्शनायोग्यत्वात् अन्योऽन्तर्यामिणो द्रष्टा श्रोता मन्ता विज्ञाता नास्तीति पृथिव्याद्यभिमानिदेवताः स्वान्तर्यामिणं न पश्यन्ति न शृण्वन्ति न मन्वते न विजानन्ति इत्युक्तम् । तथा अक्षरस्य अतः दर्शनायोग्यत्वात्, अतः श्रवणायोग्यत्वात्, अन्यत् ब्रह्मणोऽक्षरात्

PDF Compressor Free Version

द्रष्टृ श्रोतृ मन्तृ विज्ञातृ नास्ति इति अक्षरद्रष्टृत्वमेव निषिध्यते न तु सामान्यतो द्रष्टृनिषेधः क्रियत इत्यर्थस्यापि सुसाधत्वेन नेदं वाक्यं द्रष्ट्रन्तरनिषेधद्वारा जीवब्रह्मणोरैक्य-साधकम्—इत्यादि बहु जल्पितम्, तदप्यनर्गलम्, उक्तोत्तरत्वेन पिष्टपेषणाच्च । श्रुत्यर्थस्तु—यः पृथिव्यां तिष्ठन् भवति सोऽन्त-र्यामी ; सर्वः पृथिव्यां तिष्ठतीति सर्वत्र प्रसङ्गो मा भूत् इति विशिनष्टि—पृथिव्या अन्तरः अभ्यन्तरः ; तत्रैतत् स्यात् पृथिवी-देवतैव अन्तर्यामीत्यत अह—यम् अन्तर्यामिणं पृथिवी न वेद । योऽप्सु तिष्ठन् योऽग्नौ य आदित्ये यः सर्वेषु भूतेषु यः प्राणे वर्तत इति ; यस्य पृथिवी शरीरम्, यस्य च पृथिव्येव शरीरं नान्यत् पृथिवीदेवताया यच्छरीरं तदेव शरीरं यस्य ; शरीरग्रहणं चोपलक्षणार्थम्, करणं च पृथिव्यास्तस्य ; स्व-कर्मप्रयुक्तं हि कार्यं करणं च पृथिवीदेवतायाः ; तदस्य स्वकर्मा-भावादन्तर्यामिणो नित्यमुक्तत्वात् परार्थकर्तव्यतास्वभावत्वात् परस्य यदेव कार्यं करणं च तदेवास्य, न स्वतः ; तदाह—यस्य पृथिवी शरीरम् ; देवताकार्यकरणस्य ईश्वरसाक्षिमात्रसान्निध्येन हि नियमेन प्रवृत्तिनिवृत्ती स्याताम् ; य ईदृगीश्वरो नाराय-णाख्यः पृथिवीं पृथिवीदेवतां यमयति नियमयति स्वव्यापारेऽ-न्तरोऽभ्यन्तरस्तिष्ठन्नेष त आत्मा ते तव मम च सर्वभूतानां चेति उपलक्षणार्थमेतत् ; अन्तर्यामी यस्त्वया पृष्टः, अमृतः सर्व-संसारधर्मवर्जित इत्येतत् । तथा चान्तर्यामिण एव सर्वेषामात्म-त्वोक्त्या क्व भेदावकाशः । बिम्बाधीनमेव यथा प्रतिबिम्बस्य स्थितिप्रवृत्तिमत्त्वम्, यथा वा सुवर्णाधीनमेव कुण्डलादीनाम्, अधिष्ठानाधीनमध्यस्तानां तथा परेशाधीनमेव अध्यात्माधिदैवादि-प्रपञ्चस्य स्थितिप्रवृत्तिमत्त्वेन नियन्तृत्वं परस्य, नियम्यत्वमितरस्य ।

PDF Compressor Free Version

एवं सत्यपि देवादीनां संभावितत्मत्वेन तेषु स्वात्मनि तिष्ठतो नियन्तुरन्तर्यामिणो विज्ञानाभावः कथं संभवेदिति बुद्धिर्भवेत् कस्यचित् तद्व्यावर्तनाय, अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता इति ; न दृष्टः न विषयीभूतः कस्यचिच्चक्षुर्दर्शनस्य, स्वयं तु चक्षुषि संनिहितो दृशिस्वरूप इति द्रष्टा । अयमभिप्रायः—यथा दग्धा वह्निर्दाह्यमेव काष्ठादि दग्धुं शक्नोति, न तु स्वप्रत्यगात्मानमपि तस्य तं प्रति कुण्ठितशक्तिकत्वात् । वह्नितादात्म्यापत्त्या लब्धदग्धृत्वशक्तेरयःपिण्डस्य वा यथा न वह्निदाहकत्वसंभवः, एवं प्रत्यगात्मनो मिथ्या तादात्म्यापन्नस्य तन्निबन्धनलब्धस्वविषयावभासनसामर्थ्यस्य चक्षुर्दर्शनस्य न सर्वान्तरप्रत्यगात्मावभासकत्वमित्यदृष्टत्वं युज्यत एव । स्वयं तु प्रज्ञया चक्षूंषि समारुह्य सर्वाणि रूपाणि अभिपश्यति चष्टे चक्षुः इत्याद्यनुरोधात् प्रज्ञया चक्षुः समारूढो रूपाणि पश्यन् द्रष्टा भवति । एवम् अमतो मन्ता इत्याद्यपि यथायथमूहनीयम् । तथा अविज्ञातः निश्चयगोचरतामनापन्नो रूपादिवत् सुखादिवद्वा । स्वयं त्वलुप्तविज्ञानशक्तित्वात् तत्सन्निधानाच्च विज्ञाता इत्यादिस्तदर्थः । तत्रापि 'यं पृथिवी न वेद' 'सर्वभूतानि न विदुः' इत्यादिना अन्ये नियम्या विज्ञातारः अन्यो नियन्ता अन्तर्यामी इति भेद एव, वेदितुरन्यस्याभावे 'न वेद' इति विशिष्य वेदितृत्वनिषेधोऽनुपपन्नः स्यात् इति तदन्यत्वाशङ्काव्यावृत्त्यर्थमाह—'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता' इति । नान्योऽतः—अस्मादन्तर्यामिणो नान्योऽस्ति द्रष्टा, तथा नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता —अर्थात् एकमेव तत्त्वमुपाधिभेदेन बहुधा व्यवस्थितम्, न हि वस्तुतो भेदः । तस्मात् यस्मात् परो नास्ति द्रष्टा श्रोता मन्ता विज्ञाता योऽदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता

PDF Compressor Free Version

अमृतः सर्वसंसारधर्मवर्जितः सर्वसंसारिणां कर्मफलविभागकर्ता एष त आत्मा अन्तर्याम्यमृतः । अस्मात् प्रत्यगभिन्नपरमात्मनोऽन्यदार्तम् इति स्वारस्येनाभेदपर्यवसाय्येवान्तर्यामिब्राह्मणम् । तात्पर्यविरोधात् श्रुतीनामस्वारस्याच्चान्यथापरिकल्पनं बलात्कार एव । नियम्यनियामकभावाधाराधेयभावादयश्च व्यावहारिकभेदेऽपि सूपपद्यन्त इति न तदर्थं तात्त्विकभेदः कल्पनीय इत्यसकृदुक्तमेतत् । एतेन—ब्रह्मणो दर्शनायोग्यत्वादिना ब्रह्मणो द्रष्टा श्रोता विज्ञाता नास्तीत्येव सिध्यति, न तु सामान्यतो द्रष्टैव नास्ति श्रोतैव नास्ति मन्तैव नास्ति विज्ञातैव नास्तीति ; अतो नेदं वाक्यं सामान्यतो द्रष्टृश्रोतृमन्तृविज्ञातृनिषेधबोधनद्वारा ब्रह्मान्यजीवस्य निषेधकम्, किन्तु नियम्यनियामकभावादिना साक्षाच्च जीवब्रह्मणोर्भेदस्यैव बोधकम्—इत्यपि पराहतं वेदितव्यम् ॥

अहं द्रष्टा श्रोता मन्ता विज्ञाता इति सर्वेषामनुभवः । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्याद्यनेकश्रुतिवाक्यानि च न परमार्थतो द्रष्ट्राद्यन्तरनिषेधप्रतिकूलानि घटकरकमल्लिकाद्युपाधिनिबन्धनमाकाशस्य भिन्नत्वमिव अन्तःकारणाद्युपाध्यनुविधायित्वेन परमार्थतोऽभिन्नस्यापि भिन्नत्वमित्युपपत्तेः । किं च 'अहं द्रष्टा' इति द्रष्टृत्वमेवानुभूयते । न तु भेदोऽपि, उक्तप्रतीतौ भेदस्याप्रथनात् । 'द्रष्टा द्रष्टा' इत्येव सर्वत्र उपलभ्यते । तथा च लक्षणभेदाभावादेकरूपेण उपलभ्यमानत्वादाकाशवत् व्यापकस्य भेदः केन साधयितुं शक्यते ? सुखदुःखादिप्रतीतिः क्वचिदुपलभ्यते क्वचिन्न ; द्रष्टुरेकत्वे सर्वत्रापि क्वचित् सत्त्वे तत्प्रतीत्यापत्तिरित्यपि नोहनीयम् । 'इच्छा द्वेषः सुखं दुःखम्' इति परमेश्वरोक्त्यनुरोधात् तस्य क्षेत्रधर्मत्वाभ्युपगमेन यस्मिन् क्षेत्रे सुखादिकं स्यात् तदवभासकेन विज्ञात्रा तत्रत्येनैव

PDF Compressor Free Version

तदुपलभ्यते। यथा यस्मिन् देशे काले घटादिः स्यात् तद्देशीयेन तत्कालिकेन सौरालोकेनैव स उपलभ्यते। सौरालोको यद्यपि सर्वत्राभिन्न एव, तथापि नान्यत्रत्येन स आलोकयत इति तद्वत्॥

"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भयं विदुषोऽमन्वानस्य। तदप्येष श्लोको भवति" इत्यादिवाक्यमपि भेदनिन्दया प्रत्यगभिन्ने परस्मिन्नेव पर्यवस्यति। तथा हि—यदर्थाः कार्यकरणप्राणनादिचेष्टाः तत्कृत एव चानन्दो लोकस्येत्यादिना प्राणनादिलिङ्गेन परस्यानन्दयितृत्वमुपपाद्य तस्यैव च विद्वदविदुषोर्भयाभयहेतुत्वेनापि तदीयं सत्त्वमुपपादयितुं तावदभयहेतुत्वमाह। सद्वस्त्वाश्रयणेन ह्यभयं भवति नासद्वस्त्वाश्रयणेन। यदा ह्येवैष साधक एतस्मिन् ब्रह्मणि द्रष्टव्यविकारवर्जितेऽविषयेऽशरीरे विकारात्मकशरीरवर्जितत्वेनानिरुक्ते अत एव आश्रयाश्रयिभावरहिते सर्वकार्यधर्मविलक्षणे अभयं यथा स्यात्तथा प्रतिष्ठामात्मभावेन स्थितिं लभते। तदा स तस्मिन्नात्मतत्त्वे भयहेतोरविद्याकृतस्य नानात्वस्याभावात् अभयं गतो भवति। अन्यस्य अन्यतो भयं भवति। दृश्यविवर्जितसजातीयादिसर्वभेदशून्यस्वरूपप्रतिष्ठः, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इत्याद्यनुरोधेन दृश्यदर्शनाद्यभावात् नान्यत् पश्यति, तस्मादात्मैवात्मनोऽभयकारणम्। भयत्राणे सत्येव ब्राह्मणाः सर्वतो निर्भया दृश्यन्ते। यदा तु एषोऽविद्यावान् अविद्याप्रत्युपस्थापितं वस्तु तैमिरिकद्वितीयचन्द्रवत् पश्यति आत्मनि चैतस्मिन् ब्रह्मणि। उत अरमल्पमपि अन्तरं छिद्रं भेददर्शनं हि कुरुते, अथ तस्मादेव अस्य भेददर्शिनो भयं भवति, तस्मादात्मैवात्मनो भयकारणमपि, तद्ब्रह्मैव च ईश्वरोऽन्यो मत्तोऽहमन्यः संसारी इत्येवं भेददर्शिनोऽ-

PDF Compressor Free Version

विदुषो भेददृष्टमल्पमप्यन्तरं कुर्वतो भयं भवति एकत्वेनामन्वानस्येति सुस्पष्टमस्य वाक्यस्याद्वैत एव पर्यवसानम् । एतेन, अस्य वाक्यस्य स्वगतभेदनिषेधपरत्वेन जीवादिप्रतियोगिकभेदनिषेधपरत्वाभावोक्तिरपि पराहता । तथा हि—ब्रह्मणि भेदो नास्तीति प्रतीतिः वायौ रूपं नास्तीति प्रतीतिवत् यावद्विशेषाभावान्यसामान्याभावविषया सामान्यावच्छिन्नयावद्विशेषाभावविषया वा अभ्युपगन्तव्या, यत्किञ्चिद्भेदसत्त्वेऽपि सामान्यावच्छिन्नप्रतियोगिताकत्वं निषेधस्य नोपपद्यते । अभावज्ञाने प्रतियोग्यंशे प्रकारीभूतधर्मस्यैव प्रतियोगितावच्छेदकत्वात् । एवं यावद्विशेषाभावान्यसामान्याभावानभ्युपगमेऽपि यत्किञ्चिद्विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वे घटवत्यपि भूतले निर्घटं भूतलमिति प्रतीतिः स्यात् । वायौ रूपं नास्ति, पुरोवर्तिनि रजतं नास्ति इत्याप्तवाक्यजन्यप्रतीतावपि तत्तत्संशयनिवृत्तिर्न स्यात् । एकविशेषाभावबोधनेऽपि भावान्तरमादाय संशयोपपत्तेः । अतः सजातीयविजातीयस्वगतसर्वभेदनिषेध एव वाक्यतात्पर्यमिति मन्तव्यम् । एवम् 'निर्गुणं निष्क्रियम्' इत्यादावपि प्राकृतगुणक्रियादिराहित्यमभिप्रेतम् । न त्वप्राकृतस्वाभाविकानवधिकानन्तकल्याणगुणगणराहित्यमपि इत्यादिरपि निराकरणीयः; सगुणश्रुतीनामुपासनाशेषगुणादिपरत्वेन कृतसमाधानत्वाच्च । किञ्च, अन्तरमित्यस्य उदरम्, अल्पमपीति विशेषणमस्वरसमेव स्यात्, स्वगतभेदस्यैव निषेधाभ्युपगमे अन्तरमित्यनेनैव सिद्धेः । यदपि—दृश्यनिरुक्तनिलयनादिभेदस्य ब्रह्मणि निरुच्यमानत्वेन वस्तुभेदानां च ज्ञातृज्ञेयप्राप्यप्राप्तृभावादिना च भेदस्य बोधनात् 'एतस्मिन्नुदरमन्तरं कुरुते' इति वाक्यं न सामान्यतः सर्वभेदनिषेधकमिति वक्तुं शक्यते—इति, तदसत्; उक्तभेदानां मिथ्याप्रतियोगिकत्वेन मिथ्यात्वात् प्रति-

PDF Compressor Free Version

योगिसमानसत्ताकस्य भेदस्य तत्त्वज्ञानापनोद्यप्रतियोगिकत्वेनानुपपन्नत्वाच्च । किञ्च 'एकमेवाद्वितीयम्' इति श्रुतेश्च

'अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥'

इति भगवद्वचनाच्च । जातु कदाचित् कवयः क्रान्तदर्शिनः मनागपि छिद्रं भेदं न पश्यन्ति कथंचित् कदाचित् किञ्चिदपि भेदं न पश्यन्ति इत्यर्थः ॥

'सत्यं ज्ञानमनन्तं ब्रह्म' इति सत्यपदस्य, असत्यात् व्यावृत्तम्, ज्ञानपदस्य, अज्ञानात् व्यावृत्तमित्यद्वैतिभिरप्यङ्गीकृता बहवो भेदाः 'न सत्तन्नासदुच्यते' 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्' इत्यादिश्रुतिसिद्धा भेदाः सन्त्येवेति कथमिदं वाक्यं सामान्यतो भेदनिषेधकमित्यपि चर्वितचर्वणम्, दत्तोत्तरत्वात् ॥

एवं 'द्वितीयाद्वै भयं भवति' इतीयमपि श्रुतिः द्वितीयवस्तुनो भयजनकत्वं बोधयन्ती द्वितीयवस्त्वभावं बोधयति । तथा हि—तत्त्वज्ञानतुश्रूषया कर्मकाण्डविहितज्ञानकर्मफलस्य प्राजापत्यलक्षणस्य संसारविषयानतिक्रमणं प्रदर्शयिष्यन्नाह—'सोऽबिभेत्तस्मादेकाकी बिभेति' इत्यादि । सः विपरीतदर्शनवान्, अबिभेत् भीतवान्, अस्मदादिवत् इति भयहेतुविपरीतदर्शनापनोदनकारणं यथाभूतात्मदर्शनमाह—स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय । कस्माद्ध्यभेष्यत् द्वितीयाद्वै भयं भवति—इति । सोऽयं प्रजापतिरीक्षाञ्चक्रे यदि मत्तोऽन्यत् स्वात्मव्यतिरेकेण प्रतिद्वन्द्वीभूतं वस्त्वन्तरं नास्त्येव तत आत्मविनाशहेत्वभावे कस्मान्नु बिभेमि, तत एव यथा-

PDF Compressor Free Version

भूतात्मदर्शनात् प्रजापतेरस्य भयं वीयाय विस्पष्टमपगतवत् । भयं केवलाविद्यानिमित्तमेव परमार्थदर्शने नोपपद्यत इत्याह—कस्माद्धि किमित्यसौ भीतवान् ? परमार्थनिरूपणायां सकारणस्य प्रपञ्चस्यैवाभावात् यस्माद्द्वितीयाद्वस्त्वन्तराद्वै भयं भवति, द्वितीयं च वस्त्वन्तरमविद्याप्रत्युपस्थापितमेव । न ह्यनुपस्थितं भयहेतुतां प्रतिपद्यते । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति श्रुतेः । यदपि—'व्याघ्राद्भयं भवति, सर्पाद्भयं भवति' इत्युक्तौ यथा सर्पादीनां भयजनकत्वमेव सिध्यति, न तु सर्पाभावो व्याघ्राभावो वा ; तथा 'द्वितीयाद्वै भयं भवति' इत्युक्तेः द्वितीयवस्तुनो भयजनकत्वमेव बोध्यते, न तु द्वितीयवस्त्वभावः—इति, तदपि बालभाषितम् ; यन्मदन्यन्नास्ति कस्मान्नु बिभेमि इति द्वितीयवस्त्वभावोक्त्या भयहेतोरभावादेव आत्यन्तिकभयनिवृत्तेरभिप्रेतत्वात् सति द्वितीये वस्तुनि भयहेतुस्वरूपयोग्यतया कदाचिदवश्यं विरोधः स्यादेव ॥

एतेन 'प्रतिद्वन्द्वीभूतम्' इति भाष्यात् विरोधिद्वितीयवस्तुन एवाभावोऽभिप्रेत इत्यप्यपास्तम् । द्वितीये प्रतिद्वन्द्वित्वस्यावश्यंभावात् अनित्ये दावदग्धेऽरण्यस्थदण्डादौ फलोपधायककारणताया अभावेऽपि वस्तुसति नित्ये तदनुपपत्तेः ॥

यदपि 'स वै नैव रेमे, तस्मादेकाकी न रमते, स द्वितीयमैच्छत्' इत्युत्तरवाक्ये एकाकिनः सुखाभावे द्वितीयमैच्छत् इति द्वितीयवस्तुनः सुखहेतुत्वोक्त्या 'एकाकी न रमते' एकाकिनः सुखाभावो लोकसिद्ध इत्येकाकिनः सुखाभावे लोकनिदर्शनोक्त्या नैव द्वितीयवस्तुसामान्यस्य भयहेतुत्वम्, तस्मात् प्रतिद्वन्द्वीभूतस्यैव तथात्वमिति, तदपि तात्पर्यानभिज्ञानविजृम्भितम्, 'तदेतत्पदनीयमस्य तदेतत्प्रेयः पुत्रात्' इत्यादिना वक्ष्यमाणात्माधिगतेस्तुष्टूषया संसारविषयाल् साध्यसाधनादिभेदलक्षणात् विरक्तस्यैव

PDF Compressor Free Version

आत्मैकत्वज्ञानविषयेऽधिकारः, तृषितस्यैव पान इवेत्येतस्य चार्थस्य विवक्षया वैराग्यसिद्ध्यर्थमतिक्रान्तजन्मनि सम्यक्कर्मज्ञानभावनानुष्ठानैः समुपलब्धप्राजापत्यस्थानस्यापि प्रजापतेः 'सोऽबिभेत्' 'न रेमे' 'द्वितीयमैच्छत्' इति भयारतितृष्णादिसंसारानर्थस्य अनिवृत्तिः। तस्मात्, 'तद्धैतल्लोकजिदेव' तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति श्रुत्यनुरोधात् भयारत्यादियुक्तत्वात् कार्यकारणलक्षणत्वाच्च सर्वमेतत् ज्ञानकर्मफलं संसार एवेति ततो विरज्य स्वात्मैव द्रष्टव्य इत्यत्र तात्पर्यादिति प्रजापतेरपि अविवेकित्वेनैव द्वितीयवस्तुनः सुखहेतुत्वभ्रमेण द्वितीयवस्त्विच्छासद्भावमात्रेण द्वितीयवस्तुनो न सुखहेतुत्वं किं तु दुःखहेतुत्वमेव । लोकेऽपि विषयाभिनिविष्टचेतसोऽविवेकिन एव स्त्र्यादिविषयाभिलाषिण इष्टार्थसंयोगजा क्रीडा रतिः, इष्टवियोगान्मनस्याकुलीभावोऽरतिः, ते उभे अपि तेषामेव भवतः, न निर्विण्णचेतसो विवेकिनो वीतरागभयक्रोधस्य । तस्य तु 'एकाकी यतचित्तात्मा' असहाय आत्मरतिः आत्मक्रीड इति सर्वसङ्गविवर्जितत्वेनात्मन्येव तृप्तत्वेनान्यानपेक्षत्वात् । न च 'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः' इति भाष्योदाहृतप्रमाणेन चतुर्मुखस्य ज्ञानित्वोक्त्या अविवेकित्वमनुपपन्नमिति वाच्यम्, भयारतितृष्णादीनां तत्त्वदृशोऽसंभवेन तस्य विवेकित्वानुपपत्तेः। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति श्रुतेः। प्रजापतेः परमेश्वरत्वे 'सर्वान् पाप्मन औषत्' 'मर्त्यः सन्नमृतानसृजत्' 'हिरण्यगर्भं पश्यत जायमानम्' इत्यादिवाक्यैः पाप्मवत्त्वमर्त्यत्वजायमानत्वानि नोपपद्यन्ते, परस्मिंस्तेषामप्रसङ्गात्॥

ननु तर्हि 'ज्ञानमप्रतिघं यस्य' 'एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवाः' 'एतमेके वदन्त्यग्निम्' इत्यादिश्रुतिस्मृति-

PDF Compressor Free Version

वाक्यानां का गतिरिति चेत्, शृणु; उपाधिविशेषसम्बधात् संसारित्वं स्वतश्चासंसारित्वमेकस्याप्युपपद्यते, 'कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति' इत्यादिश्रुतेः । एवं चोपाधिशुद्ध्यतिशयाद्यपेक्षया प्रायशः परत्वं हिरण्यगर्भादीनामिति श्रुतिस्मृतिवादाः प्रवृत्ताः; संसारित्वं तु कचिदेव दर्शयन्ति । जीवानामुपाधिगताशुद्धिबाहुल्यात् संसारित्वमेव प्रायशोऽभिलप्यते । अत एव हिरण्यगर्भादीनाम्—'उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः' इति सात्त्विकोपाधिसम्बध उच्यते । व्यावृत्तकृत्स्नोपाधिभेदापेक्षया तु सर्व एव परत्वेनाभिधीयत इत्यपि भाष्यकृद्भिरेवोक्तत्वात् । तस्यैव च प्रजापतेरतिक्रान्तजन्मावस्थस्य एकत्वदर्शनं जन्मान्तरसंस्कारहेतुकं प्रतिबद्धत्वेनाविद्याकारणं नापनिन्ये । प्रतिबन्धे चापगतेऽभिव्यक्तं तदुन्मूलकं भवति । अत एव च पूर्वमविद्यावत्त्वेन भयारतितृष्णापाप्मादिसंसर्गित्वम्, प्रतिबन्धापगमे तु 'ज्ञानमप्रतिघम्' इत्यादिज्ञानैश्वर्यादिमत्त्वं च सूपपद्यते ॥

यत्तु—विचारेण द्वितीयवस्त्वभावासिद्धिः, 'तम आसीत्' 'नैवेह किञ्चनाग्र आसीत्' 'मृत्युनैवेदमावृतमासीत्' 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' 'असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्' इत्यादिश्रुतिस्मृतिसूत्रैः प्रलयकालेऽपि जगतः सत्त्वकथनेन द्वितीयवस्तुसामान्याभावकथनासंगतेः ।

'जीव ईशो विशुद्धा चित् विभागश्च तयोर्द्वयोः ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥'

इत्यद्वैतिभिरपि अनादिषट्कस्य अभ्युपगमाच्च—इति, तदसत्, व्यावहारिकभेदपरत्वेनोक्तवाक्यानां प्रामाण्यस्य उक्तत्वात्, व्यावहारिकसत्यत्वस्य बौद्धस्वीकृतसांवृतिकनिःस्वभावसत्त्वविलक्षणतया

PDF Compressor Free Version

बहुधा समर्थितत्वेन तदनुपपत्तेः अभावाच्च । अनर्गलप्रलापस्तु दार्शनिकविचारबहिर्भूतत्वेनोपेक्ष्यते ॥

एतेन, द्वितीयवस्तुनो भयजनकत्वेनैव द्वितीयवस्त्वभावासिद्धिः, सर्पस्य भयजनकत्वेऽपि सर्पाभावासिद्धिवदित्यप्यपास्तम्, रज्जुसर्पादीनामिव भयहेतुत्वेऽपि द्वितीयस्य मिथ्यात्वोपपत्तेः ; ब्रह्मातिरिक्तस्य तात्त्विकसत्त्वानिरुक्त्या व्यावहारिकत्वस्योक्तत्वाच्च । न चारोप्यस्य पारमार्थिकस्य क्वचिद् दृष्टत्वेनैवान्यत्रारोपसंभव इति वाच्यम्, दृष्टत्वस्यैव तत्प्रयोजकत्वसंभवे पारमार्थिकत्वस्याप्रयोजकत्वात्, गौरवाच्च, मायाविनिर्मितमायामयवस्तुदर्शनेनापि तस्यान्यत्रारोपो दृश्यत इति तत्र व्यभिचाराच्च । द्वितीयवस्तुनश्च सुखजनकत्वमविद्याकामकर्मवतामेव ; तद्विरहिणां त्वात्मरतित्वमित्यवोचाम । एवं च विपश्चिद्वर्यभट्टाचार्यशुक्लचिन्नस्वामिप्रभृतिसमुपवर्णितानि 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म' 'प्रज्ञानं ब्रह्म' 'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्म तं परादात्' 'सर्वं तं परादात्' 'द्वितीयाद्वै भयं भवति' 'उदरमन्तरं कुरुते । अथ तस्य भयं भवति' इत्यादीनि वाक्यानि निर्विशेषाद्वैतबोधकान्येव, साक्षात् पारम्पर्येण च त्वत्प्रक्षिप्तदुस्तर्ककलङ्कपङ्कस्य सुसंमार्जनात् । 'आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति' इत्यनेनाद्वैतस्य निन्द्यत्वोक्तिस्तु मनोरथमात्रम्, 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते' इति पूर्वार्धोपेतस्य वाक्यस्य तात्पर्यानभिज्ञानात् । 'मृत्तिकेत्येव सत्यम्' 'ब्रह्मैवेदम्' 'आत्मैवेदम्' 'नेह नानास्ति किञ्चन' 'मृत्योः स मृत्युमाप्नोति' इत्यादिश्रुतयोऽपि नामरूपक्रियात्मकस्य निखिलप्रपञ्चस्य ब्रह्मविवर्तत्वबोधनद्वारा प्रत्यस्तमिताशेषविशेषे ब्रह्मण्येव पर्यवस्यन्ति । ननु उक्तश्रुतिषु विवर्तत्वबोधकपदाभावात् सत्यमिति

PDF Compressor Free Version

विपरीतबोधकपदस्य सत्त्वाच्च विवर्तत्वाभाव एवेति चेत्, नैवम्; विवर्तत्वबोधकपदाभावेऽपि 'यत्परः शब्दः स शब्दार्थः' इति न्यायात् एकत्वबहुत्वयोरजत्वजायमानत्वयोश्चैकत्रानुपपत्त्या विवर्तत्वे पर्यवसानस्योक्तत्वात्। सत्यमिति पदसंनिधानमात्रेण मृत्तिकादीनां सत्यत्वसमर्थनं तु नूनं मीमांसावृत्तान्तानभिज्ञतां सूचयति। 'वाचारम्भणं विकारो नामधेयम्' इति विकारस्य मिथ्यात्वोक्त्या तदपेक्षया कारणस्य सत्यत्वावधारणेन वियदादिप्रपञ्चस्यैव विकारत्वेन मिथ्यात्वान्निरपेक्षसत्यत्वस्य परमात्मन्येव पर्यवसानमित्यत्र तात्पर्यात्। भेदाभेदयोः सत्ताभेदेन सामञ्जस्यस्योक्तत्वात्। एतेन, 'ब्रह्मैवेदं सर्वम्' इत्यत्र सर्वपदस्य सर्वान्तर्यामिणि लक्षणामङ्गीकृत्य सर्वान्तर्यामि ब्रह्मेत्यर्थ इति यदुक्तम्, तदपि निरस्तम्; लक्षणायां मानाभावादेव, भेदनिन्दाविरोधाच्चेत्युक्तमेव। किञ्च, लक्षणाभ्युपगमेऽपि स्वतःसिद्धमेव सर्वान्तर्यामिणो ब्रह्मत्वं निष्फलमेव। प्रपञ्चस्य तत्त्वे तु निष्प्रपञ्चत्वमेव सिध्यति ब्रह्मणः, तच्च सर्वानर्थनिबर्हणमिति। ननु सर्वकामशब्दस्य कर्मधारयरूपत्वे जडाजडयोः स्वतन्त्रपरतन्त्रयोः कामब्रह्मणोरभेदान्वयानुपपत्त्या तात्पर्यानुपपत्त्या च बहुव्रीहिरूप एवायं शब्दः—सर्वे कामा यस्येति, तथा 'कामोऽस्मि भरतर्षभ' इति गीतास्थकामशब्दोऽपि अन्वयाद्यनुपपत्त्या कामस्वामिनि लाक्षणिको यथा तथा अन्यत्रापि अन्वयानुपपत्त्या स्वामित्वरूपशक्यसम्बन्धस्य च सत्त्वेन तथात्वमिति चेत्, न; सर्वकाम इत्यत्र बहुव्रीहिसमाश्रयणं तात्पर्यस्यानुसारि इति बालस्याप्यतिरोहितम्; सर्वकामपदस्य कात्स्न्र्यमात्रवाचकत्वेऽभिप्रेते कर्मधारयोऽपि संभवत्येव, ब्रह्मपरत्वे च निखिलकल्याणगुणगणास्पदत्वविवक्षया। अन्यथा निखिलकल्याणगुणगणास्पदत्वविवक्षानुपपत्तेः। अत एव च भाष्यकृता

PDF Compressor Free Version

बहुव्रीहिसमाश्रयणम्, तदनभिप्राये तु कर्मधारयोऽपि युज्यत एव। 'इदं सर्वं यदयमात्मा' इत्यादौ तु 'योऽयं स्थाणुः स पुरुषः' इत्यत्र बाधसामानाधिकरण्येन विपर्यस्तप्रतिपन्नस्थाणोः पुरुषत्ववत् अज्ञदृष्टिसिद्धस्य सर्वस्य ब्रह्मत्वोपपत्त्या तदन्तर्याम्याद्यर्थकल्पनानुपपत्तेः। 'कामोऽस्मि' इत्यस्यापि मृद्घट इतिवत् उपादानोपादेयत्वेनैवोपपत्तिः। ननु सर्वस्यापि परमात्मोपादेयत्वेन परत्वापत्तिरिति चेत्, इष्टापत्तिः। अत एव 'सर्वं खल्विदं ब्रह्म' 'वासुदेवः सर्वम्' इत्यादिश्रुतिस्मृतिवादाः। न च तथापि विशिष्याभिधानानुपपत्तिरिति वाच्यम्, पार्थिवत्वाविशेषेऽपि लोष्टहीरकादिवत् विशुद्धितारतम्यात् उपास्यत्वाय तदभिधानोपपत्तेः। 'विश्वं सत्यम्' इत्यादिनापि न त्रिकालाबाध्यत्वं विश्वस्य, परमार्थसत्यातिरिक्तस्याप्यर्थक्रियाकारित्वदर्शनात् व्यावहारिकसत्यतामादायापि उपपादयितुं शक्यत्वात्॥

एतेन 'यच्चिकेत सत्यमित्तन्न मोघम्' 'याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः' 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्' 'नाभाव उपलब्धेः' 'वैधर्म्याच्च न स्वप्नादिवत्' इत्यादिश्रुतिस्मृतिसूत्राणि च व्यावहारिकसत्यत्वपरतया व्याख्यातव्यानि॥

'विश्वं सत्यं मघवाना युवोरिदापश्च न प्रमिणन्ति व्रतं वाम्।
अच्छेन्द्राब्रह्मणस्पती हविर्नो अन्नं युजेव वाजिना जिगातम्॥'

इति ऋक्संहिताद्वितीयाष्टकवाक्यस्य अयमर्थः अद्वैतासिद्धिकृता उच्यते—हे इन्द्राब्रह्मणस्पती! मघवाना मघवानौ मघमिति धननाम धनवन्तौ मघवन्तौ वा, विश्वं सर्वम्, सत्यं कर्म युवयोः, इत् सद्भूतत्वात् फलस्यावश्यंभावित्वाद्वा तादृशं कर्म, युवयोः, इत् इत्थम्, अवधारणे वा, युवामेवोद्दिश्य सर्वाणि कर्माणि अनुष्ठेयानीत्यर्थः। आपो व्यापनशीला देवताः, च नेत्येतत्पदद्वय-

PDF Compressor Free Version

समुदायः । ऐकपद्यं त्वध्यापकसम्प्रदायसिद्धम्, वां युवयोः, व्रतं सङ्कल्पं कर्म वा, न प्रमिणन्ति न हिंसन्ति, मीङ् हिंसायाम्, क्रैयादिकः, किं त्वनुमोदन्त इत्यर्थः । नोऽस्माकम्, हविर्दध्यादिकम्, अन्नं च पुरोडाशादिकम्, अच्छ अभिलक्ष्य वाजिनौ जववन्तावश्वाविव, युजा युक्तौ सन्तौ, जिगातं देवयजनमागच्छतम्, अन्नं घासं प्रति अश्वाविवेति वा । यद्वा, हे इन्द्राब्रह्मणस्पती ! विश्वं सत्त्वेन परिदृश्यमानं जगत्, युवयोरित् युवयोरेव युवाभ्यामेव सृष्टम्, अथवा युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थं यद्यद्गुणजातं स्तुत्या प्रतिपाद्यते तत्सर्वं युवयोर्विद्यमानमेव न त्वारोपितम् (शुक्तिरूप्यादिवत्, किं तु व्यावहारिकं सत्) । आपो देवताः, अबुपलक्षितानि पञ्च भूतानि वा, युवयोर्व्रतं जगदुत्पादनाख्यं कर्म, न हिंसन्ति । इत्थं महानुभावौ युवां जिगातम्—इत्यादि । तथा च न कथमप्यस्य मन्त्रस्य विश्वसत्यत्वे तात्पर्यम् । एतेन—'आपश्चन प्रमिणन्ति व्रतं वाम्' इति जलदेवताप्रमितत्वकथनेन, ब्रह्मविवर्तत्वस्य आरोपितापरपर्यायव्यावहारिकत्वस्य निषेधः—इत्यप्यपास्तम् । उक्तविधया न प्रमिणन्ति न हिंसन्ति इत्यर्थस्यैव युक्तत्वात्, व्रतस्य प्रमितत्वापेक्षया अखण्डितत्वस्यैव स्तुत्यत्वात्, त्वत्पक्षे च नेत्यस्य निरर्थकत्वापत्तेश्च । 'तुष्यतु' इति न्यायेन जलदेवताप्रमितत्वमित्यर्थाभ्युपगमेऽपि न कश्चिद्दोषः । व्यवहारकालाबाधितानधिगतार्थत्वेनापि प्रमितत्वोपपत्तेः, अनधिगताबाधितार्थविषयज्ञानत्वस्यैव प्रमात्वात् प्रपञ्चस्य परमार्थतो बाध्यत्वेऽपि व्यवहारकालेऽबाध्यत्वात् । अनारोपितमित्यस्मदाचार्यव्याख्यानमपि शुक्तिरूप्यादिप्रातिभासिकविलक्षणाकाशादिवत् व्यावहारिकसत्तापरमेव । अपि च त्वदुक्तदिशा 'सर्वं यदयमात्मा' इत्यादौ सर्वस्यान्तर्यामि-

PDF Compressor Free Version

णैवाभेद इत्यप्यभ्युपगमे निर्विशेषाद्वैत एव पर्यवसानम् ; परस्य कारणात्मनैव स्वकार्यनियन्तृत्वाभ्युपगमात् तन्तूनां पटनियन्तृत्ववत् शुक्तिकाया रजतनियन्तृत्ववत् बिम्बस्य प्रतिबिम्बनियन्तृत्ववत् तदधीनस्थितिप्रवृत्तिमत्त्वादित्यवोचाम । कार्यकारणयोरनन्यत्वस्य तदनन्यत्वमिति बहुधा प्रतिपादितत्वात् । 'यच्चिकेत सत्यमित्तन्न' इत्यस्यापि स इन्द्र इदमिदानीं कर्तव्यमिति यच्चिकेत जानाति, तत्सत्यमित् सत्यमेव, न मोघं व्यर्थम् । एवम् "याथातथ्यतोऽर्थान् व्यदधात्' इत्यस्यापि न प्रपञ्चसत्यत्वे प्रामाण्यम्, किन्तु तस्य पूर्वसृष्टप्रकारेण सर्जनमर्थः, न तु जगत्सत्यत्वम्, जगत्सर्जनगतसत्यत्वं वा ; 'असत्यमप्रतिष्ठम्' इति स्मृतेरपि अद्वैतिनो न विषयाः, असत्यवैलक्षण्यस्य जगति तैरभ्युपगमात् । 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्' इत्यत्र ह्यसत्यशब्दस्थनञोऽभावबोधकत्वेन निःस्वभावस्यासतोऽवद्योतकत्वम् । असत्येन वेदान्तवाक्येन" इति भाष्यस्थस्यासत्यशब्दस्य तु नञः स्वसंबन्धिभिन्नत्वसादृश्यादिपरत्वेनानिर्वाच्यभाववस्तुबोधकत्वम् । असत्यमित्यल्पसत्यमित्यर्थः ॥

'तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधिता ।
अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः ॥'
'द्वौ नञौ च समाख्यातौ पर्युदासप्रसज्यकौ ।'

इत्याद्यभियुक्तोक्त्या नञो बह्वर्थत्वं प्रसिद्धम् । अब्राह्मणः, अधर्मः, अनुदरा कन्या इत्यादिप्रयोगेषु चानेकार्थत्वं नञो दृश्यते । ननु उभयत्र असत्यमिति पदस्याविशेष्ये कुतो गीतास्थस्यासत्त्वबोधकत्वं भाष्यस्थस्य च आनिर्वाच्यबोधकत्वमिति चेत्, शृणु ; 'अनीश्वरमप्रतिष्ठम्' इति विशेषणद्वयस्यानिर्वाच्यवस्तुपरत्वेऽसत्यशब्दस्यानुपपत्तिः स्यात् । वेदान्तिनयेऽनवच्छिन्न-

PDF Compressor Free Version

चिदात्मकस्य बिम्बात्मकस्य वेश्वरस्याभ्युपगमात् । 'नारायणः परोऽव्यक्तात्' इत्यादिभाष्यकारीयवचनशतैः समर्थितं चैतत् विपश्चिद्भिश्चिन्नस्वाम्यादिभिः। निरधिष्ठानभ्रमानुपपत्त्या चिन्मात्राधिष्ठानप्रतिष्ठितत्वमपि प्रपञ्चस्य समर्थितं सूरिभिः । तस्मादुक्तविशेषणद्वयस्यानिर्वचनीयार्थतायामनुपपत्त्या गीतास्थस्यासत्यशब्दस्य शून्यवादिसम्मतसर्वशून्यपरत्वमेवेति मन्तव्यं तत्रैव विशेषणद्वयस्य सामञ्जस्यात् । अद्वैतिप्रयुक्तासत्यशब्दस्य च पूर्वोक्तविधया अनिर्वचनीयतापरत्वमेव । असत्यं परमार्थसदपेक्षया न्यूनसत्ताकमित्यर्थः । अबाध्यत्वं सत्यत्वम्—त्रिकालाबाध्यत्वं परमार्थसत्यत्वम्, व्यवहारकालाबाध्यत्वं व्यावहारिकसत्यत्वम्, प्रतिभासकालमात्राबाध्यत्वं प्रातिभासिकसत्यत्वमिति सत्यत्वविवेकः। अत एव श्रीमद्भागवतेऽपि प्रपञ्चविषयोऽसत्पदप्रयोगः

'तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ।'

इति । तथा चानवद्यमेव तत् । यच्च शून्यवादिनां शून्यस्यैव प्रतिष्ठात्वमवधित्वमिति तदसत्, शून्यस्याधिष्ठानत्वे कल्पनायामधिष्ठानसामान्यस्यानुगतत्वेन 'अयं सर्पः' 'इयं धारा' 'इदं भूच्छिद्रम्' इत्यादौ इदमंशस्येव शून्यस्य 'शून्यो घटः' इति भानापत्तेः । न चेह शून्यानुवेधो दृश्यते, अपि तु 'सन् घटः' 'सन् पटः' इति सत एवानुवेधो दृश्यते । एवं सत्तातद्योगित्वयोः शून्येऽसंभवदुक्तिकत्वेन शून्यस्य सत्यत्वोक्तिरपि शून्यवादानभिज्ञतामेव सूचयति सद्रूपत्वे सत्तायोगित्वे च शून्यत्वव्याहतेः ।

'शून्यमासीदिति ब्रूषे सद्योगं वा सदात्मकम् ।
शून्यस्य न तु तद्युक्तमुभयं व्याहतत्वतः ॥' इति ।

PDF Compressor Free Version

अन्यच्च पूर्वमेवोक्तमित्युपरम्यते ॥

एतेन, अधिष्ठानत्वस्य मिथ्यात्वेनाद्वैतिमत एव निरधिष्ठानत्वं कल्पनाया इत्यप्यपास्तम्, मिथ्याधिष्ठेयनिरूपितस्याधिष्ठानत्वस्य मिथ्यात्वेऽपि सदात्मकस्य त्रिकालाबाध्यत्वात्; मिथ्याप्रतिबिम्बापेक्षया गगनस्थरवेर्बिम्बत्वस्य कल्पितत्वेऽपि शुद्धस्य बिम्बत्वानाक्रान्तस्य रवेस्तथात्ववत् इत्यप्युक्तमेव ॥

यदपि—अत्रैव सत्त्वासत्त्वयोः परस्परविरहरूपत्वेन सत्त्वविरहेऽसत्त्वस्यैव परस्परविरुद्धयोः अन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वमिति न्यायप्राप्तत्वेन पुनरसत्त्वविरहोक्तेर्व्याहतिदुष्टत्वात् सद्विविक्तवादिनोऽसद्विलक्षणत्वोक्तिरसङ्गतैव—इति तदप्यविचारितरमणीयम्, अनभ्युपगमात्। सत्त्वासत्त्वयोः परस्परविरहरूपत्वं नाभ्युपगम्यते, अपि तु क्वचिदुपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वमसत्त्वं न त्रिकालाबाध्यत्वरूपसत्त्वविरहरूपम्। तथा च सद्विविक्तस्यापि असद्विलक्षणत्वं संभवत्येव। तस्यैव च त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वस्याद्वैतिभिर्मिथ्यात्वरूपत्वाभ्युपगमात्। 'नाभाव उपलब्धेः' 'वैधर्म्याच्च न स्वप्नादिवत्' इत्यपि न पारमार्थिकत्वसाधनम्। विमतं सदादिकोटिचतुष्टयविनिर्मुक्तम्, तर्कपीड्यत्वात्, मरीच्युदकवत्, इति ब्रह्मसाधारण्येन निस्तत्त्वतायां प्राप्तायां सतो ब्रह्मणो नाभावः न शून्यत्वम्, उपलब्धेः सत्त्वेन प्रमाणात् प्रतीतेः। तथा च किञ्चित्परमार्थसदवश्यं शून्यवादिनापि मन्तव्यम्, अन्यथा बाधस्य निरवधिकत्वप्रसंग इति सूत्रार्थस्य मिथ्यात्वाविरोधित्वात्। तदुक्तम्—

'बाधितोऽपह्नवो मानैर्व्यावहारिकमानता।
मानानां तात्त्विकं किञ्चिद्वस्त्वनाश्रित्य दुर्भणा ॥' इति।

PDF Compressor Free Version

अत एव, विमता धीः न ज्ञानव्यतिरिक्तालम्बना, धीत्वात्, स्वाप्रधीवत्, तस्मान्न ज्ञानव्यतिरिक्तं सदिति प्राप्ते परिहारसूत्रे 'नाभावः' 'वैधर्म्याच्च' इति । अयमर्थः—ज्ञानातिरिक्तस्यार्थस्य नासत्त्वम्, किन्तु व्यवहारदशायामबाध्यार्थक्रियाकारित्वमेव, उपलब्धेः ज्ञानातिरेकेण प्रमाणैरुपलब्धेः । तथा च स्वप्नवैधर्म्योक्तिः बाध्यत्वरूपोपाधिप्रदर्शनाय । स्वप्नधीर्बाध्येति तत्र साध्यव्यापकता । जाग्रद्धीरबाध्येति तत्र साधनाव्यापकत्वम् । एवं चाभ्यां सूत्राभ्यां विज्ञानस्यैवाकारविशेषोऽर्थ इति मतस्य दूषणेऽपि व्यवहारदशाबाध्यो ज्ञानातिरिक्तोऽर्थ इति मतस्य न दूषणमिति मन्तव्यम् इति शुक्तोक्तमपि सम्यगेव । विमतं निस्तत्त्वम्, तर्कपीड्यत्वात्, मरुमरीचिकादिवत् इत्यनुमाने च बाध्यत्वप्रमाणागम्यत्वदोषजन्यत्वाद्युपाधिप्रदर्शनपरत्वं चेति 'वैधर्म्याच्च' इति सूत्रस्य विज्ञानवादनिराकरणपरत्वेऽपि न काचिद्धानिः । यदपि—'न खल्वभावो बाह्यार्थस्यावसातुं शक्यते' इति भाष्यमुदाहृत्य स्वभ्रान्तिप्रकाशे उक्तार्थस्यासंगतत्ववर्णनम्—तदप्यकिञ्चित्करम् ; बाह्यार्थस्यासद्विलक्षणत्वाभ्युपगमेन तदभावस्याद्वैतिभिरनङ्गीकारात् व्यवहारदशाबाध्येत्यर्थोपदर्शकवाक्यादर्शनं तु तात्पर्यानवधारणमूलकमेवेति कस्य दोषः ? न ह्येष स्थाणोरपराधः यदेनमन्धो न पश्यति । यदपि—जाग्रद्धीर्बाध्येति न तत्र साधनाव्यापकत्वमिति जगतोऽबाध्यत्वरूपपारमार्थिकत्वस्यैव साधनम्—इति तदपि बालभाषितम्, अभिप्रायानवबोधात् । न ह्यबाध्यमात्रस्य पारमार्थिकत्वम्, किन्तु त्रिकालाबाध्यस्यैव तत् । जाग्रत्प्रपञ्चस्य व्यवहारकालाबाध्यत्वेनाबाधितत्वोक्तेः । ननु अद्वैतिमते शुद्धब्रह्मणः प्रमाणजन्यप्रतीतिविषयत्वाभावस्य भाष्यादावुक्तत्वेन निर्धर्मकत्वेन च उपलब्धेरिति हेतोर्ब्रह्मण्यसिद्धिरिति चेत्, न ; सत्त्वेन प्रमाणात्

PDF Compressor Free Version

प्रतीतेरित्येवं हेतोः प्रमाणजन्यप्रतीत्यविषयेऽपि ब्रह्मणि प्रमाणजन्यावरणापगमाभिप्रायेण सत्त्वात् । किञ्च, ब्रह्मणः प्रमाणजन्यफलात्मकप्रतीत्यविषयत्वेऽपि वेदान्तरूपप्रमाणजन्यवृत्त्यात्मकप्रतीतिविषयत्वमभ्युपगम्यत एव ।

'फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यते ॥' इति ।

यच्च—यत्किञ्चित् सत् शून्यवादिना अवश्यमभ्युपेयम्, अन्यथा बाधो निःसाक्षिको निरवधिश्च स्यादिति असंगतम्, अद्वैतिमते साक्षिणः अविद्याप्रतिबिम्बितचैतन्यरूपत्वेन मरुमरीचिकाजलवत् मिथ्यात्वात् बाधकाले साक्षिणोऽभावात् बाधस्य निःसाक्षिकत्वनिरवधिकत्वे अवश्यमभ्युपगन्तव्ये । मिथ्याभूतयोश्च तयोः शून्यवादेऽपि संभवात्—इति, तन्न ; अन्तःकरणाद्यवच्छिन्नस्य साक्षित्वाभ्युपगमेन तस्य स्वरूपतः सत्यत्वात् प्रतिबिम्बापेक्षया बिम्बस्य कल्पितत्वेऽपि गगनस्थादित्यरूपेण शुद्धस्य रवेः आपेक्षिकबिम्बत्वाक्रान्तत्वतदनाक्रान्तत्वाभ्यां वस्तुतोऽविशेषवत् प्रकाशस्य प्रकाश्यसम्बन्धापेक्षया साक्षित्वोपचारात् स्वरूपतः सत्यत्वोपपत्तेः । अत एव निरवधिकत्वोक्तिरपि परहता, अदृष्टचरत्वात् ॥

एवमुक्तविधया सूत्रयोः न ज्ञानाकारोऽर्थः, किन्तु बाह्यः, स चार्थक्रियाकारित्वसत्त्वोपेतोऽपि अद्वैतश्रुतिवशात् ब्रह्मणि कल्पितो न परमार्थसन्निति सिद्धान्तस्य सुगतमताद्भेदः । व्यवहारदशायामपि ज्ञानात्मनैव बाह्यस्य सत्यत्वमास्थीयते बौद्धैः, न तु बाह्यात्मना । अद्वैतिभिस्तु न नीलाद्याकारा ज्ञप्तिरभ्युपेयते, अपि तु कूटस्थज्ञानानन्दात्मिका, अनिर्वाच्यो बाह्योऽर्थः । किं बहुना । स्वाप्निकानामपि 'न तत्र रथा न रथयोगाः' इत्याद्यनुरोधान्न तन्नयेनात्यन्तासत्त्वम् । अत एव शुक्तिरूप्यस्वाप्निकादीनामनिर्वचनीयानामुत्पत्तिरङ्गीक्रियते ।

PDF Compressor Free Version

प्रातिभासिकव्यावहारिकयोः व्यवहारकालबाध्यत्वतदबाध्यत्वाभ्यां प्रमाणगम्यत्वतदगम्यत्वाभ्यां प्रतिभासातिरिक्तकालेऽपि सत्त्वासत्त्वाभ्यां वैधर्म्यमिति तदनभ्युपगन्तुः सुगतस्य मतं खण्डयति। न च दृष्टिसृष्टिवादे ज्ञानात्मनैव बाह्यस्य सत्त्वम्, तद्वादेऽपि व्यवहारे बाह्यात्मनैव बाह्यसत्तालाभादनिर्वाच्यत्वाच्च। अनादिव्यतिरिक्तसृष्टिविषय एव दृष्टिसृष्टिरभ्युपगम्यते। अन्येषामपि कारणात्मना सत्त्वमङ्गीक्रियते। तदुक्तम्—

"न ग्राह्यभेदमवधूय धियोऽस्ति वृत्ति-
स्तद्बाधके बलिनि वेदनये जयश्रीः।
नो चेदनित्यमिदमीदृशमेव विश्वं
तथ्यं तथागतमतस्य तु कोऽवकाशः॥" इति।

अपि च लोकदृष्टिसिद्धस्याविचारितरमणीयस्य विश्वसत्यत्वस्य 'नेह नानास्ति' इति निषेधापेक्षितनिषेध्यसमर्पणायानुवाद एव श्रुत्या क्रियते। ननु शास्त्रस्याज्ञातज्ञापकत्वेन प्रत्यक्षप्राप्तव्यावहारिकसत्त्वविलक्षणत्रिकालनिषेधाप्रतियोगित्वरूपसत्त्वप्रमापकत्वम् एव अस्तु इति चेत्, न; 'नेह नानास्ति' इति त्रैकालिकसत्त्वनिषेधकश्रुतिविरोधेन विश्वसत्यत्वश्रुतेस्तत्परत्वाभावात्। न च वाच्यं विनिगमनाविरहात् वैपरीत्यमेव किं न स्यादिति। तात्पर्यान्यथानुपपत्तिगतिसामान्यादीनामेव विनिगमकत्वात्। अद्वैतवादिनी श्रुतिः षड्विधतात्पर्यलिङ्गेन स्वार्थपर्यवसायिनी। तथा हि—अज्ञातत्वाबाधितत्वप्रयोजनवत्त्वानि इति तात्पर्यनिर्णायकानि त्रीण्यर्थगतानि लिङ्गानि। अतिप्रसंगवारकमुपक्रमोपसंहारयोरैकरूप्यम्, अभ्यासः, अर्थवादश्चेति तावन्त्येव शब्दनिष्ठानि। तत्र सर्वासामुपनिषदामेवं प्रवृत्तत्वात् अन्यत्रये तु न विमतिः, मानान्तरासिद्धतया, मोक्षहेतुज्ञानविषयतया च प्रथमेऽपि अज्ञातत्वं प्रयोजनवत्त्वं च निर्विवादमेव।

PDF Compressor Free Version

अबाधिततत्वमात्रं तु संदिग्धम् ; तदप्यन्यथानुपपत्तिगतिसामान्याभ्यां निर्णीयते अयमभिप्रायः—विश्वसत्यत्वनिषेध्यत्वयोरुभयोरपि तावत् श्रुतिगम्यत्वं प्रतीयते, तत्र परस्परविरुद्धयोस्तात्त्विकत्वायोगात् वस्तुनि च विकल्पायोगात् , तात्त्विकव्यावहारिकप्रामाण्यभेदेन उभयबोधकश्रुत्योर्व्यवस्थोपपादनीया । सर्वप्रपञ्चनिषेधरूपमद्वैतं तु व्यावहारिकं न संभवति, 'अव्यवहार्यम्' इति श्रुतेः, अनुभवविरोधाच । ततश्च तत्र श्रुतेर्व्यावहारिकं प्रामाण्यमिति न वक्तुं शक्यत इति तत्र तात्त्विकमेव प्रामाण्यम्, विश्वसत्यत्वं च व्यावहारिकमिति तद्वादिन्याः श्रुतेर्व्यावहारिकमेव प्रामाण्यम् । तथा च विश्वसत्यत्वश्रुतेरस्मदभिहित एवार्थः । न च व्यावहारिकसत्यत्वे सर्वाविप्रतिपत्तेः तत्प्रतिपादनवैयर्थ्यमिति वाच्यम् , दशाविशेषे स्वर्गनरकादिसत्यत्वप्रतिपादनेन तत्प्राप्तिपरिहारार्थप्रवृत्तिनिवृत्त्योरेव तत्प्रयोजनत्वात् । ननु मिथ्यात्वश्रुतेर्लक्षणया चिन्मात्रपरत्वेन सत्त्वबोधनाविरोधित्वमिति पारमार्थिकसत्यत्वपरत्वमेव विश्वसत्यत्वश्रुतेरिति चेत्, न ; अखण्डार्थावबोधस्य द्वितीयाभावबोधद्वारकत्वेन जगत्सत्यत्वविरोधित्वात् । न चैवं सति विश्वसत्यत्वश्रुतेरप्रामाण्यप्रसङ्गः, अतत्त्वावेदकत्वस्यावान्तरतात्पर्यमादाय इष्टत्वात् ; परमतात्पर्येण तु तत्त्वावेदकत्वं सर्वश्रुतीनां सममेव । प्रातिभासिकव्यावृत्तस्य व्यावहारिकस्य तद्वति तत्प्रकारकत्वादिरूपस्य निराकर्तुमशक्यत्वाच्च ॥

यत्तु—नित्यासङ्गचिदात्मनि अचिदात्मकस्य प्रपञ्चस्य अध्यासानुपपत्तिः—इति, तन्न ; अध्यासभाष्ये बहुधा प्रपञ्चितत्वात् । नन्वारोप्यस्याधिष्ठानादन्यत्र हट्टादौ कान्ताकरकङ्कणादौ वा पारमार्थिकत्वेन पूर्वदृष्टस्यैवान्यत्र शुक्तिकादौ अध्यासदर्शनात् प्रकृतेऽपि तथात्वेन भाव्यम् इति चेत्, न ; अप्रयोजकत्वात् ।

PDF Compressor Free Version

तथा हि—पारमार्थिकत्वं मा भूत्, पूर्वदृष्टत्वेनैव अध्यस्तत्वं स्यात्, तर्हि किं दूषणम् ? इति—एवं पर्यनुयोगे व्यभिचार-निवर्तकतर्कस्याभावात् गौरवाच्च मायाविनिर्मितफलानुभवजन्येऽध्यासे व्यभिचाराच्च । सिद्धान्ते तु लाघवमेवानुकूलतर्कः, पूर्वपूर्वाध्यासव्यक्तीनामुत्तरोत्तराध्यासव्यक्तीः प्रति हेतुत्वमभ्युपगम्यते, अनादित्वाच्च नान्योन्याश्रयादिः । एवमेव सादृश्यादिकमप्युपपादनीयम् ॥

वस्तुतस्तु सादृश्यादिकमध्यासे नापेक्ष्यते, सादृश्याभावेऽपि स्वप्रकाशायामपि संविदि वेद्यत्वस्य, आत्मनि चानात्मसामान्यस्याध्यासदर्शनात्, किन्तु दोष एव । प्रकृते च अनाद्यनिर्वाच्याज्ञानरूपस्य दोषस्य विद्यमानत्वान्न नोपपद्यतेऽध्यासः । ननु तादृशाज्ञानमेवासिद्धम्, मानाभावात् । 'अहमज्ञः' इत्यपरोक्षानुभव एव तत्र मानमिति तु नोहनीयम्, अग्रहणभ्रान्तितत्संस्काराणामन्यतमविषयत्वेन तदुपपत्तेरिति चेत्, न ; अग्रहणस्य इन्द्रियादिसंनिकर्षाभावात् अनुपलब्धिगम्यत्वाच्च न तद्विषयत्वम्, अभावज्ञानस्य धर्मिप्रतियोगिज्ञानसव्यपेक्षत्वेन तज्ज्ञानाज्ञानाभ्यामनुपपत्तेश्च अनुपलब्ध्या न तद्ग्रहणसंभवः । अर्थात् यद्यपि 'घटाभाववत् भूतलम्' 'भूतले घटो नास्ति' इतिवत् 'अहमज्ञः' 'मयि ज्ञानं नास्ति' इति प्रतीतेरपि अभावालम्बनत्वं युज्यते, तथापि सामान्यावच्छिन्नप्रतियोगिताकत्वेन यावद्विशेषावच्छिन्नप्रतियोगिताकत्वेन वा 'वायौ रूपं नास्ति' इतिवत् यावद्विशेषाभावातिरिक्तसामान्याभावविषया यावद्विशेषाभावविषया वा साभ्युपेया, यत्किञ्चिद्विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वे घटवत्यपि भूतले 'निर्घटं भूतलम्' इति प्रतीतिः स्यात् । तस्मान्न

PDF Compressor Free Version

तथात्वमभ्युपगन्तव्यम् । तथा च धर्मिप्रतियोगिज्ञाने ज्ञानाभावस्य ग्रहीतुमशक्यत्वात्, धर्मिप्रतियोगिज्ञानाभावे चानुपलब्धेः प्रवृत्त्यभावात् भावरूपमनाद्यनिर्वाच्यमज्ञानम् 'अहमज्ञः' इत्यपरोक्षानुभवालम्बनमिति मन्तव्यम् । न च ज्ञानसामग्र्यभावेनानुमेय एव स इति वाच्यम्, हेत्वसिद्धेः ; ज्ञानाभावेन साध्यत्वे तु अन्योन्याश्रयः। भ्रान्तितत्संस्कारयोश्चाभावेतरकार्यत्वात्, केवलस्यात्मनः कूटस्थत्वेन भ्रान्तिहेतुत्वानुपपत्त्या तदुपादानत्वेन भावरूपमनिर्वाच्यमज्ञानमेष्टव्यम् । किञ्च, तत्त्वज्ञाननिवर्त्यतया तदभ्युपेतव्यम् । न चाग्रहणस्यैव तन्निवर्त्यत्वमिति वाच्यम्, तस्य तन्निवृत्तित्वात् । न च निवृत्तिरेव निवर्तकं भवति, तयोर्भेदस्य नियतत्वात् । न हि घटप्रागभावनिवृत्तिरूपो घटः स्वप्रागभावनिवर्तकः संभवति । भ्रान्तेश्च क्षणिकत्वेन न तन्निवर्त्यत्वम् । संस्कारस्य च सत्यपि ज्ञाने अनुवृत्तिदर्शनात् न तन्निवर्त्यत्वम् । "विमतं प्रमाणज्ञानं स्वाश्रयनिष्ठस्वनिवर्त्यस्वप्रागभावातिरिक्तस्वविषयावरणपूर्वकम् अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्" इति विवरणोक्तानुमानाच्च तत्सिद्धिः ; 'न सदासीत्' 'नासदासीत्' 'तम एवासीत्' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' 'अनृतेन प्रत्यूढाः' इत्यादिश्रुतिस्मृतिभ्यश्च । यद्यपि च सिद्धान्ते श्रीमन्नारायणानुरक्तिरूपस्य श्रीमन्माध्वसिद्धान्तस्य तदीयपरमतात्पर्यविषयीभूतस्य अनिराकृतत्वेन तदंशे ग्राह्यत्वमेव, तथापि विरुद्धांशानां निराकरणं हानाय युज्यत एवेति माध्वमतस्यावैदिकत्वेन निराकरणं तत्र तत्र । साम्प्रतं तु अनुपयुक्तत्वेन तदप्युपेक्ष्य केवलं चपेटिकादिग्रन्थान्तर्गतो निरर्थकप्रलाप एवापाक्रियते ॥

PDF Compressor Free Version

यदपि च स्वभ्रान्तिप्रकाशे, चिन्नस्वामिसमुद्धृतस्य "तद्वेदमेव व्याकुलीकुर्वतो गीतादिव्याकुलीकरणमुचितमेवेति समाश्वसितव्यम्, वेदगीतयोः प्रारब्धमेतादृशमिति वा शोचनीयम्। कथं नाम प्रतिवसन्तं यागानुष्ठानं केवलभ्रममात्रमिति वैदिको ब्रूयात्? कथं वा 'निस्त्रैगुण्यो भव' इति प्रतीयमानकर्मकाण्डार्थत्यागमुपदिशता भगवता 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इति पुनः कर्म कर्तव्यतयोपदिष्टम्? कथं च विषयोदपानादिशब्दानां प्रसिद्धार्थपरत्वे संभवति अप्रसिद्धक्लिष्टार्थव्याख्याने दुराग्रहः? कथं च वा 'त्रैगुण्यविषहारिणः' 'प्रलयेऽप्युदपानेऽसौ' इत्यादिकं स्वकपोलकल्पितमेव वचनं सम्मतित्वेनोदाहरसि? अथ वा नेदं त्वय्याश्चर्यम्, माठरकौरव्यमाण्डव्यभाल्लवेयादिश्रुतीः, ब्रह्मतन्त्रपुरुषोत्तमतन्त्रब्रह्मतर्कादिस्मृतीश्च कचिदपि प्रसिद्धस्मृतीतिहासपुराणादिष्वनाघ्रातनामगन्धाः कल्पयतो विषयोदपानव्याख्यानवचनकल्पनस्यानाश्चर्यत्वात्। न हि स्वतन्त्रश्रुतिकल्पनासाहसिकस्य द्वित्रस्मृतिवचनकल्पनात् भयमस्ति" इति ब्रह्मानन्दीयवचनजातस्य समाधानाय—यागानुष्ठानभस्मधारणादि भ्रमकल्पितमिति वदतो वैदिकत्वं कथं भवेत्—इति वचनाभासम्, तदनाकलितपौर्वापर्यस्यैव शोभते; असत्ख्यातिवादिनस्तवैव तत्संभवात्। अस्मन्मते तु शुक्तिरजतादीनामप्यसद्व्यावृत्तत्वं वियदादिसमानसत्ताकस्य यागादेस्तु दूरापेतमसत्त्वमिति॥

यच्च—'त्रैगुण्यविषया वेदाः' इति श्लोकस्य वेदास्त्रैगुण्यविषयाः त्रैगुण्यप्रतिपादकाः, त्वं तु निस्त्रैगुण्यो वेदपरित्यागवान् भव इति प्रातीतिकोऽर्थः। स च वैदिकैर्नाङ्गीकारार्ह इति वेदशब्दस्य कर्मकाण्डरूपवेदविषयत्वेन संकोचोऽङ्गीकृतः। द्वैतिभिस्तु त्रैगुण्यविषनाशका वेदाः, तानाश्रित्य त्रैगुण्यरूपसंसाररहितो भव इति विनैव सङ्कोच-

PDF Compressor Free Version

समर्थो वर्णित इति, तन्न ; श्लोकार्थानवबोधात् । 'निस्त्रैगुण्यो भव' इत्यस्य वेदपरित्यागवान् भव इत्यर्थवर्णनं तु सर्वथैवासंगतम्, त्रैगुण्यशब्दस्य वेदप्रतिपाद्यपरत्वेन तत्प्रतिपादका वेदा इति त्वयाप्यभ्युपगन्तव्यम् । त्रैगुण्यपदेन साध्यसाधनात्मकः संसार एवाभिप्रेतः । तथा च स एव विषयः कर्मतत्साधनादिप्रकाशनद्वारा वर्धनीयत्वेन गोचरो येषां ते त्रैगुण्यविषया वेदाः । त्वं तु निस्त्रैगुण्यो भव कामनाविषयत्वेन संसारमुपेक्ष्य संसाररहितो भव, तद्विषयाभिलाषरहितो भव ; मत्प्राप्तिरपि वेदोपदिष्टमार्गेणैव 'नावेदविन्मनुते तं बृहन्तम्' 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेः । तथा चार्थात् कर्मकाण्डपरा एव वेदास्त्रैगुण्यप्रतिपादकाः, अन्ये तु ब्रह्मपरा एवेति ब्रह्माभिव्यञ्जकत्वेन त एव मुमुक्षुभिः समाश्रयणीयाः । अत एव

'यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥'

इत्यत्र ब्रह्मज्ञस्य सर्वतः संप्लुतोदकस्थानीये विज्ञानफले सर्वकर्मफलान्तर्भावोक्तिः संगच्छते । त्वदुक्तार्थे तु न संगच्छते सा कथमपि । त्रैगुण्यविषनाशकवेदाश्रयणेन संसारातितरणस्योक्तत्वेन कस्य कुत्रान्तर्भावः किमर्थं विवक्ष्येत । वस्तुतस्तु वेदा अवान्तरतात्पर्येण त्रैगुण्यविषयाः, परमतात्पर्येण तु सर्वे वेदाः परमतत्त्वप्रतिपादका एव 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्यः' इति श्रुतिस्मृतिभ्यः । तथा चावान्तरतात्पर्येण वेदास्त्रैगुण्यप्रतिपादकाः, त्वं तु त्रैगुण्यकामनां परिहाय संसाररहितो भवेत्येवार्थः, विषयपदस्य विषनाशकत्वाद्यर्थकल्पने कामशास्त्रेणापि स्वार्थः साधयितुं शक्यत एव श्लाघनीयप्रज्ञैर्भवद्भिः ॥

PDF Compressor Free Version

यच्च—माठरादिश्रुतयः सर्वज्ञैर्न ज्ञायन्ते, उत त्वयैव ? नाद्यः परबुद्धेरप्रत्यक्षत्वात् । न द्वितीयः, त्वदनुपलब्धिमात्रेण उक्तश्रुतिस्मृतयो न सन्त्येवेति वक्तुमशक्यत्वात्—इत्यादि बहु जल्पितम् तदतीव तुच्छम् ; एवमन्यत्रापि विप्रलम्भकनिर्मितवाक्यचयेऽपि विकल्पापत्तेः । तत्रापि यदि कश्चिद्वञ्चकः अपौरुषेयत्वेन प्रामाण्यं ब्रूयात्तदा किमुत्तरम् ? तस्य पुरुषकर्तृकत्वं त्वयैव ज्ञायते सर्वैर्वा ? न द्वितीयः, सर्वबुद्धेरप्रत्यक्षत्वात् । नाप्याद्यः, त्वदुक्तिमात्रस्याकिञ्चित्करत्वादिति साम्यात् । तस्मान्न किञ्चिदेतत् । किन्तु सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वेनापौरुषेयत्वम्, तेन च तत्प्रामाण्यं स्वीकर्तव्यम् । त्वदभिमतमाठरादिश्रुतयश्च न तथा इति न तासां तथात्वम् । यत्तु, कश्चित् 'अग्निमीळे' 'इषे त्वा' इत्यादयोऽपि कल्पिताः यतो मया न दृष्टा इति ब्रूयात् इति, तन्न ; अप्रमीयमाणकर्तृकत्वे सति तासां सम्प्रदायविच्छेदाभावात् त्वादृशेतरेण वक्तुमशक्यत्वात् । न हि पेचकानुभवसिद्धतमसा रश्मिमाली संसृज्यते ॥

यदपि च, "सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा—ऊष, तेर, चक्र, पेच" इति "सर्वे खल्वप्येते देशान्तरेषु प्रयुज्यन्ते, न चैवोपलभ्यन्ते । उपलब्धौ यत्नः क्रियताम् महान् शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती त्रयो लोकाः चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः । एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधा आथर्वणो वेदः" इत्यादिमहाभाष्यमुद्धृत्य स्वाभिमतश्रुतिस्मृतिप्रामाण्यव्यवस्थापनम्, तदपि न स्वेष्टसाधनम्, यतो न हि भाष्यकृद्भिः स्मृतीतिहासपुराणोपपुराणसंहितादिष्वप्यनाघ्रातनामगन्धानां संप्रदायपरम्परया प्राप्तिविधुराणां प्रामाण्यं स्थाप्यते, उक्तदोषात् ; किं तु तत्तन्मर्यादयैव तत्प्रामाण्यमिति मन्तव्यम् ।

PDF Compressor Free Version

किञ्च, यदा भवतामेतादृशी श्रद्धा तदा कथं परमप्रसिद्धानां मुक्तिकोपनिषदि पुराणेषु चोपानिषत्त्वेन निर्दिष्टानां शरभरुद्रजाबालाद्युपनिषदां प्रामाण्यं नाभ्युपेयते । अप्रसिद्धानां कुत्रापि चानिर्दिष्टानां काठरादीनां प्रामाण्यम्, उपनिषत्पुराणादिप्रसिद्धानां शरभरुद्रभस्मजाबालादीनां न प्रामाण्यमितीयं का वाचोयुक्तिरिति माध्यस्थ्यमवलम्ब्य सुधीभिः स्वयमालोचनीयम् । इदमत्र तत्त्वम्—यद्यपि युगह्रासात् साम्प्रतं बहुशाखा विच्छिन्नसम्प्रदायतया नोपलभ्यन्ते; प्रामाण्यं च तासामुक्तविधयैव; तथापि समुपलब्धाविच्छिन्नसम्प्रदायशाखाविरुद्धस्मृतीतिहासादिभिस्तासामस्तित्वमवगन्तव्यम्, नियत्वेन क्वचित् पुरुषधौरेयेषु कारणे वा सत्त्वानपायात् । काठरादयस्तु न प्रसिद्धाः क्वचिदपि; जाबालादयस्तु प्रसिद्धतमा इत्युक्तमेव। यदपि च तत्प्रामाण्याभ्युपगन्तॄन् प्रत्येव तासां प्रामाण्यं ब्रूमः, न तु भवन्तं प्रतीति, तदपि पलायनमेव; वैदिकान् प्रति न ब्रूमः इत्येवमपि वाच्यत्वात् । यदपि च, 'यथा ह्ययं ज्योतिरात्मा विवस्वान' इति शाङ्करभाष्योदाहृतश्रुतिरपि तथैवेति, तन्न; सर्वसम्मतत्वात् । श्रुतिस्मृतिसूत्रादिभिस्तस्यास्तित्वमवद्योत्यते ।

"आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥"

'अत एव चोपमा सूर्यकादिवत्' इत्यादिभिरुक्तश्रुतेरस्तित्वावगमात् । श्रीरामानुजाचार्यादिभिरप्युक्तश्रुतेरास्तित्वमभ्युपगम्य स्वसिद्धान्तानुसार्यर्थो वर्णितः । श्रीवल्लभाचार्यैस्तु उक्तसूत्रे जलसूर्यकं सूर्येण सहितं सूर्यकमिति व्याख्याय 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्' इत्युक्तम् । प्रकाशकृतापि 'श्रौतं दृष्टान्तमाह इत्यर्थः । सिद्धमाहुः यथेत्यादि' इति ॥

PDF Compressor Free Version

यत्र—स्वाश्रयग्राहकसामग्रीग्राह्यत्वरूपप्रामाण्यस्वतस्त्वस्य वेदानुसारिपुराणादिवाक्यानां व्यवस्थितत्वोपपत्तिः—इति, तन्न; वेदमपेक्ष्य तथात्वे पौरुषेयवाक्येषु स्वतस्त्वानुपपत्तेः स्वातिरिक्त-मानान्तरानपेक्षत्वाभिप्रायेणैव प्रामाण्यस्वतस्त्वोक्तेः ; अन्यथा वेदानुसारिषु केषुचिज्जैनादिवाक्येष्वपि स्वतःप्रामाण्यापत्तेः । यद्यपि च ज्ञानमात्रस्य ज्ञानसामान्यसामग्रीप्रयोज्यत्वेन स्वाश्रय-ग्राहकसामग्रीग्राह्यत्वेन च स्वतः प्रामाण्यम्, तथापि व्यभिचारा-दनिश्चयाच्च दोषादिना अप्रामाण्यम् अनाप्तप्रणीतत्वभ्रमादिना च; हेतुभिरुक्तदोषाभावे गृहीते प्रामाण्यम्, लोके शब्दस्य प्रमाणान्तरा-पेक्षया प्रामाण्यदर्शनात्, अतन्मूलानां चाप्रामाण्यात् । यद्यपि चातन्मूलानामपि अप्रामाण्यदर्शनम् न मूलविरहात्, किन्तु दुष्टमूलतया शब्दस्य दुष्टत्वात् स्वाभाविकस्य प्रामाण्यस्यापवादः । तथापि शाब्दे अनाप्तपुरुषसंस्पर्शकृतत्वात् दोषाणां सत्त्वात् स्वतः प्रामाण्याभावेन प्रमाणसंवादात् प्रामाण्यमप्रामाण्यमन्यथा; अपौरुषेये च वेदे तदभावात् साक्षाच्चार्थान्यथात्वज्ञानाभावात् स्वतः प्रामाण्यम् । वेदविरोधे च पौरुषेयवाक्यानामप्रामाण्यमेव 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति न्यायात् । वेदविरोधे 'औम्बरी सर्वा वेष्टयितव्या' इत्यादिवाक्यानपेक्षं स्यात्; अविरोधे तु इयं स्मृतिः श्रुतिमूलिका, स्मृतित्वात्, मन्वादिस्मृतिवत् इत्यनु-मितापौरुषेयवेदमूलकत्वेनैव पौरुषेयाणां प्रामाण्यम्, नान्यथा पुरुष-स्वभावसुलभभ्रमप्रमादविप्रलिप्साकरणापाटवादिदोषसंसर्गसंभवात् इत्यर्थः । अत एव 'हेतुदर्शनाच्च' इति सूत्रम् । वस्तुतस्तु 'वेदवत् वेदविदां वचनम्' इति रीत्या आप्तवाक्यानां सर्वेषामपि प्रामाण्यमेव, तथापि तत्तन्मतवादिप्रक्षिप्तस्वार्थसाधकवचनचयसांकर्यात् कानि आप्तवाक्यानि कानि च प्रक्षिप्तानीति विवेचनं दुःशकम् ।

PDF Compressor Free Version

[अभिपाखण्डविवादृते लुप्तभये सद्ग्रन्थ] शैवोद्धृतानि वाक्यानि वैष्णवैः प्रक्षिप्तानीति तिरस्क्रियन्ते ; वैष्णवोद्धृतानि शैवैः तिरस्क्रियन्ते । इत्थं कलहकारिभिराकुलीकृतः सन्मार्गः ॥

यदपि, माध्वाः स्वस्य ब्राह्मणतया पशुविशसनेऽनधिकारात् स्वयं पशुविशसनमननुतिष्ठन्तोऽपि पशुविशसनाधिकारिभिः क्षत्रियैः क्रियमाणं पश्वालम्भमनुमन्यन्त इति, तदसत् ; माध्वाः स्वस्यानधिकारात् शास्त्रीयं कृत्यं परित्यजन्ति इत्यत्र तु नास्माकं विवादः ; ब्राह्मणतया नाधिकार इति त्वनाघ्रातवेदार्थगन्धस्यैव शोभते । अग्निष्टोमादौ ब्राह्मणानामधिकारात् तत्र च 'अग्नीषोमीयं पशुमालभेत' इति पश्वालम्भस्य विधानात् । न च पिष्टपशुविशसनेनैव तन्निर्वाहः शक्यसमर्थनः, मुख्यालाभ एवानुकल्पस्य विधानात् ।

'आपत्कल्पेन यो धर्मं कुरुतेऽनापदि द्विजः ।
स नाप्नोति फलं तस्य परत्रेति विचारितम् ॥' [म. ११-२८]
'प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम् ॥' [म. ११-३०]

इति स्मृतिविरोधात् । 'न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात् अन्यथा जैनादिमतप्रवेशो दुर्निवारः' इति मानवभेषजोक्तेः ॥

ननु एवं सति 'आचान्तोदकाय गां वेदयन्ते हतो मे पाप्मा पाप्मा मे हतः इति अपि त्वोंकुरुतेति करिष्यन् मारयिष्यन् नामांसो मधुपर्को भवति' इति सूत्रविहितस्य मधुपर्काङ्गगोमांसभक्षणस्य मुख्यत्वेन तत् विहाय प्रतिनिधिस्वीकारो नोपपद्येत ; तथा च यवनत्वापत्तिरिति चेत्, न ; 'अश्वालम्भं गवालम्भम्' इति स्मृत्या कलौ तन्निषेधात् । न चैवमग्निहोत्रज्योतिष्टोमादिवैदिककर्मविधेः तदङ्गपश्वालम्भादीनाम्

PDF Compressor Free Version

'पुरुषं वै देवाः पशुमालभन्त एते उत्क्रान्तमेधा अमेध्याः पशवः तस्मादेतेषां नाश्नीयात् सोऽनुगतो व्रीहिरभवत्' इत्यादिनैतरेयब्राह्मणे शतपथे च निषेधदर्शनेन पिष्टपशुविशसन एव तात्पर्यमिति वाच्यम्, मीमांसावृत्तान्तानवबोधात्। तथा हि—'उत्क्रान्तमेधा अमेध्याः पशवः' इत्यस्य अर्थवादत्वेन स्वार्थे तात्पर्याभावेन विध्यर्थस्तावकत्वेनोपयोगात्। 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' इति न्यायात्। अपि च यदा 'न हिंस्यात् सर्वा भूतानि' इति प्रत्यक्षनिषेधोऽपि 'अग्नीषोमीयं पशुमालभेत' इति विधानेन संकुचितविषयो भवति तदा कैव कथा अतत्परस्यार्थवादस्य शास्त्रविहितपश्वालंभनबाधने सामर्थ्याभावस्य, धर्मस्य चोदनालक्षणत्वात् 'चोदनालक्षणो धर्मः' अनर्थकारित्वादशुद्धियोगाच्च तस्य त्यागः स्वीकर्तव्य इति। स च नोपपद्यते; शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य। अयं धर्मः अयमधर्मः इति शास्त्रमेव विज्ञाने कारणम्, तयोरतीन्द्रियत्वात्, अनियतदेशकालनिमित्तत्वाच्च। यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति, तेन शास्त्रादृते धर्माधर्मविषयविज्ञानं न कस्यचित्। शास्त्राच्च हिंसाद्यनुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितम्। स कथमशुद्धोऽनिष्टहेतुश्च, अत एव भूतविषयां हिंसामधर्ममवगमयत् 'न हिंस्यात्' इति शास्त्रमुत्सर्गः 'अग्नीषोमीयं पशुमालभेत' इति चापवादः। उत्सर्गापवादयोश्च 'आहवनीये जुहोति' 'अश्वस्य पदे जुहोति' इतिवत् व्यवस्थितविषयत्वमभ्युपगन्तव्यम्। अत एवान्यत्रापि श्रूयते 'अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः' इति। परमेश्वरोऽपि स्मार्तस्य बन्धुबान्धववधादिलक्षणस्यातिक्रूरस्य क्षात्त्रधर्मस्यानुष्ठाने

PDF Compressor Free Version

'अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥'

इति महद्भयं दर्शयति ; तदनुष्ठाने 'स्वर्गद्वारमपावृतम्' इत्यादिना कल्याणं च दर्शयति । तस्मादनिन्द्यत्वात् शिष्टैरनुष्ठीयमानत्वात् विशुद्धमेव वैदिकं कर्मेति मोहादेव तत्परित्यागः । 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति च भगवद्वचनात् ॥

श्रीमद्रामानुजाचार्यो अपि "वैदिकं कर्म अग्नीषोमीयादि हिंसायुक्तत्वादविशुद्धम् । हिंसा च 'न हिंस्यात् सर्वा भूतानि' इति निषिद्धत्वात् पापमेव । न चात्र पदाहवनीयादिवदुत्सर्गापवादभावः संभवति, भिन्नविषयत्वात् अग्नीषोमीयहिंसाविधिर्हिंसायाः क्रतूपकारकत्वं बोधयति ; न हिंस्यात् इति तु हिंसायाः प्रत्यवायफलत्वम् । अथोच्येत अग्नीषोमीयादिषु विधितः प्रवृत्तेर्न तद्विषयं निषेधविधिरास्कन्दति, रागप्राप्तविषयत्वात् तस्येति, नैवम् ; इहापि रागप्राप्तेरविशिष्टत्वात् ; 'स्वर्गकामो यजेत' इत्येवमादौ हि कामिनः कर्तव्यतया यागाद्युपदेशात् ; नित्येष्वपि कर्मसु 'सर्ववर्णानां स्वधर्मानुष्ठाने परममपरिमितं सुखम्' इत्यादिवचनात् फलसाधनत्वमवगम्य रागादेव प्रवृत्तेः" इत्यादि बहुधा पूर्वपक्षयित्वा "शब्दादेव हेतोः कर्मणां विशुद्धिमाहुः अग्नीषोमीयादेः संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात् ; पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति 'हिरण्यशरीरः ऊर्ध्वः स्वर्गं लोकमेति' इत्यादिकोऽतिशयिताभ्युदयसाधनभूतो व्यापारोऽल्पदुःखदोऽपि न हिंसा, प्रत्युत रक्षणमेव । तथा च मन्त्रवर्णः—'न वा उ एतन्म्रियसे न रिष्यसि देवां इदेषि पथिभिः सुगेभिः । यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु' इति । चिकित्सकं च तादात्विकाल्पदुःखकारिणमपि रक्षकमेव

PDF Compressor Free Version

वदन्ति, पूजयन्ति च तज्ज्ञाः" इति । 'न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन' इति मनुस्मृतिरपि वृथेति पदस्वारस्यात् क्रत्वर्थातिरिक्तपशुवधमेव वारयति । अनुपाकृतमांसानीत्येतद्विशेषनिषेधदर्शनात् । अनर्चितवृथामांसमिति सामान्यनिषेधो गोबलीवर्दन्यायेनानुपाकृतमांसेतरश्राद्धाद्यनुद्देश्यमांसभक्षणे पर्यवस्यति ॥

'यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ।
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ॥' (म. ५-३१)
'यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥' (म. ५-३८)

इति देवाद्युद्देशमन्तरेण वृथामांसभक्षणे दोषमुक्त्वा यज्ञार्थे तु पशुवधे न दोष इत्याह—

'यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥' (म. ५-३९)
'यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृताः पुनः ॥
मधुपर्के च यज्ञे च पितृदैवतकर्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ।' (म. ५-४०, ४१)
'एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः ।
आत्मानं च पशुं चैव गमयत्युत्तमां गतिम् ॥' (म. ५-४२)
'गृहे गुरावरण्ये वा निवसन्नात्मवान् द्विजः ।
नावेदविहितां हिंसामापद्यपि समाचरेत् ॥' (म. ५-४३)
'या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥' (म. ५-४४)
'नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥' (म. ५-३५)

PDF Compressor Free Version

इत्यादिना वेदविहितस्य पशुवधस्य मनुर्महत्त्वमेवाह ।

अथान्यान्यपि वचनानि एवंपरण्येव ज्ञातव्यानि । वेदविरुद्धानि च तानि हेयान्येव

'या वेदबाह्याः स्मृतयः याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥'
(म. १२-९५)

इति मानववचनात् ॥

तस्माच्छ्रुतिस्मृतिपुराणादिसच्छास्त्रप्रदर्शितः पन्थाः सर्वथाप्यनतिशङ्कनीयः कल्याणकामुकैः । तदित्थमस्थाने माध्वक्षेपचयो निराकृतः, सर्वसिद्धान्तसमन्वयश्चाद्वैते परमाचार्यैः प्रदर्शित एव स्मार्यते । तत्प्रदर्शितेन पथा सर्वान्तरतमे प्रत्यगभिन्ने परप्रेमास्पदे श्रौतस्मार्तकर्मोपासनादिसमर्हणीये योगीन्द्रमुनीन्द्राद्याराध्येऽनन्ते चिदानन्दात्मनि भगवत्येव सकलश्रुतिस्मृतीतिहासपुराणादिसच्छास्त्रतात्पर्यमिति प्रदर्शनपरे समन्वयसाम्राज्यसर्वस्वभूतेऽद्वैतदर्शने वृथैव वादिनां प्रातिकूल्यविभ्रमः । बहुधा श्रुतिस्मृतिन्यायसंप्लवजलैः संशयविपर्ययादिमसृणितमानसे प्रक्षालितेऽपि यदि नेदमधिरोहति सम्यग्दर्शनम्, तदा सकलोद्धारपरायणं श्रीभगवन्तमेवाभ्यर्थये, यद्यकारणया स्वकीययानुकम्पयैव द्रुतमानसः स्वयमेव तेषामपि दयेत ॥

योऽसावाचार्यरूपेण पापतापकुशाञ्जनान् ।
आप्याययति सद्दृष्ट्या विश्वेशः प्रीयतां सदा ॥ १ ॥
योऽसावात्मस्वरूपेण सर्वभूताशयस्थितः ।
विश्वेश्वरमजं देवं तं वन्दे रघुनन्दनम् ॥ २ ॥